3 1761 05237802 3

PK
3771
A43
1916

Digitized by Microsoft®

Digitized by Microsoft®

Digitized by Microsoft®

Digitized for Microsoft Corporation
by the Internet Archive in 2007.
From University of Toronto.
May be used for non-commercial, personal, research,
or educational purposes, or any fair use.
May not be indexed in a commercial service.

KÂVYAMÂLÂ. 18.

THE

AMARUS'ATAKA

OF

AMARUKA.

With the Commentary of Arjunavarmadeva.

EDITED BY

MAHÂMAHOPÂDHYÂYA PAṆDIT DURGÂPRASÂDA

AND

VÂSUDEVA LAXMAṆ S'ÂSTRÎ PAṆAS'IKAR.

Third Revised Edition.

PUBLISHED BY

TUKÂRÂM JÂVAJÎ,

PROPRIETOR OF THE "NIRṆAYA-SÂGAR" PRESS.

Bombay:

1916.

Digitized by Microsoft®

(All rights reserved by the publisher.)

Published by Tukaram Javaji and Printed by Ramchandra Yesu Shedge,
at the Nirnaya-sagar Press, 23, Kolbhat Lane,
BOMBAY.

Digitized by Microsoft ®

काव्यमाला. १८.

श्रीअमरुककविविरचितं

अमरुशतकम् ।

अर्जुनवर्मदेवप्रणीतया रसिकसंजीविनीसमाख्यया
व्याख्यया समेतम् ।

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना महामहोपाध्याय-
पण्डितदुर्गाप्रसादेन, मुम्बापुरवासिपणशीकरोपाह्वविद्वद्वरलक्ष्मण-
शर्मात्मजवासुदेवशर्मणा च संशोधितः ।

तृतीयं संस्करणम् ।

तच्च

मुम्बय्यां

तुकाराम जावजी श्रेष्ठिभिः

स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये स्वायसाक्षरैर्मुद्रयित्वा प्रकाशितम् ।

शाकः १८३८, खिस्ताब्दः १९१६.

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा निर्णयसागरमुद्रायन्त्रालयाधिपतेरेवाधिकारः ।)

मूल्यं १० आणकाः ।

Digitized by Microsoft®

PK
3771
A43
1916



Digitized by Microsoft®

अमरुककविः ।

अमरुशतकं मण्डनमिश्रपत्न्याः शारदायाः प्रश्नानामुत्तरदानार्थं गतासोरमरुकाख्यमहीपतेर्देहं प्रविष्टेन श्रीशंकराचार्येण प्रणीतमिति बहूनां प्रवादः. "भगवाञ्छंकराचार्यो दिग्विजयच्छलेन काश्मीरमगमत् । तत्र शृङ्गाररसवर्णनार्थं सभ्यैरभ्यर्थितः "शृङ्गारी चेत्कविः काव्ये जातं रसमयं जगत्"इति वचनादमरुकनाम्नो राज्ञो मृतस्य परवपुःप्रवेशविद्यया शरीरे प्रवेशं कृत्वा स्त्रीशतेन सह केलिं विधाय प्रातस्तथा कारयामास । पिशुनैः कापटिकोऽयमाजन्मब्रह्मचारीत्युपहसितः शान्तरसमत्र व्याचष्टे इति किंवदन्ती ।" इति रविचन्द्रः स्वकृताया अमरुशतकटीकायाः प्रारम्भे लिलेख. किं त्वेतत्सर्वं शंकरदिग्विजयानवलोकनमूलं प्रमादविलसितम्. तथा हि माधवकविप्रणीते शंकरदिग्विजये नवमदशमसर्गयोः "कलाः कियत्यो वद पुष्पधन्वनः किमात्मिकाः किं च पदं समाश्रिताः । पूर्वे च पक्षे कथमन्यथास्थितिः कथं युवत्यां कथमेव पुरुषे ॥' इति श्रीशंकराचार्यं प्रति शारदाप्रश्नाः । ततः शारदाप्रश्नश्रवणानन्तरं यद्यस्याः प्रश्नानामुत्तरं न दास्यामि तदा ममाल्पज्ञता प्रतीयेत, उत्तरदाने तु संन्यासिनो मम कामशास्त्रचर्चया धर्मक्षयो भवेदिति विचार्य प्रश्नोत्तरदाने मासमात्रमवधिं विधाय शिष्यैः सह गगनमुत्पपातार्चार्यः । गगने बम्भ्रम्यमाण एव मृगयार्थमायातमटव्यामेव दैवयोगाद्गतप्राणं विलपन्तीभिः प्रमदाभिः परीतममरकाख्यमहीपतिं तरुमूले विलोक्य सनन्दनाख्यशिष्येण सह संमन्त्र्य शिष्यैः कृतरक्षमात्मकलेवरं कुत्रचन गिरिगह्वरे निधाय योगयुक्त्यामरकनृपशरीरे प्रविवेश । प्रमुदितैर्मन्त्रिभिर्महिषीभिश्च समेतो नृपशरीरधारी राजधानीं च जगाम । तत्र च मनोहरताभिर्महीपतिपङ्कजाक्षीभिस्तांस्तान्भोगानुपभुज्य कामतत्त्वं सम्यगभिज्ञाय 'वात्स्यायनप्रोदितसूत्रजातं तदीयभाष्यं च विलोक्य सम्यक् । स्वयं व्यधत्ताभिनवार्थगर्भं निबन्धमेकं नृपवेषधरी ॥" इत्याख्यायिका वर्तते. एतेन श्रीशंकराचार्यो वात्स्यायनीयकामसूत्रानुकूलं कमपि निबन्धं रचयामास, तत्रैव च शारदाप्रश्नानामुत्तराण्यप्यन्तर्भावयांचकारेति प्रतीयते. न त्वमरुशतकनिर्माणसूचनमात्रमपि शंकरदिग्विजये समुपलभ्यते. नाप्यमरुशतके शारदाप्रश्नोत्तरानुरूपं किमप्यस्ति. एवं रविचन्द्रोक्तमप्यसंबद्धमेव. यतस्तत्रैव षोडशे सर्गे आचार्यस्य काश्मीरयात्रा तत्र च शारदासदने तत्तद्देशवासिभिर्वादिभिर्विवादश्च सम्यग्वर्णितः. किं तु शृङ्गाररसवर्णनार्थं सभ्यैरभ्यर्थित इत्यादिरविचन्द्रोक्तं तत्र नोपलभ्यते तस्मादेवंविधा निर्मूला जनश्रुतयः कथं प्रमाणत्वेन स्वीकर्तुमर्हाः ? अथ यदि शारदाप्रश्नोत्तरदानार्थं निबन्धं प्रणीयामरुशतकमप्याचार्येणैव निरमायीति को विकल्पावकाश इत्युच्यते, तर्हि तन्निबन्धनिर्माणं शारदाप्रश्नोत्तरदानार्थमात्मनः सर्वज्ञताकीर्तिरक्षार्थं च, किं त्वमरुशतकप्रणयनं शृङ्गारव्यसनितयैवेत्यप्यङ्गीकार्यमिति महती विडम्बना यतिवरस्य. तस्मादस्य शतकस्य प्रणेतामरुककविः कश्चिदन्य एव. स च कदा कुत्र समुत्पन्न इति न ज्ञायते. किं तु ध्वन्यालोकस्य तृतीयोद्द्योते 'मु-

क्तकेषु हि प्रबन्धेष्विव रसबन्धाभिनिवेशिनः कवयो दृश्यन्ते। तथाह्यमरुकस्य कवेर्मुक्तकाः शृङ्गाररसस्यन्दिनः प्रबन्धायमानाः प्रसिद्धा एव।' इत्यानन्दवर्धनाचार्य उक्त्वानुदाहृतवांश्च बहूनमरुशतकश्लोकांस्तत्तत्स्थलेषु. तस्मात्खिस्ताब्दीयनवमशतकात्प्राक्तनोऽमरुककविरिति ज्ञायते.

शतकस्यास्य भूयस्यष्टीका वर्तन्ते। तत्रास्माभिः (१) अर्जुनवर्मदेवकृता रसिकसंजीविनी (२) वेमभूपालकृता शृङ्गारदीपिका, (३) रुद्रमदेवकृता, (४) रविचन्द्रकृता, (५) सूर्यदासकृता शृङ्गारतरङ्गिणी, (६) शेषरामकृष्णकृता रसिकसंजीविनी, (७) कर्तृनामरहिता, इति टीकासप्तकमासादितम्.

तत्र—अर्जुनवर्मदेवः सुप्रसिद्धस्य मालवाधिपतेर्भोजनरेन्द्रस्य वंश्यः सुभटवर्मसूनुरासीदिति तत्कृतटीकाप्रारम्भश्लोकेभ्यः काव्यमालायां ३ लेखे मुद्रितात्तदीयदानपत्राच्च ज्ञायते. तच्च दानपत्रं १२७२ मिते विक्रमाब्दे लिखितमिति खिस्ताब्दीयत्रयोदशशतकपूर्वार्धेऽर्जुनवर्म आसीदित्यपि सुव्यक्तम्. अर्जुनवर्मदेवश्च टीकायां 'यदुक्तमुपाध्यायेन बालसरस्वत्यपरनाम्ना मदनेन' इति वदंस्तत्तत्स्थलेषु मदनोपाध्यायप्रणीतान्बहूञ्श्लोकान्प्रमाणत्वेनोपन्यस्तवान्. दानपत्रसमाप्तौ 'रचितमिदं—राजगुरुणा मदनेन' इत्यस्ति. तस्मात्कस्यचनालंकारनिबन्धस्य प्रणेता अर्जुनवर्मगुरुर्मदनोपाध्यायोऽपि तत्समय आसीत्. तत्प्रणीतग्रन्थस्तु नाद्यापि दृक्पथं गतः. 'हरिहरगर्वं परिहर कविराजगजाङ्कुशो मदनः। मदन विमुद्रय वदनं हरिहरचरितं स्मरातीतम्॥' इति प्राचीनं पद्यमपि कदाचिदस्यैव मदनोपाध्यायस्य वर्णनपरं स्यात्.

वेमभूपालस्तु शृङ्गारदीपिकाप्रारम्भे इत्थमात्मानमवर्णयत्—

'अन्योन्यमेलनवशात्प्रथमं प्रवृद्धं मध्ये मनाग्व्यवहितं च कुतोऽपि हेतोः।
प्राप्तं दशामथ मनोरथलाभयोग्यां पायाच्चिरं रतिमनोभवयोः सुखं वः॥

आसीच्चतुर्थान्वयचक्रवर्ती वेमक्षितीशो जगदेकवीरः।
एकादशेति प्रतिभान्ति शङ्कां(?) येनावतारा परमस्य पुंसः॥

राज्यं वेमः सुचिरमकरोत्प्राज्यहेमाद्रिदानो
भूमीदेवैर्भुवमुरुभुजो भुक्तशेषामभुङ्क्त।
श्रीशैलाग्रात्प्रभवति पथि प्राप्तपातालगङ्गे
सोपानानि प्रथमपदवीमारुरुक्षुश्चकार॥

माचक्षोणिपतिर्महेन्द्रमहिमा वेमक्षितीशाग्र(नु)जो
रामाद्यैः सदृशो बभूव सुगुणैस्तस्य त्रयो नन्दनाः।
कीर्त्या जाग्रति रेड्डिपोतनृपतिः श्रीकोमटीन्द्रस्ततो
नागक्ष्मापतिरित्युपात्तवपुषो धर्मार्थकामा इव॥

वेमाधिपो माचविभुश्च नन्दनौ श्रीकोमटीन्द्रस्य गुणैकसंश्रयौ।
भूलोकमेकोदरजन्मवाञ्छया भूयोऽवतीर्णाविव रामलक्ष्मणौ॥

स वेमभूपः सकलासु विद्यास्वतिप्रगल्भो जगनोष्वगण्डः (?)।
कदाचिदास्थानगतः कवीनां काव्यामृतास्वादपरः प्रसङ्गात् ॥
अमरुककविना रचितां शृङ्गाररसात्मिकां शतश्लोकीम्।
श्रुत्वा विकसितचेता तदभिप्रायं प्रकाशतां नेतुम् ॥
मूलश्लोकान्समाहृत्य प्रक्षिप्तान्परिहृत्य च।
विधत्ते विदुषामिष्टां टीकां शृङ्गारदीपिकाम् ॥

अनेनायं वेमभूपालः केरलदेशीयः कश्चन शूद्रमहीपतिरासीदिति भाति. अभिनववाणकविप्रणीते वीरनारायणचरिताभिधे गद्यकाव्ये वर्णितस्त्रिलिङ्गदेशान्तर्गत'अद्दङ्की'नामनगर्यधीशः कदाचिदयमन्यो वेति संदेहः.

रुद्रमदेवस्तु नात्मानं वर्णितवान्. केवलं टीकासमाप्तौ—

'अमरुकशतमिदमित्थं स्वबुद्धिविभवाद्रसाब्धितत्त्वज्ञः।
रुद्रमदेवकुमारो विदग्धचूडामणिर्व्यवृणोत् ॥'

इयमार्या वर्तते.

रविचन्द्रविषये किमपि न ज्ञायते.

सूर्यदासः कदाचन सिद्धान्तसुन्दरकर्तृज्ञानराजदैवज्ञात्मजो रामकृष्णविलोमकाव्यभगवद्गीताटीकयोः प्रणेतैव स्यात्.

शेषरामकृष्णस्तु कश्चन वाराणसेयः शास्त्री.

एतासु सप्तस्वपि टीकास्वर्जुनवर्मप्रणीता श्रेष्ठतमेति सैवास्माभिर्मुद्रिता. वेमभूपतिकृतापि समीचीनैव. रुद्रमदेवकृतातिसंक्षिप्ता. रविचन्द्रकृतायां शान्तरसोऽपि व्याख्यातः. स च शुचिरसस्यन्दिष्वमरुकश्लोकेषु परिशील्यमानेषु 'रहसि प्रौढवधूनां रतिसमये वेदपाठ इव' सहृदयानां शिरःशूलमेव जनयति. सूर्यदासेनार्जुनवर्मप्रणीतटीकायाः सर्वस्वमपहृतम्. शेषरामकृष्णेन वेमभूपालटीका सम्यगेव लुण्ठितेत्युभावपि परार्थहरणप्रवणावतिसाहसिकौ पाटचराविति न संदेहः. सप्तमी कर्तृनामरहिता टीका तु टिप्पणमात्रं केनचिज्जैनेन प्रणीतेति भाति. एवं शंकरकृता हरिहरभट्टकृता अमरुदर्पणं चेति टीकात्रयमन्यदप्यस्ति. तच्चास्माभिर्नासादितम्.

अस्मदृष्टान्यमरुशतकमूलपुस्तकान्यपि कानिचिदर्जुनवर्मदेवटीकायाः, कानिचिच्च वेमभूपालटीकायाः प्रायोऽनुकूलानि सन्ति. टीकाद्वये च श्लोकविन्यासभेदः. कानिचिच्च पद्यान्येकेन व्याख्यातान्यपरेण परित्यक्तानि. अमरुशतकपुस्तकेष्वनुपलभ्यमानानि कानिचन पद्यानि सुभाषितावल्यादिष्वमरुकनाम्ना, कानिचिच्च शतकपुस्तकेषूपलभ्यमानान्यप्यन्यकविनाम्ना समुद्धृतानीत्यादि सर्वं परिशिष्टेषु श्लोकानुक्रमणिकायां चास्माभिर्दर्शितमस्तीति शिवम्.

Digitized by Microsoft®

अस्मन्मुद्रणाधारभूतानि पुस्तकानि त्वेतानि—

(१) अर्जुनवर्मटीकासमेतं कश्मीरलिखितं प्रायः शुद्धं नवीनमस्मदीयम्. तत्पत्राणि २६.

(२) अर्जुनवर्मटीकासमेतं जयपुरराजगुरुभट्टलक्ष्मीदत्तसूनुभट्टश्रीदत्तशर्मणां प्रायः शुद्धं १६९५ विक्रमसंवत्सरे लिखितम्. तत्पत्राणि ६४.

(३) अर्जुनवर्मटीकासमेतमेव डॉक्टर् पी. पीटर्सन्महाशयेन मथुरातः समानीय दत्तं १६६५ विक्रमाब्दे लिखितं नातिशुद्धमष्टपत्रविकलम्.

(४) वेमभूपालकृतटीकासमेतं जयपुरराजगुरुपर्वणीकरोपाह्वनारायणभट्टानां नातिशुद्धम्. तत्पत्राणि ३१.

(५) तादृशमेव मुम्बईनगरवास्तव्यपण्डितज्येष्ठाराममुकुन्दजीशर्मणाम्. तत्पत्राणि३४.

(६) रुद्रमदेवकृतटीकासमेतं शुद्धं १५७९ विक्रमाब्दे लिखितं सुरतनगरवासिना केवलदासात्मजेन भगवान्दासश्रेष्ठिना समानीय दत्तम्.

(७) इतस्ततः संपादितानि त्रिचतुराणि मूलपुस्तकानि.

Digitized by Microsoft®

काव्यमाला ।

अमरुककविविरचितं

अमरुशतकम् ।

महाराजश्रीमदर्जुनवर्मदेवप्रणीतया रसिकसंजीविनीसमाख्यया व्याख्ययोपेतम् ।

देवी रतिर्विजयते मृगनाभिचित्रपत्रावली पृथुपयोधरसीम्नि यस्याः ।
भाति त्रिलोकविजयोपनतस्वकान्तप्रक्रान्तसायकनिशाणनकालिकेव ॥

भ्रूलास्योत्सविनी सविभ्रमगतिर्मूर्छन्नितम्बस्तना
संकीर्णे वयसि स्मितार्द्रभणितिः सा पार्वती पातु वः ।
यस्याः कर्णतटं दृशावगमतां तूर्णं तदन्तःपथे
गत्वा द्रष्टुमिवेश्वरं हृदि कृताधिष्ठानमाकुञ्चिते ॥
अमरुककविक्लडमरुकनादेन विनिहुता न संचरति ।
शृङ्गारभणितिरन्या धन्यानां श्रवणयुगलेषु ॥
आपद्यन्तां विकासं कथमिह कुमुदानीव कार्कश्यदीप्य-
त्सूर्यारब्धप्रबन्धव्यसननिपतितान्युत्तमानां मनांसि ।
आविर्भावं भजन्ते यदि न बुधगुरोर्मन्मथप्रौढिकाराः
क्रीडाधान्नः कलानाममरुकसुकवेः केऽप्यमी श्लोकपादाः ॥
क्षिप्ताशुभःसुभटवर्मनरेन्द्रसूनुर्वीरव्रती जगति भोजकुलप्रदीपः ।
प्रज्ञानवानमरुकस्य कवेः प्रसारश्लोकाञ्छतं विवृणुतेऽर्जुनवर्मदेवः ॥
अव्युत्पत्तिमतामन्तःप्रबोधाय सचेतसाम् ।
काव्याभिधेयालंकारलक्षणं लिख्यते मनाक् ॥

तत्रादिमोऽयमाशंसनश्लोकः—

ज्याकृष्टिबद्धखटकामुखपाणिपृष्ठ-
प्रेङ्खन्नखांशुचयसंवलितोऽम्बिकायाः[2] ।
त्वां पातु मञ्जरितपल्लवकर्णपूर-
लोभभ्रमाद्भ्रमरविभ्रमभृत्कटाक्षः ॥ १ ॥

---

१. 'तर्जनीमध्यमामध्ये पुङ्खोऽङ्गुष्ठेन पीड्यते । यस्मिन्ननामिकायोगः स हस्तः कट-कामुखः ॥' इति शृङ्गारदीपिका. २. 'मृडान्याः' इति शृङ्गारदीपिकासंमतः पाठः.

'यद्गतागतिविश्रान्तिवैचित्र्येण विवर्तनम्। तारकायाः कलाभिज्ञास्तं कटाक्षं प्रचक्षते ॥' सर्वमङ्गलायाः कटाक्षस्त्वां पातु रक्षतु। किंविशिष्टः। ज्याकृष्टीत्यादि। बाणासनगुणाकर्षणेन रचितो यः खटकामुखो नाम हस्तस्तस्य पृष्ठं तत्र परिस्फुरन्यः करजकिरणकलापस्तेन संवलितः करम्बितः। खटकामुखलक्षणं चैतत्—'अस्या एव यदा मुष्टेरूर्ध्वोङ्गुष्ठः प्रयुज्यते। हस्तकः शिखरो नाम तदा ज्ञेयः प्रयोक्तृभिः ॥ शिखरस्यैव हस्तस्य यदाङ्गुष्ठनिपीडिता। प्रदेशिनी भवेद्वक्रा कपित्थो जायते तदा ॥ उत्क्षिप्ता च यदा वक्रानामिका सकनीयसी। एतस्यैव कपित्थस्य तदा स्यात्खटकामुखः ॥' अथ कटाक्षस्योपमानगर्भं विशेषणमाह—पुनः किंविशिष्टः। मञ्जरितेत्यादि। मञ्जरी उद्भिद्यमानमुकुलसंततिः। सा संजातास्येति तारकादिभ्य इतच्। मञ्जरितो यः पल्लवः स एव कर्णपूरस्तत्र लोभस्तेन भ्रमन्यो भ्रमरस्तस्य विभ्रमो विलासस्तं बिभर्तीति क्विप्। इति तावद्वाक्यार्थः। रहस्यं चैतत्परमार्थसहृदया मन्यन्ते—यं रसमुपनिबद्धुमेष कविः प्रवृत्तः स यद्यप्यकृत्रिमानुरागस्त्रीपुंसपरस्परानुरागकल्लोलितः परां कोटिमधिरोहति तथापि नायिकायाः प्राधान्यम्। तत्प्राधान्यप्रकाशनपरश्चायमौचित्यात्कटाक्षमुख्यत्वेनाभीष्टदेवताशंसनश्लोकोऽपि प्रथमं लिखितः, 'क्षिप्तो हस्तावलग्नः' इत्यादिश्लोकस्तु चरमम्। किं च धर्मार्थयोरुपरिवर्तमानस्य मोक्षात्किंचिदर्वाचीनस्य पुरुषार्थविशेषस्य निधानमपत्येनैव पितृणामानृण्यहेतुभूता नितम्बिनीर्विहाय किमन्यदुपादेयम्। यदुक्तमुपाध्यायेन बालसरस्वत्यपरनाम्ना मदनेन—'संसारे यदुदेति किंचन फलं तत्कृच्छ्रसाध्यं नृणां किं त्वेतत्सुखसाध्यमस्ति युगलं सम्यग्यदि ज्ञायते। यल्लक्ष्मीसमुपार्जनं पुलकिनां रक्तस्वरं गायतां यत्कान्तारतिनिस्तरङ्गमनसामुत्पद्यते नन्दनः ॥' कामशास्त्रेऽप्युक्तम्—'किं स्यात्परत्रेत्याशङ्का यस्मिन्कार्ये न जायते। न चार्थघ्नं सुखं चेति शिष्टास्तस्मिन्व्यवस्थिताः ॥' परस्त्रीगतोऽप्ययं रस उपनिबध्यमानो न पातकाय। एवंविधसंविधानकैः स्त्रीणां चारित्रखण्डनं भवति तस्मात्प्रयत्नेनैताः संरक्षणीया इत्युपदेशपर्यवसितत्वात्। अन्यथा वात्स्यायनो महर्षिस्तत्तदुपायैः परस्त्रीसाधनं कथं प्रणीतवान्। उक्तं च—'संदृश्य शास्त्रतो योगान्पारदारिकलक्षितान्। न याति च्छलनं कश्चित्स्वदारान्प्रति शास्त्रवित् ॥' यद्यपि धनुर्वेदे खटकामुखः प्रणीतोऽस्ति तथाप्यत्र नृत्यसंस्कार एवायं हस्तको देव्याः। एवं च महान्विशेषः। लास्यलीलयैव देव्या दुरतिक्रमदैत्यकुलक्षयः कृत इति प्रभावातिशयप्रतीतेः। 'यतो हस्तस्ततो दृष्टिर्यतो दृष्टिस्ततो मनः' इत्युक्तत्वात्खटकामुखे कटाक्षनिवेशनं युक्तम्। सहृदयमन्यैश्च पुनरत्र मुरटाप्रभृतिपञ्चमुष्टीनां मध्ये केयं मुष्टिः कैशिकप्रमुखपञ्चन्यायेषु कश्चायं न्याय इत्यादिशारासनशास्त्रचर्चा क्रियते। वयं त्वेवं ब्रूमः—यत्र शृङ्गारैकरसः कविः पुरुषायितप्रवृत्तकामिनीवदनमेव त्वां पातु किं हरिहरस्कन्दादिभिर्दैवतैरिति देवताशंसनमप्यपार्थकप्रायं प्रतिपादयति तत्र को नाम धनुर्वेदमनिर्वेदः पल्लवयितुमुत्सहत इति। प्रेङ्खन्नखांशुपाणिपृष्ठकटाक्षयोर्मञ्जरित-

---

१. 'मुचटी' इति द्वितीयपुस्तके.

Digitized by Microsoft ®

पल्लवकर्णपूरभ्रमराभ्यां सहोपमानोपमेयभावः । तेन कोमलारुणपाणिनिर्मलनखान्ततरञ्जितचपलापाङ्गचमत्कारेण न्यन्द्रचूडचित्तानुमोदननिबन्धिनी देव्याः सौन्दर्यविभ्रमसंपत्तिः प्रतिपादिता । देवीनां हि लावण्यवर्णनाभिनिवेशस्तत्प्राणेश्वरप्रीतिप्रतिपादनाकाङ्क्षयैव कवीनाम् । इतराकाङ्क्षया तु कलङ्किन एव ते स्युः । उपनिबद्धं च भट्टवाणेनैवंविध एव सङ्ग्रामप्रस्तावे देव्यास्तत्तद्भङ्गिभिर्भगवता भर्गेण सह प्रीतिप्रतिपादनाय बहुधा नर्म । यथा—'दृष्टावासक्तदृष्टिः प्रथममथ तथा संमुखीनाभिमुख्ये स्मेरा हासप्रगल्भे प्रियवचसि कृतश्रोत्रपेयाधिकोक्तिः । उद्युक्ता नर्मकर्मण्यवतु पशुपतेः पूर्ववत्पार्वती वः कुर्वाणा सर्वमीषद्विनिहितचरणालक्तकैव क्षतारिः ॥'अत एवाम्बिकाया इति पदं न्यस्तम् । कोऽभिप्रायः । अन्येषां सर्वेषामपि मातुर्भगवतश्च नीलकण्ठस्य प्रियायाः । अन्यथा कटाक्षादिवर्णनप्रस्तावे कोऽवकाशोऽम्बिकादीनां पदानामिति । संवलितोऽम्बिकाया इत्यत्र, लोभभ्रमद्भ्रमरेत्यादौ चानुप्रासो नाम शब्दालंकारः । यदाह भट्टरुद्रटः—'एकद्व्यन्तरितं व्यञ्जनमविवक्षितस्वरं बहुशः । आवर्त्यते निरन्तरमथवा यदसावनुप्रासः ॥' अत्र वीररसस्यानुगुणो विकटपदानां प्रकृष्टो न्यासोऽनुप्रासः । अलंकाराणां सामान्यलक्षणं चैतत्—'काव्यशोभाकरान्धर्मानलंकारान्प्रचक्षते ।' ज्याकृष्टीत्यादौ मञ्जरीत्यादौ च यथाशक्तिसमासाद्गौडीया रीतिः । यदुक्तम्—'द्वित्रिपदा पाञ्चाली लाटीया पञ्च सप्त वा यावत् । शब्दाः समासवन्तो भवति यथाशक्ति गौडीया ॥' ये च दण्डिनाचार्येण—'श्लेषः प्रसादः समता माधुर्यं सुकुमारता । अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः । इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः ॥' इति गुणाः प्रतिपादितास्ते चात्र शृङ्गाररसोचिता बाहुल्येन भविष्यन्ति । तस्माद्वैदर्भमार्गे सर्वथा समास एव न स्यादिति न वाच्यम् । ओजसः समासभूयस्त्वात् । तर्ह्योजोगुण एव गौडीयो मार्ग इति चेत्, गौडीये केवलं यथाशक्ति समास एव वैदर्भे पुनः श्लेषप्रसादादयोऽपीति । ननु गुणा अपि काव्यशोभाहेतवस्तत्कथं 'काव्यशोभाकरान्' इत्याद्यलंकारलक्षणं समानजातीयव्यवच्छेदकं स्यात् । उच्यते—नहि गुणाः कटककेयूरादिवदाभरणत्वेनालंकुर्वन्ति । किं तु शौर्यौदार्यवत्प्रकर्षमादधते । उक्तं चानन्दवर्धनाचार्येण—'उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् । हारादिवदलंकारास्तेऽनुप्रासोपमादयः ॥ तमर्थमवलम्बते येऽङ्गिनं ते गुणाः स्मृताः । अङ्गाश्रितास्त्वलंकारा मन्तव्याः कटकादिवत् ॥' अर्थालंकारश्चात्र कल्पितोपमा । यदुक्तम्—'सा कल्पितोपमाख्या यैरुपमेयं विशेषणैर्युक्तम् । तादृग्भिस्तावद्भिः स्यादुपमानं तथा यत्र ॥' यथा—'मुखमापूर्णकपोलं मृगमदलिखितार्द्रपत्रमेतत्ते । भाति लसत्सकलकलं सलाञ्छनं चन्द्रबिम्बमिव ॥' सामान्यलक्षणं चैतत्—'उभयोः समानमेकं गुणादिसिद्धं यथा यदेकत्र । अर्थेऽन्यत्र तथा तत्साध्यत इति सोपमा ज्ञेया ॥' श्रुतालंकारैरत्रोत्प्रेक्षा कैश्चिदुक्ता । सा च न भवति । सिद्धोपमानसद्भावाभावात् । यदुक्तम्—'अतिसारूप्यादैक्यं विधाय सिद्धोपमानसद्भा-

---

१. चण्डीशतके ।

Digitized by Microsoft ®

वम् । आरोप्यते च तस्मिन्नतद्गुणादीति सोत्प्रेक्षा ॥' यथा—'चम्पकशिखराग्रमिदं कुसुममसमूहच्छलेन मदनशिखी । अयमुचैरारूढः पश्यति मथिकान्दिधक्षुरिव ॥' यत्र संभावनमात्रेण 'लिम्पतीव तमोऽङ्गानि' इत्यादिवदुपमानोपमेयभाव एव नास्ति तत्रातिशयोत्प्रेक्षाव्यवहारः । भट्टरुद्रटमते हि चतस्रोऽलंकाराणां जातयः—वास्तवमौपम्यमतिशयः श्लेष इति । अत्र यद्यपि दैत्यदलनोपक्रमे भ्रूभङ्गलोचनलौहित्यादिविकाराभावादुपमायाः सौन्दर्यविभ्रमसंपत्तिं धैर्यातिशयशालिनीं प्रतिपादयन्त्या 'उत्साहात्मा वीरः स च त्रिधा धर्मयुद्धदानेषु' इति वचनाद्युद्धवीररसे गौडीरीतिव्यञ्जितौजसि तत्परता । तथापि न रसस्य प्राधान्यम् किं तु त्रयस्त्रिंशत्कोटित्रिदशैरप्यशक्ये कर्मण्यध्यवसिताया देव्याः प्रभावातिशयमात्रात्मनो वाक्यार्थस्य । तेनोपमाया रसवदलंकारत्वम् । यदुक्तम्—'प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः । काव्ये तस्मिन्नलंकारो रसादिरिति मे मतिः ॥' भ्रमरसाधर्म्यारोपणेन कवेरसितः कटाक्षोऽभिप्रेतः । वर्णयन्ति सितमसितं सितासितं च कटाक्षम् । तत्र सितो यथा धनंजयस्य—'उज्जृम्भाननमुल्लसत्कुचतटं लोलभ्रमद्भ्रूलतं स्वेदाम्भःस्नपिताङ्गयष्टि विगलद्व्रीडं सरोमाञ्चया । धन्यः कोऽपि युवा स यस्य वदने व्यापारिताः सांप्रतं मुग्धे दुग्धमहाब्धिफेनपटलप्रख्याः कटाक्षच्छटाः ॥' असितो यथा कस्यापि—'गतः कालो यत्र प्रणयिनि मयि प्रेमकुटिलः कटाक्षः कालिन्दीलघुलहरिवृत्तिः प्रभवति । इदानीमस्माकं जरठकमठीपृष्ठकठिना मनोवृत्तिस्तत्किं व्यसनिनि मुधैव क्षपयसि ॥' सितासितो यथा—'अदृश्यन्त पुरस्तेन खेलाः खञ्जनपङ्क्तयः । अस्मर्यन्त विनिःश्वस्य प्रियानयनविभ्रमाः ॥' इति ॥

क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं
गृह्णन्केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण ।
आलिङ्गन्योवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शांभवो वः शराग्निः ॥ २ ॥

स शांभवः शराग्निर्युष्माकं दुरितं दहतु हरतु । स कः । य आर्द्रापराधः कामीव त्रिपुरयुवतिभिर्बाष्पाञ्जलज्जलायितलोचनेन्दीवराभिः करव्यतिषक्तः प्रेरितः । बलात्कारेण वस्त्राञ्चलमवलम्बमानस्ताडितः । निरस्तश्च शिरोरुहेषु लगन् । पादप्रणतस्तु पर्याकुलतया नावलोकितोऽपि । निर्भर्त्सितश्च परिष्वजमान इति । अत्र भगवतः पिनाकपाणेर्बाणानलभस्मीकृतोद्भटदानवेन्द्रस्य प्रभावातिशयद्योतको वीररसोऽङ्गीकृतः । क्षिप्तो हस्तावलग्न इत्यादिना दनुजेन्द्रदयितानामीर्ष्यारूपो विप्रलम्भशृङ्गारः, साश्रुनेत्रोत्पलाभिरित्यनेन प्राणेश्वरशोकात्मा करुणरसश्चाङ्गम् । न चानयोरन्योन्यं विरोधः । अन्यपरत्वात् । यथाहि महर्षीणामाश्रमेष्वहिनकुलादीनाम् । यदुक्तम्—'विवक्षिते रसे लब्धप्रतिष्ठे तु विरोधिनाम् । वाच्यानामङ्गभावं च प्राप्तानामुक्तिरुच्छला ॥' विशेषतस्तु प्रस्तुतपरिपोषकारिणावेतौ । ईर्ष्यारूपस्तावदत्र विप्रलम्भशृङ्गारः करुणमेव पुष्णाति । यदुक्तं—

Digitized by Microsoft®

"प्रकृतिरमणीयाः पदार्थाः शोचनीयतां प्राप्ताः प्रागवस्थाभाविभिः संस्मर्यमाणैर्विलासै-रधिकतरं शोकावेशमुपजनयन्ति । यथा—'अयं स रसनोत्कर्षी पीनस्तनविमर्दनः । ना-भ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥" इति । इह हि यास्तत्तदुपायपरिचर्याचतुरेण कान्तेन कुपिताः प्रसादितास्ता एव दनुजराजराजीवलोचनाश्चिरमननुभूतान्यविषयतया विषद्यसनेऽपि मानिनीमानदर्शनं दर्शयन्त्यो दारुणदहनेन परिभूयन्त इति प्रतीतेः करु-णोऽपि प्रतिपक्षगतस्त्रिपुररिपोरभिनन्दवन्द्योदयस्य वीरं पुष्णाति । अत्रासूयाश्रुणी व्य-भिचारिसात्त्विकौ भावौ प्रकर्षेण रसतां गतौ । यदुक्तम्—'निर्वेदोऽथ तथा ग्लानिः शङ्कासूयामदश्रमाः । आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ॥ व्रीडा चपलता हर्ष आवेगो जडता तथा । गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥ सुप्तं विबोधो हर्षश्चाप्यवहित्थमथोग्रता । मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥ त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः । त्रयस्त्रिंशदमी भावाः प्रयान्ति रससंस्थितिम् ॥ स्तम्भः स्वे-दोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः । वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥' अलंकारश्च क्षिप्तो हस्तावलग्न इत्यादयैकैकवाक्यप्रतिपादितशराभिसापराधकामिवृत्तान्ते-नार्थश्लेषेणानुप्राह्योपमा । अर्थश्लेषलक्षणम्—'एकार्थवाचकानामेव शब्दानां यत्रानेको-ऽर्थः सोऽर्थश्लेषः' इति । तेन 'यत्रैकमनेकार्थैर्वाक्यं रचितं पदैरनेकस्मिन् । अर्थे कुरुते निश्चयमर्थश्लेषः स विज्ञेयः ॥' इति भट्टरुद्रटेन यल्लक्षणं कृतं तच्छब्दश्लेषमेव प्राप्नोति । अनेकार्थानां हि शब्दानामन्वयव्यतिरेकाभ्यां तस्य प्रवृत्तिनिवृत्ती । यथा—'तवैष वि-द्रुमच्छायो मरुमार्ग इवाधरः । करोति कस्य नो वाले पिपासाकुलितं मनः ॥' अत्र हि प्रवालशब्देन श्लेषो न भवति । अभग्नपदो यथा—'तव तन्वि कुचावेतौ भूधराविव रा-जतः । अन्योन्यमण्डलाक्रान्तौ संधिहीनौ करार्थिनौ ॥' अत्रापि परिणाहान्तरहस्त-शब्दैः श्लेषो न भवति । अर्थश्लेषे तु क्षिप्तो हस्तावलग्न इत्यादिषु प्रेरितः करव्यतिषक्त इत्यादिभिः पदैः श्लेषो न निवर्तते । संकरश्चायम् । यदुक्तम्—'मिश्रालंकाराणां तिल-तण्डुलवच्च दुग्धजलवद्वा । व्यक्ताव्यक्तांशत्वात्संकर उत्पद्यते द्वेधा ॥' अत्रापि वाक्या-र्थस्यैव प्राधान्यम्, संकीर्णस्य रसादेश्चाङ्गत्वम् । तेन रसवदलंकारस्थितिः पूर्ववदेव । यच्च प्रागवीररसस्याङ्गत्वं प्रतिपादितं तद्विप्रलम्भकरुणावेक एव । आर्द्रशब्दो नवोद्भिन्नकिस-लयादौ प्रसिद्धः । अत्र तु स्वार्थे स्खलद्गतित्वादमूर्तस्यापराधस्य नूतनत्वं लक्षयति । तेन चातिदुःसहत्वं व्यङ्ग्यम् । अत एवार्द्रापराधः कामी वह्निसमानत्वेन प्रतिपादितः । संतापातिशयजनकत्वात् । लक्षणा चेयं वृत्तिः । यदुक्तं काव्यप्रकाशे—'मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् । अन्योऽर्थो लक्ष्यते यत्सा लक्षणा रोपिता क्रिया ॥' इयमेव च विदग्धवक्रोक्तिरिति स्पृहणीया कवीनाम् । वाचकलाक्षणिकव्यञ्जकानां श-ब्दानामभिधा लक्षणा व्यक्तिरिति तिस्रो वृत्तयः । अर्था अपि तावन्त एव वाच्यल-क्ष्यव्यङ्ग्या इति । आददानोऽशुकान्तमित्यत्र 'आङो दोऽनास्यविहरणे' इत्यात्मनेपदम् । तेन व्यादानं मुखप्रसारणे वर्तत इति दोषो नाशङ्कनीयः । गृह्णन्केशेष्वित्यत्र क्रियाया-

त्रिपुरयुवतय एव कर्मत्वेनावधार्याः, न तु केशाः । यथा—'गृहीत इव केशेषु–' इति । आलिङ्गन्योऽवधूत इत्यत्र चरणनिपतितोऽपि दृष्टिमात्रेणापि न संभाव्यते स कथमालिङ्गितुमिच्छतीत्यर्थः । कस्यांचित्कृते कृत्वा(?) प्रतिपादितमुन्मादितः कामातुरस्तस्यालिङ्गनमुचितमिति समाधानम् । अस्य कवेस्तावदन्यः कोऽपि प्रबन्धो न दृश्यते । तन्नूनमनयोः श्लोकयोः संकीर्णरसोपनिबन्धोऽनेन दर्शितः । अग्रे सर्वत्र शृङ्गाररसस्यैवोपनिबन्धनीयत्वात् । संकीर्णरसोपनिबन्धस्तु निकषो रसकवीनाम् । किं चामीषां श्लोकानां तावती रसोपकरणसामग्री यावती प्रबन्धेषु भवति । अत एवोक्तं भरतटीकाकारैः—'अमरुककवेरेकः श्लोकः प्रबन्धशतायते' इति ॥

आलोलामलकावलीं विलुलितां बिभ्रच्चलत्कुण्डलं
किंचिन्मृष्टविशेषकं तनुतरैः स्वेदाम्भसः[1] शीकरैः ।
तन्व्या यत्सुरतान्ततान्तनयनं वक्त्रं रतिव्यत्यये
तत्त्वां पातु चिराय किं हरिहरस्कन्दादिभिर्दैवतैः[2] ॥ ३ ॥

तत्कृशाङ्ग्याः पुरुषायितसंभोगमध्ये खेदालसलोचनं मुखं त्वामनेककालं त्रायताम् । किं वैकुण्ठशितिकण्ठषण्मुखप्रमुखैर्नाकिभिः । अपि तु न किमपि । नहि ते रसातिरेकोन्मत्तपुरुषायितसंरब्धविदग्धनितम्बिनीवदनचन्द्रविरहदहनदन्दह्यमानं रक्षितुं क्षमन्ते । एतेनानुरागविह्वला तरुणी तवाभिलाषोचितमानुगुण्येन संपादयत्विति यावत् । यदुक्तम्—"पातु वो दयितामुखम्' इति सांमुख्ये ।" किं कुर्वाणम् । चञ्चलां चूर्णकुन्तलमालां विलुप्तरचनाविशेषां दधानम् । पुनश्च कीदृशम् । कम्पमानकर्णाभरणम् । भूयः कथंभूतम् । स्तोकोत्पुंसिततिलकम् । कैः । सूक्ष्मसूक्ष्मैः श्रमसात्त्विकसंकीर्णैर्जलबिन्दुभिः । अनुशयाक्षेपोऽलंकारः । 'मुखेन्दौ तव सत्यस्मिन्नितरेण किमिन्दुना ।' परमत्र वाक्यार्थस्य न प्राधान्यम् । किं तु रसस्यैव । नापि रसवदलंकारव्यवहारः । अपि तु रसोऽलंकार्यः । अलंकारश्च यथार्थ एव । 'नायकस्य संतताभ्यासात्परिश्रममुपलभ्य रागस्य चानुपशममनुमता च तेन तमवपात्य पुरुषायितेन साहायकं दद्यात् ।' इति वात्स्यायनः । अत्र प्रगल्भा नायिका । 'यौवनान्धा स्मरोन्मत्ता प्रगल्भा दयिताङ्गके । विलीयमानेवानन्दाद्रतारम्भेऽप्यचेतना ॥' परित्यक्तव्रीडा चेयम् । यदुक्तम्—'एवमन्येऽपि परित्यक्तव्रीडायत्नेन वैदग्ध्यप्रागल्भ्यप्राया प्रगल्भा व्यवहारा वेदितव्याः ।' संभोगशृङ्गारो रसः । यदुक्तम्—'अनुकूलौ निषेवेते यत्रान्योन्यं विलासिनौ । दर्शनस्पर्शनादीनि स संभोगो मुदान्वितः ॥' शृङ्गारस्य सामान्यलक्षणमेतत्—'रम्यदेशकलाकालवेषभोगादिसेवनैः । प्रमोदात्मा रतिः सैव यूनोरन्योन्यरक्तयोः ॥ प्रकृष्यमाणः शृङ्गारो मधुराङ्गविचेष्टितैः । अयोगो विप्रयोगश्च संयोगश्चेति स त्रिधा ॥' रसस्यैवाथ सामान्यलक्षणमेतत्—'विभा-

---

१. 'स्वेदाम्भसां जालकैः' इति शृङ्गारदीपिका. २. 'हरिहरब्रह्मादिभिर्दैवतैः' इति शृङ्गारदीपिका.

Digitized by Microsoft ®

वैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः । आनीयमानः स्वाद्यत्वं स्थायिभावो रसः स्मृतः॥' स च व्यङ्ग्यव्यञ्जकभावेन भाव्यभावकभेदेन वा चर्व्यमाणात्मकोऽसंलक्ष्यक्रमध्वनिसंज्ञितः। यदुक्तं ध्वनिकृता—'यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ । व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितुः ॥' अस्ति ध्वनिः । स चाविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति द्विविधः । 'अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम् । अविवक्षितवाच्यस्य ध्वनेर्वाच्यं द्विधा मतम् ॥ असंलक्ष्यक्रमयोत्यः क्रमेण द्योतितोऽपरः । विवक्षिताभिधेयस्य ध्वनेरात्मा द्विधा मतः ॥ रसभावतदाभासभावशान्त्यादिरक्रमः । ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थितः ॥ [क्रमेण परिपाट्या यः स्वानुस्वानाभसंनिभः । शब्दार्थशक्तिमूलत्वाद्विधा सोऽपि व्यवस्थितः॥' यदाह भरतः—'बहवोऽर्था विभाव्यन्ते वागर्थाभिनयाश्रयाः । अनेन यस्मात्तेनायं विभाव इति संस्मृतः॥ वागङ्गसत्त्वाभिनयैरास्वादयो विभाव्यते । वागङ्गोपाङ्गसंयुक्तः सोऽनुभाव इति स्मृतः ॥' विविधमाभिमुख्येन रसं चरन्तीति व्यभिचारिणः । विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणैः स्थायी रत्यादिको भावो जनितोऽनुभावैः कटाक्षभ्रूभुजाक्षेपादिभिः सहकारिभिरुपचितो रसः । यदाह भरतः—'सर्वथा नास्त्येव हृदयहारिणः काव्यस्य स प्रकारो यत्र प्रतीयमानमर्थसंस्पर्शनसौभाग्यं तदिदं काव्यरहस्यं परम्' इति ॥]

परपुरुषप्रथमानुरागिणीं कामपि नायिकां रहः सहचरी प्राह—

अलसवलितैः प्रेमार्द्रार्द्रैर्मुहुर्मुकुलीकृतैः
क्षणमभिमुखैर्लज्जालोलैर्निमेषपराङ्मुखैः ।
हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणैः
कथय सुकृती कोऽयं मुग्धे त्वयाद्य विलोक्यते ॥ ४ ॥

हे मुग्धे, कथय क एष पुण्यराशिर्भवत्या वीक्ष्यते । कदा । अद्य । कोऽभिप्रायः । अद्यप्राक्षोऽप्येवं त्वया नावलोकित इति । कैः । ईक्षणैः । भावभेदाद्बहुवचनम् । किं कुर्वद्भिरिव । उद्गिरद्भिरिव । किं तत् । हृदयनिहितं भावाकूतमभिलाषोचितं संकल्पविशेषम् । वयःसंधौ हि नायिकाश्चिरसंचितं लज्जासंवृतं बहुतरमभिलाषं हृदये धारयन्ति । यश्च येनाभ्यातो भवति स तमुद्गिरतीति युक्तमेव । पुनः किंविशिष्टैः । अलसवलितैरसौष्ठवतिरश्चीनैः । मन्थरतिर्यग्भूतैरिति भावः । यथा कश्चित्केनापि लोभेन स्थानमत्यक्तुकाम इतरेण कार्यवशाद्बलात्कारेण प्रेर्य उत्थाप्यते न च प्राञ्जलो गच्छति तथेक्षणान्यपि हि स्फारोत्फुल्लानि भूत्वा प्रियदर्शनरसपानोद्युक्तानि साध्वसेन प्रसह्य साचीक्रियन्ते । पुनः किंभूतैः । प्रेमार्द्रार्द्रैः प्रीतिस्निग्धस्निग्धैः। यदाह भगवान्भरतः स्थायिभावदृष्टीनामुपक्रमे—'व्याकोशा स्नेहमधुरा स्मितपूर्वाभिभाषिणी । अपाङ्गभ्रूकृता दृष्टिः स्निग्धेयं रतिभावजा ॥' पुनः कीदृशैः । मुहुर्मुकुलीकृतैर्दर्शनसुखविशेषानुभवेन वारंवारमर्धनिमीलितैः । यथा क-

१. कोष्ठकान्तःस्थितः पाठः पुस्तकान्तरे नास्ति.

Digitized by Microsoft®

श्चिदभिलषितं वस्तु चिरप्राप्यमास्वाद्य नितान्तसौहित्येन मान्द्यमाप्नोति । न तु निमीलितैरेव । निमेषपराङ्मुखैरित्यत्रानुपपद्यमानत्वात् । मुनस्तर्षातिरेकेण क्षणमभिमुखैः । न तु चिरम् । यतस्त्रपातरलैः । कोऽभिप्रायः । आभिमुख्ये प्रियस्यानुरागरूपचेष्टाविशेषात्(षं) किंचिदुपलभ्य लज्जालोलानि जातानीत्युभयानुरागः । नहि निरनुरागे पुंसि नायिकानां दृष्टयो लज्जामनुभवन्ति । पुनः किंभूतैः । दर्शनरसान्तरायकातर्येण निमेषपराङ्मुखैः । अनुभवैकवेद्याश्चैवंविधा दृष्टयः । यथास्मत्पूर्वजरूपवर्णने नाचिराजस्य—'सत्रासा इव सालसा इव लसद्गर्वा इवार्द्रा इव व्याजिह्मा इव लज्जिता इव परिभ्रान्ता इवार्ता इव । लद्रूपे निपतन्ति कुत्र न जगद्देवप्रभो सुभ्रुवां वातावर्तननर्तितोत्पलदलद्रोणि द्रुहो दृष्टयः ॥' लयेति पदं न युष्मदर्थमात्रम् । किं त्वर्थान्तरसंक्रमितवाच्यम् । क एवंविधः पुण्यराशिरस्ति यस्त्वया जगदेकस्पृहणीयसौन्दर्यसंपदानेकाभ्युपायेनाशक्यापहारचित्तत्वान्निर्विकारया सस्पृहमवलोक्यते । अत एव सुकृतीति । मुग्धे इति पदस्य पुनरयमभिप्रायः—यदित्थं मुग्धा त्वं यदेवमभिमतं जनं स्वच्छन्दमवलोकयसि । एवं हि लोकैः सूक्ष्मेङ्गितज्ञैरुपलक्षिष्यसे । तस्मात्प्रच्छन्नमास्व अहमेव ते समीहितं संपादयिष्यामीति । अत्र कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नोऽर्थशक्तिव्यङ्ग्यः । यदेनमेवमवलोकयसि तत्त्वमस्मिन्ननुरक्तेत्यनुमानालंकारः प्रथमानुरागदर्शनात्मकसंभोगश्रृङ्गारस्याङ्गम् । यदुक्तम्—'अर्थशक्तेरलंकारो यत्राप्यन्यः प्रकाशते । अनुमानोपमाव्यङ्ग्यः स प्रकारोऽपरो ध्वनेः ॥ ध्वन्यात्मभूते श्रृङ्गारे समीक्ष्य विनिवेशितः । रूपकादिरलंकारवर्गो याति यथार्थताम् ॥' यथा—'लावण्यकान्तिपरिपूरितदिङ्मुखेऽस्मिन्स्मेरेऽधुना तव मुखे तरलायताक्षि । क्षोभं यदेति न मनागपि तेन मन्ये सुव्यक्तमेव जडराशिरयं पयोधिः ॥' अत्र मुखं चन्द्र एवेति रूपकम् । अनुमानस्योदाहरणं चैतत्—'वचनमुपचारगर्भं दूरादुद्गमनमासनं सकलम् । इदमद्य मयि यथा ते तथासि नूनं प्रिये कुपिता ॥' परमेष वाच्योऽलंकारः । अत एवोक्तम्—'शरीरकरणं येषां वाच्यत्वेन व्यवस्थितम् । तेऽलंकाराः परां छायां यान्ति ध्वन्यङ्गतां गताः ॥' नाट्यालंकारस्तु हावो नाम । 'हेवाकस्तु सश्रृङ्गारो भावोऽक्षिभ्रूविलासकृत् ।' इयं स्वस्त्री न भवति । नाप्यनुरक्तः पुरुषो वक्ता । कोऽयं सुकृतीत्यनुपपद्यमानत्वात् । दूती चात्र निसृष्टार्था । यदुक्तम्—'निसृष्टार्था परिमितार्था पत्रहारिणी स्वयंदूती भार्यादूती मूकदूती बालदूती चेति दूतीविशेषाः । नायकस्य नायिकायाश्च यथामनीषितमर्थमुपलभ्य स्वबुद्ध्या कार्यसंपादिनी निसृष्टार्था । सा प्रायेण संस्तुतभाषणयोर्नायकनायिनाकयोरप्रयुक्ता । संस्तुतसंभाषणयोरपि कौतुकादनुरूपाविमौ युक्तौ परस्परस्येति' । प्रथमानुरागलक्षणं चैतत्—'तत्संमुखी तं न वीक्षते । प्रेक्षिता व्रीडां दर्शयेत् । रुच्यमात्मनोऽङ्गमन्यापदेशेन प्रकाशयति । प्रमत्तं प्रच्छन्नं नायकमतिक्रान्तं च वीक्षते । पृष्टा च किंचित्ससितमव्यक्ताक्षरमनवसितार्थं मन्दमन्यतोमुखी कथयति । तत्समीपे चिरं स्थानमभिनन्दति । दूरे स्थिता पश्यतु मामिति मन्यमाना परिजनं समुखविकारमाभाषते । तं च देशं न मुञ्चति । य-

Digitized by Microsoft ®

किंचिदृष्ट्वा विहसितं करोति । तत्र कथामवस्थानार्थमनुबध्नाति । बालस्याङ्कगतस्य चुम्बनमालिङ्गनं च करोति । परिचारिकायास्तिलकं च रचयति । परिजनानवष्टभ्य तास्ताश्च लीला दर्शयति । तन्मित्रेषु विश्वसिति । वचनं तेषां बहुमन्यते करोति च । तत्परिचारकैः सह प्रीतिं संकथां द्यूतं चारभते । स्वकर्मसु चैतान्प्रभविष्णुरिव नियुङ्क्ते । तेषु च नायकसंकथामन्यस्य कथयत्सवहिता तां शृणोति । धात्रेयिकया प्रोत्साहिता नायकस्योदवसितं प्रविशति । तामन्तरा कृत्वा तेन सह द्यूतं क्रीडामालापं चायोजयितुमिच्छति । अनलंकृता दर्शनपथं परिहरति । कर्णपत्रमङ्गुलीयकं स्रजं वा तेन याचिता स धीरमिव गात्रादवतार्य सख्या हस्ते ददाति । तेन च दत्तं नित्यं धारयति । अन्यवरसंकथासु विषण्णा भवति । तद्विपक्षैश्च सह न संसृज्यत इति । 'दृष्ट्वैतान्भावसंयुक्तानाकारानिङ्गितानि च । कन्यायाः संप्रयोगार्थं तांस्तान्योगान्विचिन्तयेत् ॥' सा च मुग्धा नायिका । 'मुग्धा नववयःकामा रतौ वामा मृदुः क्रुधि ।' यथा—'दृष्टेः सालसतां बिभर्ति न शिशुक्रीडासु बद्धादरा श्रोत्रे प्रेषयति प्रवर्तितसखीसंभोगवार्तास्वपि । पुंसामङ्कमपेतशङ्कमधुना नारोहति प्राग्यथा बाला नूतनयौवनव्यतिकरावष्टभ्यमाना शनैः ॥' 'नर्मस्फोटस्तु भावानां सूचिताल्परसो लवैः' इत्यनेन नर्मस्फोटः । यथा मालतीमाधवे मकरन्देन माधवस्य मालत्यामनुरागो लक्षितः—'गमनमलसं शून्या दृष्टिः शरीरमसौष्ठवं श्वसितमधिकं किं त्वेतत्स्यात्किमन्यदितोऽथवा । भ्रमति भुवने कंदर्पाज्ञा विकारि च यौवनं ललितमधुरास्ते ते भावाः क्षिपन्ति च धीरताम् ॥' प्रथमानुरागश्लोकोऽप्येष क्रमौचित्यात्प्रथमं लिखितः ॥

अङ्गुल्यग्रनखेन बाष्पसलिलं विक्षिप्य विक्षिप्य किं
तूष्णीं रोदिषि कोपने बहुतरं फूत्कृत्य रोदिष्यसि ।
यस्यास्ते पिशुनोपदेशवचनैर्मानेऽतिभूमिं गते
निर्विण्णोऽनुनयं प्रति प्रियतमो मध्यस्थतामेष्यति ॥ ५ ॥

कुपितनायिकाप्रसादने साम दानं भेदः प्रणतिरुपेक्षा रसान्तरं चेति षड्डपायाः । तन्मध्येऽत्र भेद एव । इह हि नायकेनानुप्रविश्य शिक्षिता सखी वक्री वक्ष्यमाणप्रकारेण मानत्याजनाय नायिकां भीषयति । हे कोपने ईर्ष्यावति, अङ्गुल्यग्रनखेन बाष्पसलिलमपनीयापनीय लाघवलज्जातिशयेन मानाध्मातहृदया किं कण्ठार्धनिरुद्धगद्गदं रोदिषि । किंशब्दोऽल्पार्थः । न तु हेतुप्रेरणार्थः । मानरूपस्य हेतोः स्वयं ज्ञातत्वात् । आत्मीयचरितेन प्रचुरतरमुच्चैःशब्दं रोदिष्यसि । यस्यास्तव परगृहोपप्लावकानां पिशुनानां शिक्षाकर्णजापैर्माने मर्यादामतिक्रान्ते विफलप्रसादनोपायतया निर्वेदं यावत्प्राप्तो बहुमानं प्रति प्रियतम औदासीन्यं गमिष्यति । न त्वन्याङ्गनाम् । यस्मात्त्वं पिशुनोपदेशेषु लग्नासि । तस्यापराधगन्धोऽपि नास्तीति भावः । विक्षिप्य विक्षिप्येति वीप्सया बाष्पनैरन्तर्यमुक्तम् । अत्र प्रियतमोऽथ च निर्विण्ण इति नायिकायाः सविशेषं भयोत्पादनकारणमु-

Digitized by Microsoft®

क्तम्। न तु निर्वेदो व्यभिचारिभावः। तस्य शृङ्गारे निषिद्धत्वात्। शृङ्गारश्चात्र विप्रलम्भ एव। यदुक्तम्—'विप्रलम्भस्तु विश्लेषो रूढविस्रम्भयोर्द्विधा। मानप्रवासभेदेन मानो हि प्रणयेर्ष्ययोः॥ तत्र प्रणयमानः स्यात्कोपवश्यतया द्वयोः। स्त्रीणामीर्ष्याकृतो मानः स्यादन्यासङ्गिनि प्रिये॥ श्रुते चानुमिते दृष्टे श्रुतिस्तत्र सखीमुखात्। उत्सुप्रायितभोगाङ्कगोत्रस्खलनकल्पितः॥ त्रिधानुमानिको दृष्टः साक्षादिन्द्रियगोचरः।' नं च निर्विण्णशब्देनैव निर्वेदव्यभिचारभावप्रतीतिः। रसादीनां वाच्यत्वाभावात्। यदुक्तम्—'तथा हि। वाच्यत्वं तस्य शब्दनिवेदितत्वेन वा स्याद्विभावादिप्रतिपादनमुखेन वा। पूर्वस्मिन्पक्षे स्वशब्दनिवेदितत्वाभावे रसादीनामप्रतीतत्वप्रसङ्गः। न च सर्वत्र तेषां स्वशब्दनिवेद्यत्वम्। यत्रापि तदस्ति तत्रापि विशिष्टविभावादिप्रतिपादनमुखेनैषां प्रतीतिः। स्वशब्देन सा केवलमनूद्यते। न तु तत्कृतैव सा। विषयान्तरे तस्या अदर्शनात्। न हि केवलशृङ्गारादिशब्दमात्रभाजि विभावादिप्रतिपादनरहिते काव्ये मनागपि रसवत्त्वप्रतीतिः। केवलं स्वाभिधानमात्रादप्रतीतिः। तस्मादन्वयव्यतिरेकाभ्यामभिधेयसामर्थ्याक्षिप्तत्वमेव रसादीनाम्। न त्वभिधेयत्वं कथंचिदिति। एवंविधस्य रसध्वनेरुपनिबन्धक्षमा अमरुकप्राया एव महाकवयः। यदुक्तमभिनवगुप्तपादैः—'प्रतीयमानानुप्राणितकाव्यनिर्माणनिपुणप्रतिभाभाजनस्यैव महाकविव्यपदेशः। अन्यथा व्युत्पत्त्यभ्यासयोर्मध्ये प्रधानभूतया प्रतिभयापि कविरेवोच्यते। यदुक्तम्—'प्रज्ञा नवनवोल्लेखशालिनी प्रतिभा मता। तदनुप्राणनाजीवद्वर्णनानिपुणः कविः॥" अलंकारश्चात्राप्यनुमानम्। यदुक्तम्—'यत्र बलीयः कारणमालोक्याभूतमेव भूतमिति। भावीति वा तथान्यत्कथ्येत तदन्यदनुमानम्॥' यथा—'वहति यथा मलयमरुद्यथा च हरितीभवन्ति विपिनानि। प्रियसखि तथैष न चिरादेष्यति तव वल्लभो नूनम्॥' परमसौ वाच्यः। वाच्यो व्यङ्ग्योऽप्यलंकारो रसस्याङ्गं भवतीत्याचार्याः। गुणस्तु प्रसाद एव। अत एवात्र यमकादयो निषिद्धाः। 'ध्वन्यात्मभूते शृङ्गारे यमकादिनिबन्धनम्। शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः॥'

दत्तोऽस्याः प्रणयस्त्वयैव भवतैवेयं चिरं लालिता
दैवादद्य किल त्वमेव कृतवानस्या नवं विप्रियम्।
मन्युर्दुःसह एव यात्युपशमं नो सान्त्ववादैः स्फुटं
हे निस्त्रिंश विमुक्तकण्ठकरुणं तावत्सखी रोदितु॥ ६॥

अत्र नायकं प्रति मानिन्याः सखी वक्ती। त्वयैवास्याः प्रणयो बहुमानो दत्तः। न पुनरियं मुग्धा बहुमानोत्पादनाय प्रत्यभियोक्तुं जानाति। अन्यच्च भवतैवेयं चिरं लालिता। न पुनरनया लालनकारणं किंचिदारब्धम्। अत एव दैवात्, न बुद्धिपूर्वकमद्य पुनस्त्वमस्या नवं व्यलीकं कृतवान्। यः खलु यस्याः स्वयं प्रणयं ददाति, स्वयं च

---

१. 'भवता सेयं' इति शृङ्गारदीपिका. २. 'एष' इति शृङ्गारदीपिका.

Digitized by Microsoft®

प्रेमातिरेकेण लालयति, न तस्याः प्रतिकूलं बुद्धिपूर्वकमारभते । तत्रापि किलशब्दप्रयोगः । कोऽर्थः । विप्रियं विप्रियमिति श्रूयते न हि भवान्वस्तुतो विप्रियं करोतीति ज्ञातापराधेऽपि नायके नायिकाया धृत्युत्पादनम् । एवं सति मन्युरेव मानजनितो दुःखविशेष एव दुःसहो न सामवादैरुपशमं याति । स्फुटमेतत् । तस्मात् हे निर्घृण निरनुक्रोश, विमुक्त उच्चैःशब्दत्वात्कण्ठो यस्मिन्नसौ विमुक्तकण्ठः स चासौ करुणो यथा भवत्येवं तावत्सखी रोदितु । विमुक्तकण्ठविषये करुणा यत्रेति वा समासः । कोऽभिप्रायः । एवं रोदितुं यदि न प्राप्स्यति तदा मन्युनाध्मातमस्या हृदयं परिपाकोच्छ्वसितबीजविदीर्णदाडिमफलन्यायेन स्फुटिष्यति । तस्मादुच्चैःशब्दं रोदितुं देहि । पश्चाद्यथा जानासि तथा प्रसादय । अथ च यदि रुदित्वा जीवन्ती निर्वक्ष्यति तदा प्रसादनं घटत इत्यसूया । विषमोऽलंकारः । यदुक्तम्—'कार्यस्य कारणस्य च यत्र विरोधः परस्परं गुणयोः । तद्वत्क्रिययोरथवा संजायेतेति तद्विषमम् ।' यथा—'आनन्दममन्दमिमं कुवलयदललोचने ददासि त्वम् । विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे ॥'

वारंवारमनुनीयमानामपि प्रौढेर्ष्यावशादशिथिलमानग्रन्थिं मनस्विनीं प्रति प्रधानसखी प्राह—

लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो
निराहाराः सख्यः सततरुदितोच्छूननयनाः ।
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकै-
स्तवावस्था चेयं विसृज कठिने मानमधुना ॥ ७ ॥

हे कठिने, बहिः प्राणदयित आस्ते । किं कुर्वन् । शून्यतासूचकचिन्तासंतानसमुचितचेष्टानुभावेनावनतो भूमिं लिखन् । अकृते प्रसादे द्वारं न मुञ्चतीत्यर्थः । तथा च वर्तन्तेऽनशनाः सख्यः । पुनः कीदृश्यः । निरन्तरबाष्पेणोच्छूने लोकोक्त्या उच्छ्वसिते नयने यासां ताः सततरुदितोच्छूननयनाः । अत्र नायिकाया अमङ्गलचिन्तनमेव हेतुः । किं च, पञ्जरशुकैरपि हसितपठितं परित्यक्तम् । तथापि तवावस्था चेयम् । निरुद्धबाष्पारुणितनेत्राभ्यामानिःश्वासकदर्थ्यमानाधरस्फुरणादिमन्युचेष्टाभिरधृष्या तथैव तिष्ठसीत्यर्थः । तस्मान्मानं परित्यज । कदा । अधुनापि । अपिशब्दोऽध्याहार्यः । एतावतीमपि दशां दुर्जनोपहसनीयां प्राप्ता मानं न मुञ्चसीति प्रतीयमानत्वात् । यस्याः कृते सख्योऽपि पञ्जरशुका अथाहारं हसितपठितं च परित्यजन्ति सा त्वं कथमिव प्रियाय न प्रतिभाषसे । प्रियोऽपि यस्यास्तव प्राणदयितस्तदलमतिमानेनेति भावार्थः । अत एव कठिने इति संबोधनम् । अत्रार्थशक्त्युद्भवः सहोक्तिरलंकारः । नायिकायामाहारादिकं कुर्वत्यां सर्वेऽपि कुर्वन्ति, निवर्तमानायां च निवर्तन्त इति प्रतीतेः । सुप्तिङ्व्यङ्ग्यमात्रं चात्र कर्मलकाराभ्यामेवोद्भासितम् । अत्र न लिखतीति, अपि तु लिखन्निति प्रसादनपर्यन्तम् । आस्ते इति, न ह्यासित इति । भूमिमिति, न भूमाविति । नहि बुद्धिपूर्वकं

Digitized by Microsoft®

किंचिल्लिखतीति तिङ्सुब्विभक्तीनां व्यङ्ग्यम् । हसितपठितमित्यत्र 'सर्वो हि द्वन्द्वो विभाषैकवद्भवति' इत्येकवचनम् । अत्र श्लोके त्वया तस्यापराधः सोढव्य इति क्वापि नोक्तम् । एतच्च वक्तुः कौशलम् । अपराधस्मारणे हि मानिनी प्रतिनायिकां स्मरति । ततश्चाधिकं कुप्यति । न चैवंविधः प्रसाधननिर्बन्धः पूर्वमस्यां केवलेन दाक्षिण्येन, अपि तु लोकोत्तरेण प्रेम्णा च । उक्तम्—'[1]अक्खडइ पिआ हिअए अण्णं महिलाअणं रमन्तस्स । दिट्ठे सरिसम्मि गुणेऽसरिसम्मि गुणे अईसन्ते ॥'

अनेकनायिकाकमनीयनायकव्यलीकविलीयमानविलासां वरवर्णिनीं विदग्धवयस्या वक्ति—

नार्यो मुग्धशठा हरन्ति रमणं तिष्ठन्ति नो वारिता-
स्तत्किं ताम्यसि किं च रोदिषि मुधा तासां प्रियं मा कृथाः ।
कान्तः केलिरुचिर्युवा सहृदयस्तादृक्पतिः कातरे
किं नो बर्बरकर्कशैः प्रियशतैराक्रम्य विक्रीयते ॥ ८ ॥

अङ्गनास्वावद्बहिर्मुग्धा अन्तःशठास्तव रमणमपहरन्ति । निषिद्धा अपि न निवर्तन्ते । तत्किमिति मुधा ताम्यसि कस्माच्च रोदिषि । उभयमपि व्यर्थमित्यर्थः । एवं हि तासामभीप्सितं भवति । अत एव तासां प्रियं मा कृथा इति । तर्हि किं समयोचितमित्याह—कान्त इत्यादि । हे कातरे, किं न विक्रीयते । लक्षणया अनन्याधीनः किं न क्रियते । अनन्याधीनं हि वस्तु विक्रेतुं याति । कोऽसौ । पतिः । किंविशिष्टः । कान्तः सुन्दरः । क्रीडारसिकः । तरुणः सहृदयस्तादृगनिर्वचनीयचेतनः । किं कृत्वा । आक्रम्य । मुग्धशठाभ्य एव नायिकाभ्य आच्छिद्येत्यर्थः । कैः । प्रियशतैः । किंविशिष्टैः । [2]बर्बरकर्कशैः सोद्धुण्ठनर्मनिरनुक्रोशैः । यदुक्तं गोवर्धनाचार्येण—'अन्यमुखे दुर्वादो यः प्रियवदने स एव परिहासः । इतरेन्धनजन्मा यो धूमः सोऽगुरुसमुद्भवो धूपः॥' अत एव केलिरुचिर्न चासंभावितो वश्यतां याति । यतस्तादृक्सहृदयः । 'दक्षिणोऽस्यां सहृदयः' । अपमानितश्च नार्या विरज्यते । स पुनरुत्कृष्ट इति मया स्वयं मानमुत्सृज्य संगमयितुं कथं युज्यते पतिरिति लाघवलज्जाभीरुत्वेन कातरे इति संबोधनम् । प्रशंसामनोज्ञानुनयप्रवर्तिका चेयमुक्तिः । यः कान्त इत्यादि गुणस्पृहणीयो वारिताभिरप्यङ्गनाभिरपहियते स त्वयापराधोचितनिग्रहस्थानीयेन बर्बरकार्कश्येन विक्रेयकोटिमानीयते । तस्माद्युवतिषु धन्या त्वमिति प्रतीयमानत्वात्परिवृत्तिरलंकारः । बर्बरकर्कशं दत्त्वा पतिरपह्नियतामिति पर्यवसितत्वात् । यदुक्तम्—'युगपद्दानादाने अन्योन्यं वस्तुनोः क्रियेते

---

१. 'आस्खलति प्रिया हृदये अन्यं महिलाजनं रममाणस्य । दृष्टे सदृशे गुणे असदृशे गुणे अदृश्यमाने ॥' इति गाथासप्तशतीटीकायां (१।४४) छाया. २. 'बर्बरकर्कशैः परुषकठिनैः' इति शृङ्गारदीपिका.

Digitized by Microsoft ®

यत् । क्वचिदुपचर्येते वा प्रसिद्धितः सेति परिवृत्तिः ॥' यथा—'दत्त्वा दर्शनमेते मत्प्राणा वरतनु त्वया क्रीताः । किं त्वपहरसि मनो यद्दासि रणरणकमेतदसत् ॥'

कोपात्कोमललोलबाहुलतिकापाशेन बद्ध्वा दृढं
नीत्वा वासनिकेतनं दयितया सायं सखीनां पुरः ।
भूयोऽप्येवमिति स्खलन्मृदुगिरा संसूच्य दुश्चेष्टितं
धन्यो हन्यत एव निह्नुतिपरः प्रेयान्रुदत्या हसन् ॥ ९ ॥

हन्यते क्रीडाकमलादिना ताड्यते । कोऽसौ । प्रेयान् । कीदृशः । धन्य एव । कया । दयितया । किं कुर्वत्या । रुदत्या । किं कुर्वन् । निह्नुतिपरो हसन् । नाहं तत्र गत इत्यादिवचनेन मानोपशमं लक्षयित्वा स्मयमानः । किं कृत्वा हन्यते । वासनिकेतनं नीत्वा । वासनिकेतनमेव किं कृत्वा नीतः । कोपात्कोमललोलबाहुलतिकापाशेन बद्ध्वा दृढम् । बाहुलतिकाया लोलत्वं सात्त्विको भावः । लतिकेत्यनेन दुःसहविरहक्लेशकार्श्यम् । अत एव बन्धनव्याजादौत्सुक्येन स्वयंग्रहाश्लेषः । क्व । पुरः । कासाम् । सखीनाम् । कदा । सायम् । यदि मानमेव धृत्वाद्यतनीमपि रात्रिं प्रतिपालयिष्यामि तदा मा कदाचिदल-(य)मन्यत्र वर्त्स्यतीत्यौत्सुक्यप्रतिपादकः सायंशब्दप्रयोगः । अत एव लज्जापरित्यागद्योतकं सखीनां पुरः इत्युक्तम् । पुनः किं कृत्वा । व्यलीकं संसूच्य । कथमिति । भूयोऽप्येवमिति । अर्थादिदानींतनोऽपराधः सोढ इति लभ्यते । भूयोऽप्येवं करिष्यसीति वाच्ये यदर्धोक्तं तत्र रोषसात्त्विकसंकीर्णसंभ्रमहेतुको वाक्स्तम्भः कारणम् । अत एव स्खलन्मृदुगिरा । अहो अन्यदेव किमपि दयितायाः प्रभुत्वं यत्समकालमेव निग्रहप्रसादौ । नहि बाहुलतिकाबन्धनं विहाय कश्चिदन्यः प्रसादोऽस्ति । अत्र कविर्वक्ता । ईर्ष्यामानात्मकविप्रलम्भारम्भः संभोगशृङ्गारपर्यवसितो रसः । अत्रालंकारो रसनिर्वाहणैकतानहृदयेन कविनाल्पन्तं न निर्वाहं नीतः । यदाह ध्वनिकारः—'अत्र हि बाहुलतापाशेनेति रूपकमाक्षिप्तमनिर्व्यूढं च परं रसपुष्टये ।' अधीरा प्रगल्भा नायिका ॥

कश्चिद्देशान्तरगमनोपक्रमं विहाय यथापूर्वमवस्थितः केनचिदगमनकारणं पृष्टः प्राह—

याताः किं न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते
नो कार्या नितरां कृशासि कथयत्येवं सबाष्पे मयि ।
लज्जामन्थरतारकेण निपतत्पीताश्रुणा चक्षुषा
दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः ॥ १० ॥

भाविन्यावश्यके । निःसंदेह इति यावत् । मरणे उत्साहस्तया सूचितः । केन । हसितेन । अर्थाद्वैलक्ष्यजन्मना । किं कृत्वा । मां दृष्ट्वा । केन । चक्षुषा । न तु चक्षुर्भ्याम् ।

---

१. 'मोहनमन्दिरं' इति शृङ्गारदीपिका. २ 'स्वैरं' इति शृङ्गारदीपिका.

Digitized by Microsoft®

एष निर्दयहृदयो मामेवंविधां विहाय जिगमिषतीत्यसूयाजन्यावधीरणव्यञ्जकमत्रैकवचनमिति वचनध्वनिः। किंविशिष्टेन लज्जामन्थरतारकेण। अत्र मां त्यक्त्वा देशान्तरमसौ याति तदलमनुपादेयया मयेति लघुत्वसंभावनजन्या लज्जा। पुनः किंविशिष्टेन। निपतत्पीताश्रुणा निपतत्सत् पीतमपहृतमश्रु येन। प्राणैर्हि दुःखनिस्तारकामो न वाष्पमुत्सृजति। क्व सति। मयि सबाष्पे एवं कथयति सति। एवं किम्। हे सुन्दरि, याताः सन्तो भूयः किं न मिलन्ति। अपि तु मिलन्ति। तस्मात्त्वया मत्कृते चिन्ता न कार्या। यतो नितरां कृशासि। नह्येवंविधे कार्ये सचिन्तया वर्तितुं शक्यते। कार्यं तत्कालमापृच्छमानप्राणेश्वरविरहसंभावनासंभवमेव। प्रिये सबाष्पे स्वयं निपतत्पीताश्रुणा चक्षुषेत्यबाष्पा यदनुवृत्तिं परिजहार तत्र 'त्यक्तश्चात्मा का च लोकानुवृत्तिः' इति न्यायेन प्राणनिरपेक्षतैव कारणम्। अथवा अमङ्गलसूचनमश्रु प्रस्थानकाले न प्रकाश्यत इति प्रीत्यतिशयः। यथा—'अद्यापि तन्मनसि संप्रतिवर्तते मे रात्रौ मयि क्षुतवति क्षितिपालपुत्र्या। जीवेति मङ्गलवचः परिहृत्य कोपात्कर्णे कृतं कनकपत्रमनालपन्त्या॥' भविष्यत्प्रवासात्मको विप्रलम्भः। उत्तरालंकारः। यदुक्तम्—'उत्तरवचनश्रवणादुन्नयनं यत्र पूर्ववचनानाम्। क्रियते तदुत्तरं स्यात्प्रश्नादप्युत्तरं यत्र॥' उपायाक्षेपश्च। यदुक्तम्—'दुष्करं जीवितोपायमुपन्यस्योपरुध्यते। पत्युः प्रस्थानमित्याहुरुपायाक्षेपमीदृशम्॥'

सखीभिर्मानं शिक्षितापि कृतप्रियसंगमा काचिन्नायिका ताः प्रति प्राह—

तद्वक्त्राभिमुखं मुखं विनमितं दृष्टिः कृता पादयो-
[1]स्तस्यालापकुतूहलाकुलतरे श्रोत्रे निरुद्धे मया।
पाणिभ्यां च तिरस्कृतः सपुलकः स्वेदोद्गमो गण्डयोः
सख्यः किं करवाणि यान्ति शतधा [2]यत्कञ्चुके संधयः॥ ११॥

हे सख्यः, किं करवाणि। अपि तु न किमपि। क्वचिषये, यत्कञ्चुके संधयः शतधा यान्ति। दलन्तीत्यर्थः। यतो मानाभिव्यक्तये किं किं न मया कृतमित्याह—तस्य प्रियस्य वक्त्राभिमुखं सत्स्वमुखं विनमितं नम्रीकृतम्। दृष्टिः स्वपादयोर्न्यस्ता। अत्र तद्वक्त्राभिमुखं मुखं विनमितं दृष्टिः कृता पादयोरिति वाक्यद्वयेनापि दृदक्षारसस्यैव निषेधो बोद्धव्यः। अभिमुखमुखतया तद्दर्शनाभिलाषिणी दृष्टिर्निवारितेत्यर्थः। न तु प्रथमवाक्ये विवक्षारसनिषेधः शङ्कनीयः। द्वितीयवाक्ये तद्दर्शनोत्सुका दृष्टिः कृता पादयोरिति तच्छब्दसहितपदस्यान्वेषणीयत्वात् तृतीयवाक्ये विवक्षारससूचकचिह्नतिरस्काराच्च। यद्वा मुखविनमनेनैव दृष्टेः पादगमने सिद्धे दृष्टिः कृता पादयोरिति यदुक्तं तेन प्रेयानपाङ्गेनापि नावलोकित इत्यर्थः। पादयोरित्यत्र संबन्धपदाभावेन सखीषु वचनच्छलं व्यज्यते। तत्पादयोर्दृष्टिः कृतेत्यत्रापि प्रतीतिसंभवात्। न केवलमेतदेव कृतम्, तद्वच-

---

१. 'तत्सल्लाप' इति शृङ्गारदीपिका. २. मत्कञ्चुलीसंधयः' इति शृङ्गारदीपिका.

Digitized by Microsoft®

नश्रवणकौतुकचपले श्रोत्रे च कर्णकण्डूयनव्यपदेशेनाकुञ्चिते । अपरं च स्वविवक्षारससूचकः कपोलयोः सरोमाञ्चः स्वेदोद्गमो हस्ताभ्यामाच्छादितः । अत्रेदं प्रकर्षेण(?) प्रियविषये प्रीतिप्रकर्षे एव । मानाय नायिकया प्रयत्ने क्रियमाणेऽप्यवयवानां प्रियसंगमोत्सुकत्वात् । अत्राप्युत्तर एवालंकारः । यथा—'भण मानमन्यथा मे मौनं भ्रुकुटिं विधातुमहमसहा । शक्नोमि तस्य पुरतः सखि न खलु पराङ्मुखी भवितुम् ॥' यन्नाक्षेपश्च । यदुक्तम्—'यन्नाक्षेपः स यत्नस्य कृतस्यानिष्टवस्तुनि । विपरीतफलोत्पत्तेरानर्थक्योपदर्शनात् ॥' यथा—'गच्छेति वक्तुमिच्छामि त्वत्प्रियं मत्प्रियैषिणी । निर्गच्छति मुखाद्वाणी मा गा इति करोमि किम् ॥'

प्रहरविरतौ मध्ये वाह्नस्ततोऽपि परेण[1] वा
किमुत सकले याते वाह्नि प्रिय त्वमिहैष्यसि ।
इति दिनशतप्राप्यं देशं प्रियस्य यियासतो
हरति गमनं बालालापैः[2] सबाष्पगलज्जलैः ॥ १२ ॥

वासरशतप्राप्यं देशं प्रियस्य जिगमिषोः प्रस्थानं मुग्धा निषेधति । कैः । अश्रुगलज्जलैरालापैः । कथम् । इत्यमुना प्रकारेण । हे प्रिय, प्रथमप्रहरावसाने त्वमिहागमिष्यसि । अथवा मध्याह्ने । उत खित्तस्यादपि परेण । तृतीयप्रहरेणेत्यर्थः । अत्र 'विवक्षातः कारकाणि भवन्ति' इति करणे तृतीया । यथा—'समेन धावति', 'विषमेण धावति' इत्यादौ । अपिशब्दस्यायमभिप्रायः—हे निष्करुण, मध्याह्नादप्यनन्तरं बहिः स्थातुं न युज्यत इति । अत्र सप्तम्यन्तानां पदानामन्तरेऽस्य पदस्य तृतीयान्तत्वेनोपक्रमभङ्गो न दोष एव । अर्थस्यान्यथा प्रतीतेः । पददोष एवास्य रसकवेः क्वाप्यस्तु । यदुक्तमुपाध्यायेन—'पदविह्वलता क्वापि स्पृहणीया भवति रसकवीन्द्राणाम् । घनजघनस्तनमण्डलभारालसकामिनीनां च ॥' अनेनापि प्रश्नेन यदा नायकोऽनभ्युपगमनसूचकं मौनमेव जग्राह, तदा नायिका पुनराह—अनन्तरमाहोस्वित्सर्वस्मिन्नेव दिनेऽतिक्रान्ते । अत्र मौग्ध्येन नर्मसर्शिन्यां विरहासहिष्णुतायां तात्पर्यम् । अत एव रात्रौ व्यतीतायामुदिते स्विदागमिष्यतीति प्रयोगो न कृतः । विरहासहिष्णुतात्मकविप्रलम्भरसोत्कर्षहेतुर्जातिरलंकारः ॥

धीरं वारिधरस्य वारि किरतः श्रुत्वा निशीथे ध्वनिं
दीर्घोच्छासमुदश्रुणा विरहिणीं बालां चिरं ध्यायता ।

---

१. 'परेऽथवा' इति शृङ्गारदीपिका. २. 'वाक्यैः सबाष्पझलज्झलैः' इति शृङ्गारदीपिकासंमतः पाठः. 'सबाष्पाणि च तानि झलज्झलानि च तैः । सबाष्पगद्गदैरित्यर्थः ।' इति तद्व्याख्यानम्.

Digitized by Microsoft®

अध्वन्येन विमुक्तकण्ठमखिलां रात्रिं तथा क्रन्दितं
ग्रामीणैः पुनरध्वगस्य वसतिर्ग्रामे निषिद्धा यथा ॥ १३ ॥

अर्धरात्रे निर्भरमम्भोधरस्य वर्षतः स्तनितमाकर्ण्य दीर्घोत्कटश्वासमुत्कटबाष्पाम्बुना विरहिणीं मुग्धां विरहातिवाहनोपायेष्वनभिज्ञतया शङ्कनीयां गद्गदलोलमनिशं तदेकतानेन स्मरता पथिकेन समस्तामपि रात्रिमसंकोचितकण्ठस्वरं तथा रुदितं यथा ग्रामनिवासिभिर्भूयः पान्थस्य वासो ग्रामे निवारित इति । यदि मार्गे वहति तदा प्रचलति । यदि च लोको जाग्रद्भवति तदा वाङ्मिश्रणेनापि कियतीमपि विरहव्यथामतिवाहयति । निशीथे उभयस्याप्यभावादप्रतिविधानस्तपस्वी पान्थः शब्दान्तराभावात्केवलं नीरदनिनादमेव दुःश्रवं श्रुत्वा मुक्तश्वासोऽनुद्यमद्योतकमश्रुपातं विधाय क्रन्दितुमेवारब्धवान् । मेघवृष्टिर्दृष्टिप्रतिबन्धको बाष्पयोगश्चेत्यपरं गमननिरोधे कारणद्वयम् । वारिधरस्य, न तु वारिमुचः । वारिमुच इत्यनेन हि पदेन क्रमात्सलिलक्षयोऽपि संभाव्यते । न तु वारिधरस्येत्यनेन । अत एव सान्द्रसलिलसंपदाभाततया धीरं वारि किरत इति । बालां पूर्वाननुभूतविरहव्यथाम् । अखिलत्वं क्रन्दनविषयायाः पश्चिमाया एव रात्रेः । न तु सकलरात्र्यभिप्रायेण । अर्धरात्र एव मेघध्वनेः श्रुतत्वात् । ग्रामीणाः प्रायो नायिकानुरागविदग्धवक्रोक्तिविरहवेदनानर्मभङ्गिष्वनभिज्ञा भवन्ति । परं तैरप्यध्वगस्य वसतिर्ग्रामे निषिद्धा । 'ग्रामाद्यखञौ' । 'आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्' इति खस्थाने ईनादेशः । प्रवासात्मको विप्रलम्भः । कविर्वक्ता । अत्र न तथालंकारः कश्चिदुद्भावनायामवतरति । अस्मिन्काव्ये तथाविधा अलंकाराः प्रायशो न दृश्यन्ते । प्राणात्मकेन रसेनैव चमत्कारः परां कोटिमधिरोहति । यदुक्तमुपाध्यायेन—'स्वभावरमणीयानां पदार्थानामलंक्रिया । प्रत्युताच्छादकत्वेन न प्रकर्षाय जायते ॥'

कश्चित्तत्कालमागतो मानिनीं प्रत्याह—

कृतो दूरादेव स्मितमधुरमभ्युद्गमविधिः
शिरस्याज्ञा न्यस्ता प्रतिवचनवत्यानतिमति ।
न दृष्टेः शैथिल्यं मिलन इति चेतो दहति मे
निगूढान्तःकोपा कठिनहृदये संवृतिरियम् ॥ १४ ॥

हे कठिनहृदये, इयं निगूढान्तःकोपा तवाकारगुप्तिर्मम चेतो दहति । कथं संवृतिः । इत्यमुना प्रकारेण । प्राय ईर्ष्यास्मितेनापि यन्माधुर्यं तत्किमपि नायिकाया रामणीयकं द्योतयति । अभ्युद्गमविधिरित्यत्र विधिशब्दस्यायमभिप्रायः—षडर्घ्या भवन्ति । आचार्यो ऋ-

---

१. 'प्रतिवचनमप्यालपसि च' इति शृङ्गारदीपिका. २. 'दृष्टिः शैथिल्यं भजत इति' इति शृङ्गारदीपिका. ३. 'कोपे' इति शृङ्गारदीपिका.

Digitized by Microsoft®

स्निग्धिवाह्यो राजा प्रियः स्नातक इति । श्रौताचारवतामागमनोचितमेतत् । न पुनः प्रणयोचितम् । शिरस्याज्ञा न्यस्ता, न तु हृदये । सापि पाषाणभारवदतिदुर्वहा । अतिदुर्वहं वस्तु मस्तके धार्यते । अत एवानतिमतीति शिरोविशेषणम् । मिलने दृष्टेर्न शैथिल्यम् । मनसो मिलने तु शैथिल्यमेव । अथ च दृष्टेः शैथिल्यं न । अमुना प्रकारेण त्वया दूरादेव स्मितमधुरं यथा भवत्येवमभ्युत्थानं कृतम् । इदं क्रियतामित्यादिकार्यनियोग आज्ञा । सापि प्रियवचनवती मे आनम्रशिरसि प्रतीष्टा । अन्यच्च तव दृष्टेर्मम दृष्ट्या सह मिलने शैथिल्यं नास्तीत्येतावत्संवृतिस्वरूपम् । दूरादेवाभ्युद्गमः कृतो न तु प्रत्यासत्तौ । शरीरसंपर्कसंभावनायामप्यसहनत्वात् । यः पूर्वं मम तथा वशीभूत आसीत्तस्यैव प्रियतमस्यान्याङ्गनासङ्गिनोऽप्यनुवृत्तिं करोमि प्राणांश्च धारयामीत्यात्मन्यसंभावना । अभ्युपगमोऽपि तस्या नास्ति,अपि तु साटोपत्वम् । तवौदासीन्यमात्रेऽपि मम चेतो दह्यते तत्का नामान्याङ्गनासङ्गसंभावना । तस्मात्पिशुनविजृम्भितमेतत् । यच्च मम हृदये दह्यमानेऽपि तव हृदयस्य काठिन्यं तत्र निगूढान्तःकोपता हेतुः । अन्तर्निखातकर्कशपदार्थं हि कोमलमपि कठिनं भवति । मिलन इत्यत्र यद्यपि गुणप्रतिषेधो न प्राप्नोति तथापि रूढिरस्ति । अनुमानालंकारः । यथा—'वचनमुपचारगर्भम्–' इत्यादि प्रागदर्शितम् । औदार्यं प्रदर्श्य सदे(?)त्यनेनौदार्यं नाट्यालंकारः । यथा—'अइदुक्किआएँ दिअहं सकलं काऊण गेहवावारम् । गरुए वि मण्णुदुःक्खे भरिमो पाअन्तसुत्तस्स ॥'[1]

काचित्प्रणयकलहान्तरिता सहचरीं प्रत्याह—

कथमपि सखि क्रीडाकोपाद्व्रजेति मयोदिते
कठिनहृदयः शय्यां[2] त्यक्त्वा बलाद्गत एव सः ।
इति सरभसं[3] ध्वस्तप्रेम्णि व्यपेतघृणे स्पृहा
पुनरपि हतव्रीडं चेतः करोति करोमि किम् ॥ १५ ॥

हे सखि, किं करोमि । अपि तु न किमपि । यतः पुनरपि मे निस्त्रपमन्तःकरणं तस्मिन्प्रियतमे स्पृहां करोति । किंविशिष्टे । यतो व्यपेतघृणे निःशङ्के । पुनरपि कीदृशे । सरभसमपर्यालोचितमपास्तप्रेम्णि । तस्मादिति कस्मात् । यतः स कर्कशहृदयो बलात्कारेण गत एव । क्व सति । कथमपि प्रणयरोषाद्व्यच्छेति मयोक्ते सति । कथमपिशब्दस्यायमभिप्रायः—क्रीडयापि कोपं न करोमि । क्रीडाकोपेऽपि माकदाचिदसौ वैमनस्यं गच्छेत । शय्यां त्यक्त्वा गतः,न तु माम् । उपनतेऽप्यमङ्गले न कश्चिदात्मनः स्वयममङ्गलं शंसतीत्याशयः । बलाद्गतः सोऽपि किं स्वभावेन गन्तुं शक्नोति । अत एव सरभसं ध्वस्तप्रेम्णि । व्यपेतघृणे इयं मया विना न जीविष्यतीति जानत्यप्युपेक्षितवति । किं करोमि । इतिकर्तव्यतामो-

१. 'अतिदुःखिताया दिवसं सकलं कृत्वा गेहव्यापारम् । गुरुकेऽपि मन्युदुःखे स्मरामः पादान्तसुप्तस्य ॥' इति च्छाया. २. 'त्यक्त्वा शय्यां' इति शृङ्गारदीपिका. ३. 'सरभसध्वस्त–' इति शृङ्गादीपिका.

Digitized by Microsoft®

हेनोपायमपि न जानामीत्यर्थः । अत्रेदं विमृश्यते—ननु य एष क्रीडाकोपमात्रेण शय्योत्थायं गत एव स किं ग्राम्यः, उतान्यासक्तः । न तावदाद्यः । शृङ्गारोपनिबद्धस्याग्राम्यत्वात् । नापि द्वितीयः । सापराधस्य विटस्यापि वा नायिकायाः सुमहत्यपि कोपे प्रसादनैकपरत्वात् । न च सापराधे प्रेयसि क्रीडाकोपो भवति भामिनीनाम्, अपि तु वास्तव एव । तस्मादयं क्रीडाकोपावमानितः सनुत्थाय कुड्यान्तरितो भूत्वा प्रियतमायास्तत्कालमदर्शनमात्रेण प्राणपरिहारं यावदध्यवसितायाः प्रेमसर्वस्वनिधानमुद्राभङ्गकारिभिरभिमानवाक्यैः श्रवणेन्द्रियं चरितार्थयति । प्रणयमानात्मको विप्रलम्भः । 'कलहान्तरितामर्षाद्विधूतेऽनुशयार्तियुक्' इति कलहान्तरिता नायिका ॥

दंपत्योर्निशि जल्पतोर्गृहशुकेनाकर्णितं यद्वच-
स्तत्प्रातर्गुरुसंनिधौ निगदतः श्रुत्वैव[1] तारं वधूः ।
कर्णालम्बितपद्मरागशकलं विन्यस्य चेच्चवाः[2] पुरो
व्रीडार्ता प्रैकरोति[3] दाडिमफलव्याजेन वाग्बन्धनम् ॥ १६ ॥

त्रपापर्याकुला वधूः श्रवणालम्बितशोणमणिशकलं विन्यस्य चञ्चवाः पुरः प्रणिधाय दाडिमफलरूपेण च्छद्मना वाग्बन्धनं प्रयत्नेन करोति । किं कृत्वा । श्रुत्वैव किं तत् । वचः । कस्य । अर्थवशाद्विभक्तिविपरिणामेन शुकस्यैव । किं कुर्वतः । प्रभाते श्वशुरश्वश्रूप्रभृतीनां प्रत्यासत्तावुच्चैः स्वरं निगदतः । तत्किम् । यद्रात्रौ स्त्रीपुंसयोः किंचिदेकान्तोचितं वाच्यावाच्यं जल्पतोः संबन्धि तेनैव मन्दिरशुकेन श्रुतम् । दंपत्योर्मध्ये वधूरिति संबन्धः । तयोरेतावती लज्जा यन्निशि दंपत्योर्जल्पतोः दिवा पुनरौदासीन्येन दंपती इति न ज्ञायेते । न च परस्परं जल्पतोः । प्रातः श्रुत्वेत्यनेन सुरतालापैर्जागरितसकलरात्रिरपि प्रथमप्रबुद्धेयं नायिका । कुलाङ्गना हि चरमं शायिन्यः प्रथमं प्रबोधिन्यश्च भवन्तीति । एवंविधैरालापैस्तु रजनिरज्ञातैव प्रयाति । यथोत्तरचरिते—'किमपि किमपि मन्दं मन्दमासक्तियोगादविचलितकपोलं जल्पतोरक्रमेण । अशिथिलपरिरम्भव्यापृतैकैकदोष्णोरविदितगतयामा रात्रिरेव व्यरंसीत् ॥' श्रुत्वेवेत्येवशब्दस्याव्ययानामनेकार्थत्वेनाविलम्बोऽर्थः । केचित् 'तस्यैव वधूः' तारं इति पठन्ति । तेन चान्वयः सुखावहो न भवति । यदुक्तम्—'वाक्यं यत्राभिमतं परस्परं सव्यपेक्षवृत्तीनाम् । समुदायः शब्दानामेकपराणामनाकाङ्क्षः ॥ अन्यूनाधिकवाचकसकमपुष्टार्थशब्दचारुपदम् । क्षोदक्षममक्षुण्णं सुमतिर्वाक्यं प्रयुञ्जीत ॥' उक्तं हि—'अभिहितान्वयवादिनां मते सामान्यरूपाणां पदार्थानामाकाङ्क्षायोग्यतासंनिधिवशात्परस्परसंसर्गे पदार्थव्यतिरिक्तो वाक्यार्थः प्रकाशते' इति । अखण्डवाक्यवादिनां मते तु वाक्योपदेशः कर्तुं न युज्यते । व्यङ्ग्यव्यञ्जकभावाभावात् । यदुक्तम्—'सोऽयमिषोरिव दीर्घदीर्घो व्यापारः शब्दस्य' इति । शब्दश्रुतेरन-

---

१. 'तस्यातिमात्रं वधूः' इति शृङ्गारदीपिका. २. 'चञ्चूपुटे' इति शृङ्गारदीपिका. ३. 'विदधाति' इति शृङ्गारदीपिका.

Digitized by Microsoft®

न्तरं यावानर्थो गम्यते तावता शब्दस्याभिधैव व्यापार इति चेत्, प्रष्टव्या यूयम् 'ब्राह्मण, पुत्रस्ते जातः कन्या ते गर्भिणी' इत्यादौ हर्षशोकादीनामपि [न] वाच्यत्वम् । कस्माच्च लक्षणा । लक्षणीयेऽप्यर्थे दीर्घदीर्घाभिधाव्यापारेणैव प्रतीतिसिद्धेः । जाया च पतिश्च दंपती । उत्तरपदाधिकारे जायाशब्दस्य जंभावो दंभावश्च निपात्यते । दुर्गसिंहाचार्यस्तु जंदंशब्दौ जायासमानार्थाविति मन्यते । शुकादयस्तु शृङ्गारिणां भवनेषु भवन्त्येव यदुक्तम्—'वृक्षायुर्वेदयोगमेषकुक्कुटलावकयुद्धविधिशुकशारिकाप्रलापनम्' इत्यादि । दाडिमबीजमेव पद्मरागसदृशं भवति न तु फलमित्याशङ्का यदि भवति तदा 'दाडिमशृंगाबीजेन' इति युक्तः पाठः । वाग्बन्धनमित्यत्र कारणे कार्योपचारः । तेन मुखबन्धनमित्यर्थः । अन्योऽपि यः परमर्मोद्घाटनं करोति तस्य बन्धनं विधीयत इत्युक्तिक्लेशः । कविर्वक्ता । लज्जया व्यभिचारिभावेन पुष्टः संभोगशृङ्गारः । पद्मरागशकले दाडिमबीजभ्रान्तिरिति भ्रान्तिमानलंकारः । यदुक्तम्—'वस्तुविशेषं पश्यन्नवगच्छेदन्यमेव तत्सदृशम् । निःसंदेहं यस्मिन्प्रतिपत्ता भ्रान्तिमान्स इति ॥'यथा—'पालयति त्वयि वसुधां विविधाध्वरधूमशालिनीः ककुभः । पश्यन्तो दूयन्ते घनसमयाशङ्किनो हंसाः ॥'

काचिन्मानिनी मन्यूपतापेन नायकं प्रति सोल्लुण्ठमभिधत्ते—

अज्ञानेन पराङ्मुखीं परिभवादाश्लिष्य मां दुःखितां
किं लब्धं शठ दुर्नयेन नयतां सौभाग्यमेतां दशाम् ।
पश्यैतद्दयिताकुचव्यतिकरोन्मृष्टाङ्गरागारुणं
वक्षस्ते मलतैलपङ्कशबलैर्वेणीपदैरङ्कितम् ॥ १७ ॥

हे कितव, त्वया किमुपार्जितम्, अपि तु न किमपि । किं कुर्वता । मदालिङ्गनरूपेण दुर्नयेनात्मनः सौभाग्यमेतामयोग्यामवस्थां प्रापयता । किं कृत्वा । अन्याङ्गनासंगमलक्षणात्परिभवाद्दुःखितामनभिमुखीमाश्लिष्य । केन । अज्ञानेन । कोऽर्थः । यस्यां त्वमनुरक्तस्तद्भ्रमेण । कीदृशी सौभाग्यदुरवस्थेत्याह—पश्यैतदित्यादि । वर्तते । किं तत् । तव वक्षः । कीदृशम् । मलतैलपङ्कशबलैर्वेणीपदैरङ्कितं लाञ्छितम् । किंविशिष्टं पूर्वमासीत् । दयिताकुचव्यतिकरोन्मृष्टाङ्गरागारुणम् । वल्लभास्तनयोर्व्यतिकरेण संबन्धेन प्रोञ्छितो योऽङ्गरागस्तेनारुणम् । अत्र दयिताया आज्ञाभङ्गो दुर्नयशब्दार्थः । तेन च तया त्वं निग्राह्योऽसीति व्यङ्ग्यम् । पश्येतिक्रियाया वाक्यार्थ एव कर्म, न तु वक्षः । नहि वक्षस्ते पश्येत्युक्तिर्भवति अपि तु वक्षस्त्वमिति । इयं च नायिका ऋतुस्नातोन्मुखी । अन्यथा तैलपङ्कादिप्रयोगः शृङ्गारोपनिबन्धे तत्रभवतां छान्दसानामेव सुकरः । तस्मिन्नेवावसरे नायकेन नूनमन्याङ्गनासङ्गः कृतः । ईर्ष्यामानात्मको विप्रलम्भः । आलिङ्गनेन स्पर्शनात्मकः संभोगोऽपि किं न स्यादिति चेत्, न । परस्परानुकूल्याभावात् । न चैवं प्रतीतिरपि नास्तीति वाच्यम् । पराङ्मुखत्वेऽपि नान्योऽयमिति प्रतीतेः । यथोत्तरचरिते

---

१. 'व्यतिकरासक्ताङ्ग' इति शृङ्गारदीपिका. २. 'मम तैलपङ्कमलिनैः' इति शृङ्गारदीपिका.

Digitized by Microsoft®

सीतायां वनं प्रेषितायां शम्बूकं हत्वा प्रतिनिवर्तमानो यानि दयितया सह पूर्वं निषेवितानि गोदावरीपरिसरस्थानानि तानि दृष्ट्वा मूर्छितो भागीरथीप्रभावादृश्यसीताकरारविन्दस्पर्शमासाद्य साह्लादोच्छ्वासो रामः—'हन्त भोः, किमेतत्। आश्योतनं नु हरिचन्दनपल्लवानां निष्पीडितेन्दुकरकन्दलजो नु सेकः। आतप्तजीविततरोः परितर्पणो मे संजीवनौषधिरसो नु हृदि प्रसिक्तः ॥ स्पर्शः पुरा परिचितो नियतं स एष संजीवनश्च मनसः परिमोहनश्च। संतापजं सपदि यः प्रतिहत्य मोहमानन्दनेन जडतां पुनरातनोति ॥' उक्तं च—'अभ्यासादभिमानाच्च तथा संप्रत्ययादपि। विषयेभ्यश्च तत्त्वज्ञा विदुः प्रीतिं चतुर्विधाम् ॥ प्रीतिः साभ्यासिकी ज्ञेया मृगयादिषु कर्मसु। अनभ्यस्तेष्वपि पुरा कर्मस्वविषयात्मिका ॥ संकल्पाज्जायते प्रीतिर्या सा स्यादाभिमानिकी। नान्योऽयमिति यत्र स्यात्प्रतीतिः प्रीतिकारणम् ॥ तत्त्वज्ञैः कथ्यते सापि प्रीतिः संप्रत्ययात्मिका। प्रत्यक्षा लोकतः सिद्धा स्यात्प्रीतिर्विषयात्मिका। प्रधानफलभूता सा तदर्थाश्चेतरा अपि ॥'

एकत्रासनसंस्थितिः[1] परिहृता प्रत्युद्गमाद्दूरत-
स्ताम्बूलाहरणच्छलेन[2] रभसाश्लेषोऽपि संविघ्नितः[3]।
आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके
कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः[4] ॥ १८ ॥

गृहागतं प्रियं प्रति विदग्धयानुवृत्तिरूपादुपचारादेव कोपश्चरितार्थतां नीतः। यतो दूरादेवाभ्युत्थानादेकस्मिन्पीठे उपवेशनं त्यक्तम्। ताम्बूलस्य वीटिकाया आहरणं तद्व्याजेन रभसालिङ्गनमपि सम्यग्विघ्नितम्। सखीप्रभृतिपरिजनं सविधे नियुञ्जानया वाङ्मिश्रणमपि न कृतम्। मीलितमलंकारः। यदुक्तम्—'तन्मीलितमिति यस्मिन्समानचिह्नेन कोपहर्षादि। अपरेण तिरस्क्रियते नित्येनागन्तुना वापि ॥' यथा—'मदिरामदभरपाटलकपोलतललोचनेषु वदनेषु। कोपो मनस्विनीनां न लक्ष्यते कामिभिः प्रभवन् ॥' सावहित्थादरा नायिका प्रगल्भा ॥

दृष्ट्वैकासनसंस्थितेः[5] प्रियतमे पश्चादुपेत्यादरा-
देकस्या नयने निमील्य[6] विहितक्रीडानुबन्धच्छलः।
ईषद्वक्रितकंधरः[7] सपुलकः[8] प्रेमोल्लसन्मानसा-
मन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति ॥ १९ ॥

एकासनोपविष्टे द्वे प्रियतमे दृष्ट्वा पृष्ठदेशं सप्रयत्नमागत्यैकस्या लोचने क्रीडानुबन्धव्याजेन मुद्रयित्वा दक्षिणो नायक इतरां चुम्बति। कथंभूतः सन्। यथा द्वितीया न

१. 'संगतिः' इति शृङ्गारदीपिका. २. 'ताम्बूलानयनच्छलेन' इति शृङ्गारदीपिका. ३.'संगते' इति शृङ्गारदीपिका. ४. 'पिधाय' इति शृङ्गारदीपिका. ५. 'तिर्यग्वक्रित' इति शृङ्गारदीपिका. ६. 'सपुलकप्रेमो' इति शृङ्गारदीपिका.

Digitized by Microsoft®

जानातीति मनाङ्नमितग्रीवः । पुनः कीदृशः। सरोमाञ्चः तां किंविशिष्टाम् । प्रीत्युल्लसच्चेतसम् । पुनः कीदृशीम् । मत्कारणेनेयं वञ्चितेत्यन्तर्निभृतहासलसद्गण्डमण्डलाम् । यस्या नेत्रे मुद्रिते सा ज्येष्ठा । तस्यामपि नायकस्य प्रीतिरस्त्येव । यतः—'दक्षिणोऽस्यां सहृदयः' इति वचनात्पूर्वस्यामपि नायिकायां हृदयेन सह व्यवहरति । तस्माद्विहितक्रीडानुबन्धच्छल इति योऽयं छलशब्दः स चुम्बितनायिकापेक्षयैव नायके न पुनर्वास्तवेनैव । क्रीडानुबन्धेन प्रथमा प्रथममेव संभाविता, द्वितीयस्यां च नेत्रमुद्रणाच्चुम्बनात्मकस्य संभावनाप्रकारस्य वैशिष्ट्यात्सपुलकत्वाच्च विशिष्टा प्रीतिः । नूतननायिकायां च विशिष्टप्रीतिप्रतिपादनादेव पूर्वस्यां दाक्षिण्यमात्रादुपचार एवेत्येतेन । द्वयोरपि नायिकयोः प्रियतमे इत्युक्तत्वात् विशेषोऽलंकारः । यदुक्तम्—'यत्रान्यत्कुर्वाणो युगपत्कर्मान्तरं च कुर्वीत । कर्तुमशक्यं कर्ता विज्ञेयोऽसौ विशेषोऽन्यः ॥'

चरणपतनप्रत्याख्यानप्रसादपराङ्मुखे
निभृतकितवाचारेर्युक्ते रुषा परुषीकृते ।
व्रजति रमणे निःश्वस्योच्चैः स्तनार्पितहस्तया
नयनसलिलच्छन्ना दृष्टिः सखीषु निपातिता ॥ २० ॥

कयाचित्कलहान्तरितया, सखीषु दृष्टिर्न्यस्ता । कीदृशी । नयनसलिलच्छन्ना । किंविशिष्टया । उच्चैर्निःश्वस्य स्तनविनिहितहस्तया । क्व सति । दयिते गच्छति सति । कुतो हेतोर्गच्छतीत्याह—चरणपतनस्य यन्निराकरणं तेनालब्धप्रसादे । पुनः कीदृशे । निगूढशठचरितेत्यभिहिते । पुनरपि किंविशिष्टे । क्रुधा कर्कशतां यावन्नीते । 'अपमानितश्च नार्या विरज्यते यः स उत्कृष्टः' इति वचनादन्यत्र गच्छतो नायकस्य दक्षिणत्वम् । स्तनार्पितहस्तयेति हृदयसंतापसूचकश्वेष्टाविशेषः । नयनसलिलच्छन्नेति सखीष्वेव प्रतिविधानसूचिका दीना दृष्टिः । यदुक्तम्—'अर्धस्रस्तोत्तरपुटा छन्नतारा जलाविला । मन्दसंचारिणी दृष्टिर्दीनेति परिकीर्त्यते ॥

काञ्च्या गाढतरावनद्धवसनप्रान्ता किमर्थं पुन-
र्मुग्धाक्षी स्वपितीति तत्परिजनं स्वैरं प्रिये पृच्छति ।
मातः स्वप्नुमपीह वारयति मामित्याहितक्रोधया
पर्यस्य स्वपनच्छलेन शयने दत्तोऽवकाशस्तया ॥ २१ ॥

तया नायिकया शयने शय्यायामवकाशो दत्तः अर्थात्प्रियस्य । किं कृत्वा परिवृत्त्य । केन । स्वपनच्छलेन । आहितक्रोधयेव आहितः क्रोधो यया । कथमिति । हे मातः,

---

१. 'प्रत्याख्यानात्' इति शृङ्गारदीपिका. २. 'उक्त्वा' इति शृङ्गारदीपिका. ३. 'स्तनाहित' इति शृङ्गारदीपिका. ४. 'क्लिन्ना' इति शृङ्गारदीपिका. ५. 'अवबद्ध' इति शृङ्गारदीपिका. ६. 'सुप्तिमपीह लुम्पति ममेत्यारोपित' इति शृङ्गारदीपिका.

Digitized by Microsoft ®

निद्रातुमप्यत्र स्थाने निषेधति । क्वसति । प्रिये पर्यनुयुञ्जाने सति । कम् । प्रियायाः परिजनम् । कथम् । स्वैरम् । 'मन्दस्वच्छन्दयोः स्वैरम्'[1] इतिवचनान्मन्थरमित्यर्थः । द्विकर्मकत्वेन पुनरिति पृच्छति सति । इतीति किम् । किं पुनर्विह्वलाक्षी कटिसूत्रेण निबिडनियमितसिचयान्ता निद्रायते । अत्र गाढतरनितम्बवस्त्राञ्चलवहनाभ्यसूयागर्भो रम्भास्तम्भाभिरामोरुकाण्डसशैलौल्यपर्यवसायी भणितेरुल्लेखः । इयं च साङ्गभङ्गैरलसचेष्टाविशेषैर्लम्बितपक्ष्मलोचनाञ्चला मदनमदविक्लवतामनुभवन्त्यासीत् । न पुनर्वास्तवीं निद्राम् । यदि वा मृषा सुप्तिरियम् । यदुक्तम्—'सापि भावजिज्ञासार्थिनी नायकस्यागमनकाले मृषा सुप्ता स्यात् ।' अत एव मन्दमपि प्रियस्य प्रश्नवचनमश्रौषीत् । मातः स्वप्नुमपीति मातःशब्दः स्त्रीणामुक्तिमात्रे । सूक्ष्मोऽलंकारः । यदुक्तम्—'इङ्गिताकारलक्ष्योऽर्थः सौक्ष्म्यात्सूक्ष्म इति स्मृतः ।' यथा—'कदा नौ संगमो भावीत्याकीर्णे वक्तुमक्षमम् । अवेत्य कान्तमबला लीलापद्मं न्यमीलयत्॥' काव्या गाढतरेत्यादि संभोगनर्म । यथा—'सालोए[2] व्विअ सूरे घरिणी घरसामिअस्स घेत्तूण । णेच्छन्तस्स वि पाए धुवइ हसन्ती हसन्तस्स ॥' एते च नर्मभेदाः । 'वैदग्ध्यक्रीडितं नर्म प्रियोपच्छन्दनात्मकम् । हासेनैव सश्रृङ्गारभयेन विहितं त्रिधा । आत्मोपक्षेपसंभोगमानैः शृङ्गार्यपि त्रिधा । शुद्धमङ्गं भयं द्वेधा त्रेधा वाग्वेषचेष्टितैः ॥ सर्वं सहासमित्येवं नर्माष्टादशधोदितम् ।' मातः स्वप्नुमपीत्यादिना आत्मोपक्षेपनर्म । यथा—'मध्याह्नं गमय त्यज श्रमजलं स्थित्वा पयः पीयतां मा शून्येति विमुञ्च पान्थविवशः शीतः प्रपामण्डपः । तामेव स्मर घस्मरस्मरशरत्रस्तां निजप्रेयसीं त्वच्चित्तं तु न रञ्जयन्ति पथिक प्रायः प्रपापालिकाः ॥'

एकस्मिञ्शयने विपक्षरमणीनामग्रहे मुग्धया
सद्यः कोपपराङ्मुखं[3] ग्लपितया चाटूनि कुर्वन्नपि ।
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणा[4]-
न्मा भून्मेति इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः ॥ २२ ॥

कयाचिन्मुग्धया प्रियतमस्तत्कालमेव पराङ्मुखं यथा भवत्येवमवज्ञातः । किं कुर्वन्नपि । चाटूनि कुर्वन्नपि लालनवाक्यानि ब्रुवाणोऽपि । तथाभूतोऽपि कस्मादवधीरितः । आवेगात् । तस्य लक्षणम्—'आवेगः संभ्रमोऽस्मिन्नभिसरजनिते शस्त्रनागाभियोगो त्रासात्पांसूपदिग्धस्त्वरितपदगतिर्वर्षजे पिण्डिताङ्गः । उत्पातात्स्वस्तताङ्गेष्वहितहितकृते शोकहर्षानुभावा वह्नेर्धूमाकुलाक्षः करिजमनुभयस्तम्भकम्पापसाराः ॥' अत्र सपत्नीनामग्रहणमेवाहितम् । तत्कृत आवेगः । किंविशिष्टया । ग्लपितया । क्व सति । एकस्यां शय्यायां सपत्नीनामोच्चारणे सति एकस्मिञ्शयने प्रसुतायां रतिप्रवृत्तौ विपक्षस्त्रीनामग्रह इत्येव

---

१. 'सालोक एव सूर्ये गृहिणी गृहस्वामिनो गृहीत्वा । अनिच्छतोऽपि पादौ धावति हसती हसतः ॥' इति च्छाया- २. 'पराङ्मुखग्लपितया' इति शृङ्गारदीपिका. ३. 'तत्क्षणं' इति शृङ्गारदीपिका. ४. 'सुप्त' इति शृङ्गादीपिका.

Digitized by Microsoft®

न, अपि तु विपक्षरमणीनामग्रहे भूताविष्टस्य ग्रह इव ग्रहे । अत एव नायिकाया आवेगः । मुग्धाश्च स्तोकेऽप्युपाये कोपं परिहरन्तीति । न केवलमवधीरितः, अवधीरणहेतोस्तूष्णीं स्थितः सन्मा भून्म्लान इवेति द्रुतमेव वेगविवर्तितकंधरं यथा भवत्येवं पुनरवलोकितः । अत्रौत्सुक्यभावस्योदयः । यदुक्तम्—'भावस्य शान्तिरुदयः संधिः शबलता तथा ।' उपायश्चात्र चाटूनि कुर्वन्नपीत्यनेन साम । यदुक्तम्—'नरः कलासु कुशलो वाचालश्चाटुकारकः । असंस्तुतोऽपि नारीणां चित्तमाश्वेव विन्दति ॥' यथास्मत्पूर्वजस्य वाक्पतिराजापरनाम्नो मुञ्जदेवस्य—'दासे कृतागसि भवत्युचितः प्रभूणां पादप्रहार इति सुन्दरि नास्मि दूये । उद्यत्कठोरपुलकाङ्कुरकण्टकाग्रैर्यत्खिद्यते तव पदं ननु सा व्यथा मे ॥' तूष्णीमित्यनेनोपेक्षामात्रं च । म्लान इवेत्यत्रेवकारेण म्लानसदृशोऽपि मा भूदिति प्रीत्यतिशयः । ईर्ष्यामानात्मकविप्रलम्भपूर्वको दर्शनात्मा संभोगश्चङ्गारः । 'गूढविप्रियकृच्छठः'इत्यनेन शठो नायकः । यथा—'शठान्यस्याः काञ्चीमणिरणितमाकर्ण्य सहसा यदाश्लिष्यन्नेव प्रशिथिलभुजग्रन्थिरभवःतदेतत्काचक्षे घृतमधुमयत्वद्वचोविषेणाघूर्णन्ती किमपि न सखी मे गणयति ॥' मृदुकोपा मुग्धा नायिका ॥

एकस्मिञ्शयने पराङ्मुखतया वीतोत्तरं ताम्यतो-
रन्योन्यं[1] हृदयस्थितेऽप्यनुनये संरक्षतोर्गौरवम् ।
दंपत्योः शनकैरपाङ्गवलनान्मिश्रीभवच्चक्षुषो-
र्भग्नो मानकलिः सहासरभसं[2] व्यावृत्तकण्ठग्रहः ॥ २३ ॥

दंपत्योः प्रणयमानकलहो भग्नः । किंविशिष्टः सहासरभसं यथा भवत्येवं व्याघुटितः कण्ठाश्लेषो यत्र स तथा । अभग्ने मानकलहे कण्ठग्रहः किल निवृत्त आसीदिति हेतोर्व्यावृत्त इति भङ्गविशिष्टस्यैव मानकलेरिदं विशेषणम् । केवले मानकलहे कण्ठग्रहस्यानुपपन्नत्वात् । केन क्रमेण भग्न इत्याह—एकस्मिन्नित्यादि । एकस्मिञ्शयने त्वया किमित्येवंकृतमित्यादिकलहप्रश्नानामपगतान्युत्तराणि यत्र तद्वीतोत्तरं यथा भवत्येवं ताम्यतोः । उत्तरव्यय एव कथं जात इत्याह—पराङ्मुखतया । पुनः कथंभूतयोः । परस्परं चित्तस्थितेऽपि प्रसादनप्रकारे गौरवं संरक्षतोः । स्वं स्वं लाघवमाशङ्कमानयोरित्यर्थः । अथ च मानभङ्गहेतुगर्भं विशेषणमाह—पुनः कीदृशयोः । स्तोकस्तोकं लोचनाञ्चलविवर्तनेन संघटमानदृष्ट्योरिति । प्रणयमानात्मकविप्रलम्भपूर्वकः स्पर्शनात्मा संभोगः । 'एकत्रासनसंस्थितिः—' इत्यारभ्यामुं श्लोकं यावत्षट्श्लोकेषु कविर्वक्ता ॥

---

१. 'अन्योन्यस्य हृदि स्थिते' इति शृङ्गारदीपिका. २. 'सहासरभसव्यावृत्तकण्ठग्रहम्' इति शृङ्गारदीपिका.

Digitized by Microsoft®

कस्मात्त्वमद्य विमना इव लक्ष्यसे इत्यादि केनचित्पृष्टः कश्चिन्नायकः कान्ताप्रणयमानचेष्टामाचष्टे—

पश्यामो मयि किं प्रपद्यत इति स्थैर्यं मयालम्बितं
किं मां नालपतीत्ययं खलु शठः कोपस्त्वयाप्याश्रितः ।
इत्यन्योन्यविलक्षदृष्टिचतुरे तस्मिन्नवस्थान्तरे
सव्याजं हसितं मया धृतिहरो बाष्पस्तु मुक्तस्तया[1] ॥ २४ ॥

पश्यामस्तावदियं मयि स्वयं कीदृशीमालपनादिप्रतिपत्तिमुपक्रमत इत्यपेक्षया मया निर्व्यापारेण स्थितम् । एष निश्चयेन कितवः कस्मान्मां न भाषत इति मनसि विभाव्य तया कोपः स्वीकृतः । इत्यमुना प्रकारेणान्योन्यस्य या विलक्षा दृष्टिस्तत्र चतुरं यत्कोपप्रसादरूपाया अवस्थाया मध्यं तस्मिन्मया संप्रतिपत्तिप्रवृत्तेन किमपि मिथ्यैवोद्भाव्य हसितम् । तया पुनर्धृतिहरो बाष्पस्त्यक्तः । धृतिं हृतवान् । 'पचादिभ्यश्च' इत्यच् । अधृतिं सूचितवानित्यर्थः । नहि बाष्पः प्रथममुत्पद्य धृतिं जहार । अपि त्वधृतिसमनन्तरमुत्पन्नो नायकस्य धृतिं हृतवानिति चेत्, मैवम् । मानिनीमानस्य प्रत्युताश्रुमोक्षान्तत्वात् । 'पश्यामः' इत्यत्र 'पश्येयम्' इति पाठो युक्तः । मयीत्येकवचनव्यपदेशात् । 'किं मां नालपतीति'इत्यत्रेतिशब्दोऽस्थाननिवेशितः । शठशब्दानन्तरं प्रयोजनीयत्वात् । 'अन्योन्यविलक्षदृष्टिचतुरे तस्मिन्नवस्थान्तरे' इत्यत्रावस्थान्तरं चतुरताधिकरणं भवितुमशक्तं सत्संबद्धं मिथुनं लक्षयति । तां विलक्षां दृष्टिं तदेवावस्थान्तरं जानाति न पुनरन्यः कोऽपीति दृष्टेरनिर्वचनीयत्वं चात्र प्रयोजनम् । प्रणयबहुमानलालिता मुग्धा नायिका ॥

कस्यापि विस्रम्भसंभावितस्याग्रे नायको वक्ति—

परिम्लाने माने मुखशशिनि तस्याः करधृते
मयि क्षीणोपाये प्रणिपतनमात्रैकशरणे ।
तया[2] पक्ष्मप्रान्तध्वजपुटनिरुद्धेन सहसा
प्रसादो बाष्पेण स्तनतटविशीर्णेन कथितः ॥ २५ ॥

तया प्रसादः कथितः । अनुमानेन प्रतिपादित इत्यर्थः । केन । बाष्पेण । किंविशिष्टेन । पक्ष्मप्रान्तध्वजपुटनिरुद्धेन । पक्ष्मप्रान्तावेव ध्वजौ तयोः पुटं तत्र निरुद्धेन । अव्ययानामनेकार्थत्वान्निमेषमात्रं रुद्धेन । न तु निःशेषतो रुद्धेन । अत एव रोद्धुमशक्यत्वात्सहसा स्तनतटविशीर्णेन । अयमभिप्रायः—हृदये द्रुताया नायिकायास्तावदश्रूद्गमो जातः । पश्चात्तया संवरणार्थं रोद्धुमारब्धः । अथ दुर्वहतयासौ बलात्कारेण स्तनयोरुपरि पपात । पक्ष्मप्रान्तयोर्ध्वजपुटरूपेण दैर्घ्यं साधारणो धर्मः । पुटशब्दोश्रुनिरोधप्रयत्न-

---

१. 'मुक्तश्च बाष्पस्तया' इति शृङ्गारदीपिका. २. 'तदा पक्ष्मप्रान्तव्रजपुट' इति शृङ्गारदीपिका.

Digitized by Microsoft®

प्रतिपादकः । तटशब्दः स्तनयोः परिणाहं द्योतयति, विशीर्णशब्दस्तु काठिन्यम् । अन्यथा कथं बाष्पः कणशो विशीर्णतां व्रजेत् । अनुनयेन मानो गत उत स्वयमित्याह—तस्याः परिम्लाने माने अपराधातिशयात्पूर्वमनुनीयमानापि प्रसादं कथमपि न चकार पश्चाद्यथा कथञ्चित्तीव्रं रुदन्निवारितोऽपि न निवर्तते किं तु परिश्रान्तः स्वयमेव, तथा तस्या मानः स्वयं शिथिलो बभूव । अत एव विषादद्योतकं मुखशशिनि करधृत इति । अर्थवशाद्विभक्तिविपरिणामेन तया करधृत इत्यर्थः । परिम्लानता कुसुमादिषु प्रसिद्धा अमूर्ते माने स्खलद्गतिः स्वसंबद्धं शैथिल्यं लक्षयति । व्यङ्ग्यं चात्र चमत्कारेण केवलमनुमेयं गूढमेव । यथा—'मुखं विकसितस्मितं वशितवक्रिम प्रेक्षितं समुच्चलितविभ्रमा गतिरपास्तसंस्था मतिः । उरोमुकुलितस्तनं जघनमंसबन्धोद्धुरं बतेन्दुवदनानतौ तरुणिमोद्गमो मोदते ॥' न केवलमेवं सति, अन्यच्च मयि क्षीणोपाये । ननु पण्णामुपायानां मध्ये प्रणतिरस्त्येव । तत्कथं 'क्षीणोपाये' इत्युक्त्वा 'प्रणिपतनमात्रैकशरणे' इत्युक्तम् । युक्तमेवैतत् । परमिदं प्रणिपतनमुपायतया नारब्धम्, किं त्वनन्यगतिकत्वेन । अत एव मात्रच्प्रत्ययः, शरणशब्दप्रयोगश्च । मुखशशिनीति काव्यालंकारो रूपकम् । नाट्यालंकारः कोपकालुष्येऽपि माधुर्यम् । यदुक्तम्—'यौवने सत्त्वजाः स्त्रीणामलंकारास्तु विंशतिः ।' भावहावहेलास्त्रयोऽङ्गजाः । शोभाकान्तिर्दीप्तिर्माधुर्यं प्रागल्भ्यमौदार्यं धैर्यमित्यत्नजाः सप्त । 'लीला विलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम् । मोट्टायितं कुट्टमितं विब्बोको ललितं विहृतम् ॥' इति स्वाभाविका दश । अनुल्बणत्वं माधुर्यम् । यथा—'सरसिजमनुविद्धं शैवलेनापि रम्यं मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति । इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥'

तस्याः सान्द्रविलेपनस्तनयुगप्रश्लेषमुद्राङ्कितं
किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते ।
इत्युक्ते क्व तदित्युदीर्य सहसा तत्संप्रमार्ष्टुं मया
साश्लिष्टा रभसेन तत्सुखवशात्तस्याश्च तद्विस्मृतम् ॥ २६ ॥

सा मया परिरब्धा । किं कृत्वा । क्व तदित्युदीर्य । क्व तत्सान्द्रविलेपनम्, अपि तु न क्वापीत्यर्थः । किं कर्तुम् । वेगेन संप्रमार्ष्टुं तदेव विलेपनं स्वहृदयलग्नं प्रोञ्छितुम् । विलेपनप्रोञ्छनमेव केवलमधिकृत्यालिङ्गिता, न तु प्रीत्येत्याह—रभसेन हर्षविशेषेण । क्व सति । तया इत्युक्ते सति । इति किम् । किमिति चरणप्रणामसंबन्धच्छद्मना हृदयमपह्नयते । किंविशिष्टं वक्षः । तस्या यद्घनश्रीखण्डादिविलेपनं स्तनयुगं तस्य प्रकृष्टमालिङ्गनं तेन विलेपनमयी मुद्रा तया लाञ्छितम् । अन्यदपि यन्मुद्रालाञ्छितं निधानादिकं भवति तत्प्रयत्नेन गोपाय्यते । व्यतिकरव्याजेनेति व्याजशब्दस्यायमीर्ष्याद्योतकोऽभि-

---

१. 'स्तनतट' इति शृङ्गारदीपिका. २. 'गोपायते' इति शृङ्गारदीपिका. ३. 'तन्व्या च' इति शृङ्गारदीपिका.

Digitized by Microsoft ®

प्रायः । तत्प्रियतमास्तनविलेपनलाञ्छितस्य वक्षसो रक्षणं तव महत्प्रयोजनम्, चरणानतिव्यतिकरस्तु मिथ्यारम्भ इति । यद्यपि तस्या इते पदस्य स्तनयुगपदेन सह संबन्धस्तथापि वक्षःपदेन सह संबन्धविधायको भिन्नविभक्तिनिर्देश उचितः । तस्याश्च आधीनं तव हृदयमिति प्रतीतेः । आश्लिष्टापि मानं तत्याज न वेत्याह—तस्याश्च परिरम्भसुखवशात्तद्विलेपनं विस्मृतम् । चशब्दस्तुल्यकालताप्रतिपादनार्थः । यदैवालिङ्गिता तदैव कोपकारणं विस्मृतवतीति प्रीतिप्रकर्षः । अत्र कोपस्य शान्तिरित्यत्र भावशान्तिः । ईर्ष्यामानात्मकविप्रलम्भारम्भपर्यवसितः संभोगः । नायको वक्ता पूर्ववत् । पिहितमलंकारः । यदुक्तम्—'यत्रातिप्रबलतया गुणः समानाधिकरणमसमानम् । अर्थान्तरं विदध्यादाविर्भूतमपि तत्पिहितम् ॥' 'व्यक्तागा वितथो धृष्टः' इत्यनेन धृष्टो नायकः । माननमै चैतत् । यथा—'तदवितथमवादीर्यन्मम त्वं प्रियेति प्रियजनपरिभुक्तं यदुकूलं दधानः । मदधिवसति मा गाः कामिनां मण्डनश्रीर्व्रजति हि सफलत्वं वल्लभालोकनेन ॥

त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीं
लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि ।
शय्योपान्तनिविष्टसस्मितसखीनेत्रोत्सवानन्दितो
निर्यातः शनकैरलीकवचनोपन्यासमालीजनः ॥ २७ ॥

अलीकवचनानामुपन्यासो यत्र तद्यथा भवत्येवं वयस्याजनः शनकैर्निर्गतः । किंविशिष्टः । शय्योपान्तेत्यादि । कान्तशय्योपान्ते [निविष्टा] या सखी नायिका तस्या नेत्रोत्सवेन प्रमुदितः । क्व सति । कञ्चुलिकाया वीटिकासंस्पृशि प्रियतमे इत्यभिधायिनि सति । इतीति किम् । हे विह्वलाक्षि, त्वं कञ्चलिकामन्तरेणैव रमणीयां शोभां दधासि । अत्र मदनालसलोचनां दृष्ट्वा ग्राम्येतरभङ्गीभणितिप्रक्रमेण रिरंसुः कामी मुग्धाक्षीति संबुबुधे । सत्यां कञ्चलिकायामङ्गसौन्दर्यस्य प्रत्युत पिधानं भवतीति विनैवेत्येवकारस्य तात्पर्यम् । कञ्चुलिका चेयं दाक्षिणात्यचोलिकारूपैव । तस्या एव ग्रथनपदार्थे वीटिकाव्यपदेशः । अन्यत्र कैषातनिकेत्येवमादयः । भवतीष्वप्युपविष्टास्वयमेवंविधं चेष्टत इति सलज्जकृतस्मिताया नायिकायाः सखीजनं प्रत्यवलोकनमात्रमेव नेत्रोत्सवः । ननु स्पर्शसुखेन नयननिमीलनं नायिकानां प्रसिद्धम् । यदाह कालिदासः—'मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः । शृङ्गेण च स्पर्शनिमीलिताक्षी मृगीमकण्डूयत कृष्णसारः ॥' इत्यादिषु तिर्यक्संभोगेऽपि तदेव श्लाघ्यम् । तत्कथमत्र विकस्वरदृष्टिता व्याख्यायते । अत्रोच्यते—नहि सर्वासामेव नायिकानां स्पर्शसुखेन लोचननिमीलनं स्पृहणीयम् । प्रौढनायिकानामेवोपवर्ण्यमानत्वात् । ता हि सुरतारम्भ एवाचेतना भवन्ति । इयं च मध्या नायिका मुग्धाक्षीति मदनालसलोचनेति कान्तं प्रत्यनभियोगित्वात् ।

---

१. 'वेणिका' इति शृङ्गारदीपिका. २. 'वधू' इति शृङ्गारदीपिका. ३. 'कस' 'तनी' इति तद्वाचकौ हिन्दीभाषाशब्दौ.

Digitized by Microsoft®

यदुक्तम्—एवमपरेऽपि व्रीडानुपहताः स्वयमनभियोगकारिणो मध्याव्यवहारा भवन्ति । यथा—'स्वेदाम्भःकणिकाचितेऽपि वदने जातेऽपि रोमोद्गमे विस्रम्भेऽपि गुरौ पयोधरमरोत्कम्पेऽपि वृद्धिं गते । दुर्वारस्मरनिर्भरेऽपि हृदये नैवाभियुक्तः प्रियस्तन्वङ्ग्या हठकेशकर्षणघनाश्लेषामृते लुब्धया ॥' सद्भावरहःसहचरीणां परस्परसौभाग्यसाक्षात्कारेणाह्लादो भवतीत्यालीजन आनन्दितः । कविर्वक्ता । विनैव कञ्चुलिकया धत्से मनोहारिणीं लक्ष्मीमित्यनेन विभावनालंकारः । यदुक्तम्—'सेयं विभावनाख्या यस्यामुपलभ्यमानमभिधेयम् । अभिधीयते यतः स्यात्तत्कारणमन्तरेणापि ॥ 'अत्रार्थशक्त्याक्षिप्तो रिरंसालक्षणोऽर्थः कविना सखीजनसव्याजगमनात्मिकया स्वोक्त्या भूयोऽपि व्यञ्जितः । यदुक्तम्—'शब्दार्थशक्त्याक्षिप्तोऽपि व्यङ्ग्योऽर्थः कविना पुनः । यत्राविष्क्रियते स्वोक्त्या सान्यैवालंकृतिर्ध्वनेः ॥' यथा—'अम्बा शेतेऽत्र वृद्धा परिणतवयसामग्रणीरत्र तातो निःशेषागारकर्मश्रमशिथिलतनुः कुम्भदासी तथात्र । अस्मिन्पापाहमेका कतिपयदिवसप्रोषितप्राणनाथा पान्थायेत्थं तरुण्या कथितमवसरव्याहृतिव्याजपूर्वम् ॥' मनोहारिणीं लक्ष्मीमित्यनेन शोभा नाम नाट्यालंकारः—'रूपोपभोगतारुण्यैः शोभाङ्गानां विभूषणम् ।' यथा—'तां प्राञ्जुखीं तत्र निवेश्य बालां क्षणं व्यलम्बन्त पुरो निषण्णाः । भूतार्थशोभाह्रियमाणनेत्राः प्रसाधने संनिहितेऽपि नार्यः ॥' मुग्धाक्षीत्यनेन कान्तिश्च—'मन्मथाप्यायिता छाया सैव कान्तिरिति स्मृता ॥'

यथा मानं त्याजिता सती तत्कालमवलम्ब्यमानेर्ष्यातिरेकेण संयुज्यमाना रहसि रमणे रतिरमणरहस्यसर्वस्वमुन्मुद्रयति न तथा नित्यमेवेत्यनुसंधाय सखीभिः प्रणयमानं शिक्षिता सती ताः प्रति काचिदाह—

भ्रूभङ्गे रचितेऽपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते
रुद्धायामपि वाचि सस्मितमिदं दग्धाननं जायते ।
कार्कश्यं गमितेऽपि चेतसि तनूरोमाञ्चमालम्बते
दृष्टे निर्वहणं भविष्यति कथं मानस्य तस्मिञ्जने ॥ २८ ॥

लोचनगोचरे सति तस्मिञ्जने मानस्य निर्वाहः कथं भविष्यति, अपि तु न कथमपि तस्मिन्नित्यनिर्वचनीयचमत्कारे जने इत्यर्थान्तरसंक्रमितत्वेन प्राणेश्वर इत्यर्थः । नहि कृत्रिमैरुपायैरयुतसिद्धं वस्तु निह्नोतुं शक्यते । तदत्र क उपायः किं च वस्त्वित्याह—भ्रूभङ्ग इत्यादिना । एवमेव तावत्प्रियतमं दृष्टिः सोत्कण्ठमुद्वीक्षते । भ्रुकुटिकौटिल्ये नाटिते पुनरधिकं सोत्कण्ठमुद्वीक्षते । यथा कश्चित्पक्षी बलात्कारेण रुध्यमानः कथंकथमप्युड्डीय यत्रत्यो भवति तत्रैव गत्वा रमते । अभिनीतेऽपि वाचंयमत्वे ममेदं दग्धमुखं सस्मितं भवति । धिक्कारे दग्धहतकादयः शब्दाः प्रयुज्यन्ते । अथ च तेन सार्धमालापनमन्तरेणाप्रयोजनमानानं दग्धमेव । काठिन्यं गत इत्येव न, अपि तु काठिन्यं गमिते । तथाभूतेऽपि मनसि तनुः पुलकं बिभर्ति । अथ च प्रिये काठिन्यं गमिते

Digitized by Microsoft ®

चेतसि तनुः तनुस्वे (?) कृशेत्यर्थः । तस्मिन्दृष्टे मानस्य कथं निर्वाहो भविष्यति । कोऽर्थः—मया भ्रूभङ्गादीनि दुष्कराणि कृतानि, परंतु न मानो निर्व्यूढः । तस्मादतः-परं मानार्थे यत्नमपि न करिष्यामीति प्रीतिप्रकर्षो भविष्यत्या व्यज्यते । उत्तरयत्नाक्षेपालंकारौ ॥

सा पत्युः प्रथमेऽपराधसमये सख्योपदेशं विना
नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम् ।
स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठल्लोलोदकैरश्रुभिः ॥ २९ ॥

सा बाला भर्तुर्व्यलीकप्रस्तावे केवलं रोदित्येव । कीदृशी । लम्बितपक्ष्मलोचनेन्दीवरा । कैर्विशिष्टा । अश्रुभिः । कथंभूतैः । निर्मलकपोलयोर्यन्मूलं नेत्रयोरधोभागस्तत्र क्षरितैः । पुनः किंविशिष्टैः । लुठल्लोलोदकैः निमेषार्धबद्धबिन्दुजालतया लुठत्पतनशीलत्वेन लोलमुदकं येषां तैः । पुनः कीदृशैः । नैरन्तर्येण प्रथममेवोन्मृष्टकज्जलत्वात्स्वच्छैः । अथवा ईर्ष्यामानेऽप्यनुपन्यस्तवक्रोक्त्यादेर्नायिकायाः स्वच्छतानुमापकैः । उपचारेणाश्रुभिरपि स्वच्छैः । ननु किमिति रोदित्येवमुल्लुण्ठनादिकमेव किमिति नारभत इत्याह—नो जानाति । किं तत् । सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम् सहेलं भ्रूक्षेपादिभिरङ्गवलनादिभिरनृजुभणितिभिश्चापराधस्य सम्यगनुमानम् । तदेव किमिति न वेत्तीत्याह—सख्योपदेशं विना सख्येनोपदेशः अर्थात्सख्यास्तं विना । अत्र तावत्कविः प्रायस्तटस्थो वक्ता । सेति पदं च दूतीदूतप्रभृतिकस्य रतिवासनालिङ्गितान्तःकरणस्य वा वक्तुर्युज्यते, न तु तटस्थस्य । तस्मात् 'कान्तस्य प्रथमेऽपराधसमये' इति पाठो युक्तः । अथानुरक्त एव वक्तास्तु । मैवम् । पत्युरित्यनुपपन्नत्वात् ॥

काचिदन्यनायिकानुरक्तं नायकं प्रति ब्रूते—

भवतु विदितं व्यर्थालापैरलं प्रिय गम्यतां
तनुरपि न ते दोषोऽस्माकं विधिस्तु पराङ्मुखः ।
तव यदि तथारूढं प्रेम प्रपन्नमिमां दशां
प्रकृतितरले का नः पीडा गते हतजीविते ॥ ३० ॥

हे प्रिय, भवतु अनुनयोपक्रमैरालापैरास्ताम् । कोऽर्थः—ज्ञातं तव स्वरूपम् । प्रसादनप्रवृत्तस्यापि सर्वाकारमन्यासक्तिशंसिन्येव च्छाया बाह्याकारेण दाक्षिण्यमात्रमेतत् । अत एव व्यर्थालापैः पूर्यताम् । त्वदधीनं मे जीवितमित्यादीनामालापानामर्थस्य विगतत्वाद्व्यर्थता । तस्मात्त्रैव प्रतिभासते तत्रैव गम्यताम् । नहि प्रियस्य समीहितप्रतिबन्धः कर्तु

१. 'प्राणेशप्रणयापराधसमये' इति शृङ्गारदीपिका. २. 'लोलालकैः' इति शृङ्गारदीपिका.

Digitized by Microsoft®

युज्यते । अस्मिन्प्रेमवैशसे तव स्वल्पोऽपि दोषो नास्ति । अस्माकमेव दैवं वक्ष्यमाणमरणाध्यवसायेन प्रतिकूलम् । अस्माकमिति बहुवचनमौदासीन्यव्यञ्जकम् । अनेकार्थत्वादव्ययानां । तुशब्दोऽवधारणार्थः । केन प्रकारेण विधिः पराङ्मुख इत्याह—तव यदीत्यादि । तव यद्यनिर्वचनीयेन प्रकारेण कोटिं प्राप्तं प्रेम इमां प्रसादनसमयेऽप्यन्यासक्तिशंसनलक्षणामवस्थां प्रपन्नमस्मादस्माकं स्वभावगह्वरे निन्द्यजीविते गते का व्यथा । अपि तु न कापि । प्रकर्षप्राप्तस्य प्रेम्णो विपर्यासे त्वेषैव स्थितिः । यथा रत्नावल्याम्—'समारूढा प्रीतिः प्रणयबहुमानादनुदिनं व्यलीकं वीक्ष्येदं कृतमकृतपूर्वं खलु मया । प्रिया मुच्चल्य स्फुटमसहना जीवितमहो प्रकृष्टस्य स्नेहस्खलितमविषह्यं हि भवति ॥' तनुरपि न ते दोष इत्यत्र तवैव गरीयान्दोष इति विपरीतलक्षणया निषेधे विधिः । एवं च त्वयि निरनुक्रोशेऽस्माकं विधिः पराङ्मुख इति प्रीत्यतिशयः । तवेत्यर्थान्तरसंक्रमितत्वेन शटस्येत्यर्थः । वयं त्वदेकशरणाः, तस्मात्का नः पीडा । अपि तु तवैव । प्रकृतितरले इत्यनेन संसारस्यानित्यता प्रतिपाद्यते । वैराग्यं च शृङ्गारोपनिबन्धे वयं तावदनुचितं मन्यामहे । यथोदाहृतं दोषनिर्णये मम्मटालकाभ्याम्—'प्रसादे वर्तस्व प्रकटय मुदं संत्यज रुषं प्रिये शुष्यन्त्यङ्गान्यमृतमिव ते सिञ्चतु वचः । निधानं सौख्यानां क्षणमिमुखं स्थापय मुखं न मुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः ॥' अत्र शृङ्गारे प्रतिकूलस्य शान्तस्यानित्यताप्रकाशनरूपो विभावस्तत्प्रकाशितो निर्वेदश्च व्यभिचारी । यद्यपि शुद्धतार्किकाणां जातिघोटिक(?)वैयाकरणानामैकान्तिकच्छान्दसानां च दन्तकलहो न निवर्तिष्यते, यद्यपि च करणीय(?)सहृदयाः प्रस्रवणनिरोधबाधिता (?) इव नासासंकोचं करिष्यन्ति, तथापि परमार्थसहृदयैः कृतयोगक्षेमाः पाठान्तरमभिदध्महे—'अकृतविफले का नः पीडा गते हतजीविते' इति नायकस्यान्यासक्तिलक्षणस्य नायिकायाः प्रीतिलक्षणस्यान्तरस्य प्रतीतिजनको भावो नामालंकारः । यदुक्तम्—'अभिधेयमभिदधानं तदेव तदसदृशसकलदोषगुणम् । अर्थान्तरमवगमयति वाक्यं तदसौ परो भावः' इति ॥

काचित्स्वैरिणी जरदभिसारिकया सोपदेशमभिधीयते—

उरसि निहितस्तारो हारः कृता जघने घने
कलकलवती काञ्ची पादौ रणन्मणिनूपुरौ ।
प्रियमभिसरस्येवं मुग्धे त्वमाहतडिण्डिमा
यदि किमधिकत्रासोत्कम्पं दिशः समुदीक्षसे ॥ ३१ ॥

हे मुग्धे, यदि त्वमित्थं वादितपटहा प्रियं प्रत्याभिमुख्येन गच्छसि, तदा अधिकत्रासेनोत्कम्पो यत्र तद्यथा भवत्येवं ककुभः किमित्युत्कंधरमीक्षसे । एवमाहतडिण्डिमा । एवं कथमित्याह—वक्षसि पारिप्लवं मुक्तादाम न्यस्तम् । शब्दायमाना मेखला नितम्बे

१. 'त्रासोत्कम्पा' इति शृङ्गारदीपिका.

Digitized by Microsoft ®

निवेशिता । किंविशिष्टे । घने । प्रचुरपरिणाहिनीत्यर्थः । चरणौ च शिञ्जानरत्नमञ्जीरौ । हारश्चाकचक्यायमानतया प्रकाशकः, काञ्चीनूपुरौ-न्च सशब्दत्वेन । पादौ रणन्मणिनूपुरावित्यत्र यद्यपि बहुव्रीहिणैव प्रकाशमानात्मकोऽर्थः संघटते, तथाप्युरसि हारवज्जघने काञ्चीवदाधाराधेयभावेनाप्रयोगादुपक्रमभङ्गो दूषणम् । ईषद्दूषणत्वाच्चादूषणप्रायम् । मुग्धे इत्यत्र मोहः प्रियसंगमौत्सुक्यवती विह्वलतैव अन्यथोपलम्भकारणानि भङ्क्त्वा किमित्यभिसरणमारभते । आहतडिण्डिमेत्यत्र लक्षणया सुप्रकाशकत्वमर्थः । अधिकत्रासोत्कम्पमित्यत्र च संकल्पकल्पितेन प्रियसमागमेन सात्त्विक एव तावदुत्कम्पः । त्रासेन पुनरधिक इति । अथ चाहतडिण्डिमा यदि प्रियमभिसरसि तदा किमद्यापि दिशः समुदीक्षसे । वेगेन गत्वा समीहितं साधयेति साभ्यसूयं कार्यशिक्षा । विषमोऽलंकारः । यदुक्तम्—'विषम इति प्रथितोऽयं वक्ता विघटयति कमपि संबन्धम् । यत्रार्थयोरसन्तं परमतमाशङ्क्य तत्सत्त्वे ॥' यथा—'यो यस्य नैव विषयो न स तं कुर्यादहो बलात्कारः । सततं खलेषु भवतां क्व खलाः क्व च सज्जनस्तुतयः ॥' अभिसारिकाश्च प्रदोषेषु विवाहादिप्रकरणेषु मध्याह्नशून्येषु मार्गेषु वसन्तोत्सवे उद्यानयात्रासु विदूरेषु चैवंविधेष्वन्येष्वपि संविधानकेषु कामुकमभिसरन्ति । यदुक्तम्—'अटव्यामन्धकारे वा शून्ये वापि सुरालये । उद्याने वा सरित्कुञ्जे प्रदेशे गर्हितेऽथवा ॥ परदारेषु संकेतः कर्तव्यो रतिसिद्धये । दूतीवक्त्रेण निश्चित्य स्वयं तत्र पुरा व्रजेत् ॥ ततः प्राप्तां प्रियां शीघ्रं सेवेत रतिकोविदः । प्रेषयेदन्यमार्गेण स्वयमन्येन च व्रजेत् ॥ यथा न ज्ञायते कैश्चित्सुनिगूढो विचक्षणः ॥' अभिसारयन्ति च दूत्यो नायिकामनेककौतुकवासनाभिः । यदुक्तमीश्वरकामिते—'प्रागेव स्वभवनस्थां ब्रूयात् अमुष्यां क्रीडायां तव राजभवनस्थानानि रामणीयकानि दर्शयिष्यामीति । काले च योजयेत् । बहिः प्रवालकुट्टिमं ते दर्शयिष्यामि । मणिभूमिकां वृक्षवाटिकां मृद्वीकामण्डपिकां चित्रकर्माणि यन्त्राणि क्रीडामृगान्—' इत्यादि । भवननर्म चैतत् । यथा रत्नावल्यामालेख्यदर्शनावसरे—'जाणिदो मए एसो सव्वो वुत्तन्तो समं चित्तफलएण । ता गदुअ देवीए कहइस्सम् ।[1]' इत्यादि ॥

काचित्प्रोषितभर्तृका विरहार्तिमोहेन प्रतिविधानमाकाङ्क्षन्ती वर्षारम्भबलाहकं प्रत्याह—

मलयमरुतां व्राता याता विकासितमल्लिका-
परिमलभरो भग्नो ग्रीष्मस्त्वमुत्सहसे यदि ।
घन घटयितुं तं निःस्नेहं य एव निवर्तने
प्रभवति गवां किं नश्छिन्नं स एव धनंजयः ॥ ३२ ॥

हे घन, चैत्रीयाश्चन्दनसमीरा वहन्ति स्म । निदाघकालोऽपि पर्यवसितः । किं-

१. 'ज्ञातो मया एष सर्वो वृत्तान्तः समं चित्रफलकेन । तद्गत्वा देव्यै कथयिष्यामि ।' इति च्छाया.

Digitized by Microsoft®

विशिष्टः । दलितकोमलविचकिलानां परिमलभरो यस्मिंस्तथा । उभयोरप्युद्दीपनविभावयोः सुगन्धित्वोक्तिः । ताभ्यामपि प्रियो न मेलितः । अतएव वाता इति भग्न इति चाक्षमत्वोक्तिः । लोके ह्यप्रयोजके वायुरिति व्यपदिश्यते परिश्रान्ते च भग्न इति । उभावाक्षिप्य मेघमुत्तेजयति—यदि परं तं प्रियमुद्दीपनविभावोद्भमेऽपि स्वस्थावस्थत्वात्त्यक्तानुरागं मेलयितुं त्वमुद्यच्छसे । मेघागमे हि यथाकथंचिद्दूरदेशान्तरादप्यागत्य पान्थाः कान्ताभिः सह संगच्छन्ते । अमुमेवार्थमाख्यानेन द्रढयति—य एव गवां निवर्तने प्रत्यानयने क्षमते स एव धनंजयः । किमस्माकं त्रुटितम् । कोऽर्थः—वयं जीवाम एव । धनंजयपदमुचितम् । गोसमूहस्यापि धनशब्देन प्रसिद्धत्वात् । आख्यानकवाक्यान्तःपतितत्वात्किं नश्छिन्नमिति न गर्भितं नाम दूषणमाधत्ते । क्वचिदेवंविधस्य दोषस्यापि गुणप्रतीतेः । यथा काश्मीरकविह्लणस्य—'कृत्वा नूपुरमूकतां चरणयोः संयम्य नीवीमणीनुद्दामध्वनिपण्डितान्परिजने किंचिच्च निद्रायति । कस्मात्कुप्यसि यावदस्मि चलिता तावद्विधिप्रेरितः काश्मीरीकुचकुम्भविभ्रमधरः शीतांशुरभ्युद्गतः ॥' इत्यत्र कस्मात्कुप्यसीति । अत्र हि संकेतप्राप्तस्य कामुकस्य वैमनस्यमपनेतुं स्वविलम्बकारणमुदाहरन्ती स्वैरिणी वाक्यस्यान्तरेव प्रसत्तिजनकं कस्मात्कुप्यसीत्यवोचत् । तथा प्रोषितभर्तृकापि मेघात्संभाव्यमानेऽपि प्रियसमागमे संकल्पितसमीहितसिद्धिरसमाप्तेऽपि वाक्ये किं नश्छिन्नमिति संतोषव्यञ्जकं पदमुक्तवती ॥

काचिदेकग्रामप्रवासेन मन्दमन्दोद्दीपितमन्मथानलज्वालाभिभूततनुर्व्याधिव्यपदेशेन मानमन्युमनुभवन्ती सपत्ननायिकासक्तं नायकं प्रति सोल्लुण्ठकरुणोपन्यासमाचष्टे—

प्रातःप्रातरुपागतेन जनिता निर्निद्रता चक्षुषो-
मन्दाया मम गौरवं[1] व्यपगतं प्रोत्पादितं लाघवम् ।
किं[2] तद्यन्न कृतं त्वया मरणभीर्मुक्ता मया गम्यतां
दुःखं तिष्ठसि यच्च पथ्यमधुना कर्तासि तच्छ्रोष्यसि ॥ ३३ ॥

यद्यपि मानविषयस्यार्थस्यात्र मुख्यता तथापि संविधानकवशेन रुग्विषय एवार्थ आदौ प्रतिपाद्यते—प्रतिप्रभातमागतस्त्वम् । रोगिणो हि विशेषाविशेषपरिज्ञानमिष्टजनः प्रभात एवागत्य करोति । मम चक्षुषोर्निद्रा निवारिता । किंविशिष्टायाः । मन्दायाः सरुजः । दिवास्वापो हि निषिद्धः सव्याधेः । दृष्टौ हि मीलनोन्मीलनपरिज्ञानार्थमवनं कार्यमिति विशेषणं चक्षुषोरिति प्रसिद्धं युक्तम् (?) । अन्यथा जनिता निर्निद्रितेत्येतावतैव पूर्यते । उचितप्रतिविधानैरेव यत्र पारवश्यं व्यपगतम् । अन्तर्भूतकारितार्थत्वे व्यपग मि तमिल्यर्थः । अन्यथा नायककर्तृकयोर्निद्रानिरोधलाघवोत्पादनवाक्ययोरन्तरा गौरवं स्वयमेव व्यपगतमिति प्रयोक्तुं न युज्यते । स्फूर्तिमत्त्वं प्रकर्षेणोत्पादितम् । अथवा किं बहुना,

१. 'गौरवव्यपनयादुत्पादितं' इति शृङ्गारदीपिका. २. 'किं मुग्धेन कृतं त्वया रमणभीः' इति शृङ्गारदीपिका.

Digitized by Microsoft ®

किं तत्समयोचितं न कृतं त्वया । अपि तु सर्वं कृतम् । अत एव मृत्युभयं परित्यक्तं मया । अतःपरं निःसंशयं जीविष्यामीत्यर्थः । इदानीं गम्यताम् । यतः कृच्छ्रमास्ते भवान् । यच्चेदानीं मुद्गरसप्रायं पथ्यं करिष्यामि तदाकर्णयिष्यसि । कोऽर्थः—पथ्यं श्रुतिविषयमेवास्तु, न तु दृष्टिविषयम् । दृष्टिविषये किल भवदीयकार्यसंकोचक्लेशकारिणी वेला लगिष्यति । अथ प्रातःप्रातरुपागतोऽसि, न तु रात्रौ । तदा हि कदाचित्संगमावकाशोऽपि संभवति । अन्यच्चान्याङ्गनासङ्गशंसीन्यधरक्षतादीन्यपि प्रातर्दृश्यन्ते । तानि चाक्षिद्वःखमुत्पादयन्ति । अत एव जनिता निर्निद्रता चक्षुषोः । अन्यथा विरहवेदनाजागरितसकलरात्रेर्दिवा कदाचिन्निद्रापि मुहूर्तं घटते । कचाकर्षणताद्यकरणादक्षमायमम बहुमानो व्यपगमितः । तुच्छता तु प्रकर्षेण जनिता । अथ वा किं तयत्त्वया विरुद्धं न कृतम् । अत एव मया मरणे निश्चयः कृतः । तदितः स्थानाद्गम्यताम् । यतोऽत्र दुःखं तिष्ठसि । तत्रैव ते सुखमित्यर्थः । यच्चेदानीं प्राणपरित्यागलक्षणमुचितं करिष्यामि तदवश्यं श्रोष्यसि । न तु कर्णपिधानादिना शोकावेगं सूचयिष्यसि । तवैव समीहितत्वात् । कर्तासीत्यत्र लुटि उत्तमैकवचनम् । मन्दामशब्दशक्त्युद्भव उपमालंकारः । यथा सरागा वराकीति संभाव्यते तथा त्वयाहं संभावितेति प्रतीतेः । यदुक्तम्—'ननु शब्दशक्त्या यत्रार्थान्तरं प्रकाशते स यदि ध्वनेः प्रकार उच्यते तदानीं श्लेषस्य विषयोऽपहृत एव स्यात् । नापहृत इत्याह—'आक्षिप्त एवालंकारः शब्दशक्त्या प्रकाशते । यस्मिन्नुक्तः शब्देन शब्दशक्त्युद्भवो हि सः' ॥

कस्यांचिदनुरक्तः कश्चित्स्वयं सवितर्कमनुसंधत्ते । विस्रम्भपात्रस्य वा प्रतिविधानप्रत्याशया कस्याप्यग्रे निवेदयति—

सा बाला वयमप्रगल्भमनसः सा स्त्री वयं कातराः
सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयम् ।
साक्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं
दोषैरन्यजनाश्रयैरपटवो जाताः स्म इत्यद्भुतम् ॥ ३४ ॥

सा अनिर्वचनीया मुग्धा, वयं च तदप्राप्तिपर्याकुलतया अप्रगल्भमनसः । अथ च यत्रैव बाल्यं तत्रैवाप्रगल्भमनस्कत्वं युज्यते । सा स्त्री, वयं च तां विना स्थातुं न शक्नुम इति गतधैर्याः । अथ च यत्रैव स्त्रीत्वं तत्रैव कातरत्वमुचितं भवति । सा पीनं चोन्नतिमच्च एवंविधं स्तनयुगलं बिभर्ति, वयं च तद्गाढालिङ्गनमप्राप्नुवन्तः सखेदाः । अथ च य एव गुरुपदार्थभारं वहति स एव सखेदो दृश्यते । 'भरं' इति पाठे स्तनभारं बिभर्तीत्यर्थः । अत्र पाठे धरभरमित्यनुप्रासालंकारः । भारश्च साक्षादुक्तः । पूर्वत्र तु पाठे पीनोन्नतिमत्त्वेन भार आक्षिप्यत इति । सा महता नितम्बभरेणाक्रान्ता, वयं च तां तत्प्राग्भारलीलालसगामिनीं स्मरन्तो जडिम्ना गन्तुं न क्षमाः । अथ च य एव महता भारेणाक्रान्तो भवति स एव गन्तुं न शक्नोति । एवं सत्यन्यजनावलम्बिभिर्दोषैर्वयमसौष्ठवाः

Digitized by Microsoft ®

संवृत्ता इत्याश्चर्यमेतत् । असंगतिरलंकारः । यदुक्तम्—'विस्पष्टं समकालं कारणमन्यत्र कार्यमन्यत्र । यस्यामुपलभ्येते विज्ञेयाऽसंगतिः सेयम् ॥' दोषैरित्यत्र विपरीतलक्षणया गुणैरित्यर्थः । अत एवानिर्वचनीयतायोतकः सर्वत्र साशब्दः । अथ च तस्या एव दोषो या यथाकथंचिदागत्य संकेते मया सह न संगच्छत इत्यभिप्रायः । अन्यच सा बाला चेष्टाविशेषानुमेयानुरागापि प्रच्छन्नचाराद्ययोग्यतया संगमोपायं न जानातीत्युभयानुरागः। एकानुरागे हि शृङ्गाराभास एव स्यात् । यथा बालरामायणस्योन्मत्तदशाननाङ्के । तत्र हि मुलभानेकस्त्रीरत्नस्यापि रावणस्य यदप्राप्तावुन्मादो जातस्तस्याः प्राणेश्वररामचन्द्रैकचेतसो जानक्याः स्पृहणीयतातिशयः प्रतिपादितो भवति, न तु रसोपनिबन्धः । उभयानुरागाभावात् ॥

काचिद्भाविप्रोषितभर्तृका आत्मानं प्रति सोपालम्भमाचष्टे—

प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं
धृत्या न क्षणमासितं[1] व्यवसितं चित्तेन गन्तुं पुरः ।
यातुं निश्चितचेतसि प्रियतमे सर्वे[2] समं प्रस्थिता
गन्तव्ये सति जीवित प्रियसुहृत्सार्थः किमु[3] त्यज्यते ॥ ३६ ॥

हे जीवित, कृत्याकृत्यविवेकपराङ्मुखतया प्रियतमे देशान्तरं गन्तुं निःसंदेहमनसि सति सर्वे सुहृदः सहैव प्रचलिताः । कथमित्याह—प्रस्थानं वलयैरित्यादि । दौर्बल्यवशेन पतनशीलतया हस्ताभरणैः प्रस्थानं कृतम् । किं विशिष्टैः । प्रियसखैः वल्लभसहचरैः । प्रिये तिष्ठति तिष्ठद्भिर्गच्छति गच्छद्भिरित्यर्थः । एवमस्रादिष्वपि प्रियसखत्वं योज्यम् । अस्रैरप्यनवरतं गतम् । अश्रूणामप्रवृत्तिरेवावस्थितिः गतिश्च प्रवृत्तिरेव । न त्वभाव एव । तथा सत्यश्रूणामभाव एव स्यात् । संतोषेण क्षणमपि न स्थितम् । मनसापि पुनः प्रथममेव गन्तुमुपक्रान्तम् । तत्त्वयाप्यवश्यगन्तव्ये सति कुतो हेतोः प्रियसुहृत्संघातः परित्यज्यते । गम्यतामेवेत्यर्थः । आस्तां तावत्प्रियतमे गते, गन्तुं निश्चितचेतस्यपि नायिका जीवितनिरपेक्षा बभूवेति भावः । सहोक्तिरलंकारः । यदुक्तम्—'भवति यथारूपोऽर्थः कुर्वन्नेवापरं तथारूपम् । उक्तिस्तस्य समाना तेन समं या सहोक्तिः सा ॥' यथा—'कष्टं सखे क्व यामः सकलजगन्मन्मथेन सह तस्याः । प्रतिदिनमुपैति वृद्धिं कुचकलशनितम्बभित्तिभरः' ॥

संदष्टेऽधरपल्लवे सचकितं हस्ताग्रमाधुन्वतीं
मा मा मुञ्च शठेति कोपवचनैरानर्तितभ्रूलता ।
सीत्काराञ्चितलोचना सरभसं वैश्वुम्बिता मानिनी
प्राप्तं तैरमृतं श्रमाय मथितो मूढैः सुरैः सागरः ॥ ३६ ॥

---

१. 'आस्थितं' इति शृङ्गारदीपिका. २. 'सर्वैः समं प्रस्थितं' इति शृङ्गारदीपिका. ३. 'किमुत्सृज्यते' इति शृङ्गारदीपिका..

Digitized by Microsoft ®

तैरेव पीयूषं लब्धं यैः सहर्षोत्तरलं मनस्विनी चुम्बिता । अधररस एवामृतमित्यर्थः । यावदप्रसादं हि मानिनी महान्तं संतापमुत्पादयति, प्रसन्ना च लोकोत्तरमानन्दम् । अत एवाचेतनैरमरैः खेदाय विलोडितः क्षीरोदः । किं कुर्वती चुम्बिता, दष्टाधरत्वात्करायं समन्ताद्धुन्वती । कथम् । सचकितम् । चकितमत्र चमत्कृतिरेव । क्व सति । ओष्ठप्रवाले हठात्खण्डिते सति । किंविशिष्टा । सविलासतरङ्गितभ्रूवल्लिः । कैर्विशिष्टा । मा मा मुञ्च शठेति कोपवचनैः । मा मेति पर्याकुलताप्रतिपादकाभ्यां शब्दाभ्याम्, मुञ्चेति क्रियया च संभोगाभियोगस्य निषेधः । न तु ताभ्यां मुञ्चेति क्रियायाः । कोपस्य वचनैरेव, न तु वास्तवेन कोपेन । पुनः कीदृशी । सीत्काराञ्चितलोचना सीत्कारपूर्वकं विलासदशास्पर्शेन कूणिते लोचने यया सा तथोक्ता । कलहरूपं चैतत्सुरतम् । यदुक्तम्—'कलहरूपं सुरतमाचक्षते । विवादात्मकत्वाद्वामशीलत्वाच्च कामस्य' इति । सीत्कारः कामिनीनां दयितस्पर्शसुखातिशयेन हृदयोल्लासचमत्कारपूर्वकः श्वसितात्मा मन्मथोद्दीपनो मुखस्य चेष्टाविशेषः । आक्षेपोलंऽकारः । यथा—'कृतः कुवलयं कर्णे करोषि कलभाषिणि । किमपाङ्गमपर्याप्तमस्मिन्कर्मणि मन्यसे ॥' अनुभवी वक्ता । यदपि चामी श्लोकाः संभोगमीर्ष्यामानं प्रणयमानेन, प्रणयमानमभिसरणेन, अभिसरणं प्रवासविप्रलम्भेन, तिरयन्ति तदपि कवेरभिसंधानम् । अतिनिरन्तरमेकरसोपनिबन्धोऽप्युद्वेजको भवति । यथा नाटकादावभिनेयः सान्तरोपनिबन्धो रसश्चमत्कारी स्यात्तथैवंविधकाव्येषु श्रव्योऽपीति । किलकिञ्चितं चात्र नाट्यालंकारः । यदुक्तम्—'क्रोधाश्रुहर्षभीत्यादिसंकरः किलकिञ्चितम् ।' यथा—'रतिक्रीडायुते कथमपि समासाद्य समयं मया लब्धे तस्याः क्षणितकलकण्ठार्धमधरे । कृतभ्रूभङ्गासौ प्रकटितविलक्षार्धरुदितस्मितक्रोधोद्भ्रान्तं पुनरपि विदध्यान्मयि मुखम् ॥' 'सानन्दान्तः कुट्टमिते कुप्येत्केशाधरग्रहे' इत्यनेन कुट्टमितमपीति ॥

कांचिन्मर्मसख्याः पुरतः कथयति—

सुप्तोऽयं सखि सुप्यतामिति गताः सख्यस्ततोऽनन्तरं
प्रेमावेशितया मया सरलया[1] न्यस्तं मुखं तन्मुखे ।
ज्ञातेऽलीकनिमीलने नयनयोर्धूर्तस्य रोमाञ्चतो
लज्जासीन्मम तेन साप्यपहृता तत्कालयोग्यैः क्रमैः ॥ ३७ ॥

हे सखि, अयं ते दयितः सुप्तैस्तस्मादस्माभिरपि सुप्यतामिति मां प्रत्युक्त्वा सख्या गताः । ततः प्रघटनानन्तरं प्रेमग्रहगृहीतया तत्रापि प्राञ्जलया मया प्रियमुखे स्वमुखं निवेशितम् । अथ तस्य धूर्तस्य रोमाञ्चचिह्नेन नेत्रयोर्मिथ्यासंकोचने ज्ञाते मम व्रीडा बभूव । तेन च संभोगसमयोचिताभिर्नीवीव्यपनयनप्रायाभिः परिपाटीभिः सापि लुण्ठिता । कोऽर्थः—अहमपि तत्कालोचितप्रवृत्तिरभूवम् । सुप्यतामिति पदस्याग्रे

---

१. 'तरलया' इति शृङ्गारदीपिका.

Digitized by Microsoft®

उक्त्वेत्यध्याहरणीयम् । सुप्तमुखचुम्बनं च नायिकानां रागोद्दीपनम् । यदुक्तम्—'सुप्तस्य मुखमालोकयन्त्याः स्वाभिप्रायेण चुम्बनं रागोद्दीपनम्' इति । यच्च तेन रिरंसुना विजनमाकाङ्क्षतालीकनिमीलनं कृतं तत्सख्यो जानन्ति, अत एवायमित्यर्थान्तरसंक्रमितत्वेन धूर्तोऽस्मन्निर्गमाय सुप्त इत्युपन्यस्य स्वयमुत्थाय गताः । अर्थान्तरसंक्रमितस्योदाहरणमेतत्—'स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः । कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव ॥' अत्र हि पितृमरणादिदुःखसहनक्षमत्वविशिष्टो राम इति संज्ञा प्रतीयते न तु संज्ञिमात्रम् । यदुपज्ञेन ध्वनिवर्त्मना संचरमाणाः सचेतसः प्रहर्षं प्राप्नुवन्ति तेषामाचार्याणामुक्तिषु मीमांसायां के वयम् । परं तथाप्यात्मावबोधार्थमिदमुदाहरणं परामृशामः—ननु सर्वसहत्वे हेतुभूतकठोरहृदयत्वेनैव राम इति संज्ञिनो वैशिष्ट्यमुच्यते । यदि कठोरहृदयत्वमत्र सर्वसहत्वे हेतुभूतमभविष्यत्तदा राम इति पदमेव न प्रायोक्ष्यत । वैदेही तु कथं भविष्यतीत्यनेनैव दाशरथिप्रतीतेः । तस्मात्कठोरहृदयत्वविशिष्टस्यैव संज्ञिनस्तत्त्वान्तरं ध्वनयितव्यम् । येन मया प्रवासकाले मातृभिः स्थाप्यमाना त्वमयोध्यायामुपेक्षिता सोऽहं शतकोटिकोटिकर्कशचेताः सर्वसहः । नहि मया त्वमाहूता, अपि तु स्वयमागता । यथा—'कृतकुपितैर्बाष्पाम्भोभिः सदैन्यविलोकितैर्वनमपि गता यस्य प्रीत्या धृतापि तथाम्बया । नवजलधरश्यामाः पश्यन्दिशो भवतीं विना कठिनहृदयो जीवत्येव प्रिये स तव प्रियः ॥' यच्चालोचनकारेण पितृमरणादिदुःखसहनक्षमत्वं ध्वनिविषयीकृतं तदसत् । दुःखस्य विजातीयत्वात् । नहि प्रियाविरहसंतप्तः पुमाञ्जीवतो लोकान्तरितस्य वा पितुः स्मरति ॥

काचिन्मानिनी बहुभिरुपायैरतिनिर्बन्धप्रसादनेन गतकल्पं मानं परित्यक्तुमनाः प्रियं प्रति ब्रवीति—

कोपो यत्र भ्रुकुटिरचना निग्रहो[1] यत्र मौनं
यत्रान्योन्यस्मितमनुनयो दृष्टिपातः[2] प्रसादः ।
तस्य प्रेम्णस्तदिदमधुना वैशसं पश्य जातं
त्वं पादान्ते लुठसि न च मे मन्युमोक्षः खलायाः ॥ ३८ ॥

तस्यावयोरेवंविदितस्य प्रेम्णस्तदिदमतिगर्हितमधुना वैशसं विनाशो जातः पश्य, मान्धो भूः । तस्य कस्येत्याह—यत्र प्रणयकलहेषु भ्रुकुटेरभिनय एव रोषः । वाक्पारुष्येणापि मनसो दूषयितुमशक्यत्वाद्वचननिरोध एव यस्मिन्निग्रहः । क्रीडाकमलादिनापि ताडनस्य दुष्करत्वात्परस्परमनुवृत्तिवशीकरणव्यञ्जकमीषद्धसितमेव प्रसादनम् । सामदानाद्युपायानामपि भेदसूचकत्वात् । उभयोरपि तुल्यकालमेव प्रसादनमभिलषितमिति प्रतिपादयितुमन्योन्यशब्दप्रयोगः । दृष्टिक्षेप एव यत्रानुग्रहः । चरणपतनाद्यसंभवे

१. 'विग्रहो' इति शृङ्गारदीपिका. २. 'यत्र दृष्टिः प्रसादः' इति शृङ्गारदीपिका.

Digitized by Microsoft®

बाहौ धृत्वोत्थापनादिसंप्रतिपत्तेरभावात् । कीदृशं प्रेम्णो वैशसमित्याह—त्वमुरःस्थैकधारणीयः पादसमीपे लुठसि, न तु पादयोः । अपराधातिशयाभावात् । न च मे दुर्जन्याः स्वान्तस्थस्य क्रोधशल्यस्य परित्यागः । कोऽर्थः तथा निःशङ्केन किमप्याचरितं यथाहमप्यनन्यशरणा ते दुर्जनी जाता । अवसरोऽलंकारः । यदुक्तम्—'अर्थान्तरमुत्कृष्टं सरसं यदि वोपलक्षणीक्रियते । अर्थस्य तदभिधानं प्रसङ्गतो यत्र सोऽवसरः ॥' यथा—'तदिदमरण्यं यस्मिन्दशरथवचनानुपालनव्यसनी । निवसन्बाहुसहायश्चकार रक्षःक्षयं रामः ॥' धीराधीरा प्रगल्भा मध्या नायिका । चतुर्थवाक्ये यत्रशब्दप्रयोगाभावादुपक्रमभङ्गः ॥

सुतनु जहिहि मौनं पश्य पादानतं मां
न खलु तव कदाचित्कोप एवंविधोऽभूत् ।
इति निगदति नाथे तिर्यगामीलिताक्ष्या
नयनजलमनल्पं मुक्तमुक्तं न किंचित् ॥ ३९ ॥

मानिन्या मानत्यागसूचकं बाष्पसलिलमस्तोकं दुर्निवारत्वेन मुक्तम्, प्रतिवचनं च न किंचिदुदीरितम् । किंविशिष्टया । तिर्यगामीलिताक्ष्या अपराधक्षपणलक्षणयापमानलज्जया साचि यथा भवत्येवं बाष्पनिरोधबुद्ध्या समन्तात्संकोचिते अक्षिणी यया सा तथोक्ता तया । क्व सति । नाथे निर्बन्धेनेति निगदति सति । इति किम् । हे सुतनु, मौनं त्यज । मानजनितातिकार्कश्याद्वाङ्निरोधहृदयाध्माननिरुच्छ्वासात्कुसुमशरजयश्रीकार्मणमङ्गनिर्माणमिदं दुर्दशां मा नैषीरिति भावः । अथवा यदि वचनामृतैरभिषिच्य मां संतप्तं नाह्लादयसि तर्हि चरणपतितं दृष्टिप्रसादेन संभावय । आत्मनः प्रियामानात्मकविप्रलम्भदुःसहताकारणमाह—निश्चयेन तव जातु कदाचिदीदृशः क्रोधो नासीत् । यदि चाभविष्यत्तदा तत्संस्कारवशादिदानीमपि सहिष्ये ॥

कश्चिन्मर्मविदग्धो वियोगी तदेकतानेन मानिनीसर्वस्वमनुध्यायति—

गाढालिङ्गनवामनीकृतकुचप्रोद्भूतरोमोद्गमा
सान्द्रस्नेहरसातिरेकविगलच्छ्रोणीमन्नितम्बाम्बरा ।
मा मा मानद माति मामलमिति क्षामाक्षरोल्लापिनी
सुप्ता किं नु मृता नु किं मनसि किं लीना विलीना नु किम् ॥ ४० ॥

किं नु शयिता, उतखिदुपरतैव, अथवान्तःकरणेऽभेदं प्राप्ता, आहोखिद्व्रवतां ययौ, इत्यमुना संदेहेनानिर्वचनीयावस्था । मदकलकलहंसचञ्चुकोटिन्योटितकोमलमृणालिनीकिसलयवत्परिक्लान्तैरङ्गकैः प्राभातिकनीलेन्दीवरवन्मुकुलितेन लोचनयुगलेन विलयं गच्छन्ती नोपलब्धेत्यर्थः । तस्यापि तत्कालमानन्देन मन्दचेतनत्वात् । केन क्रमेणैवंविधा बभूवे-

---

१. 'प्रोद्भिन्न' इति शृङ्गारदीपिका. २. 'काञ्चीप्रदेशाम्बरा' इति शृङ्गारदीपिका.

Digitized by Microsoft®

त्याह—गाढेत्यादि । अतिनिर्भराश्लेषेणावामनौ वामनौ कृतौ यौ कुचौ तत्र प्रकर्षेणोद्भूतः पुलकोद्गमो यस्याः सा तथोक्ता । कथमुच्यापिनीति । मा, मा, मानद मानखण्डन, मा अतिशयेन । मामलमित्यत्र पीडयति क्रियां विना पर्याकुलतायोतकमर्थोक्तम् । मा मेत्यादि पौनरुक्त्यं च सुन्दरम् । अत्रापि यदि कथ्यते तदा वधू रुष्यति, यदि मौनाख्यते तदा गृहं नश्यति[1] । तथापि करुणवीभत्सस्मारकं मृतेति पदं न मानयामः । तस्मात् 'किं म्लाना शयिता नु किं मनसि मे लीना विलीना नु किम्' इति पठिष्यामः । संशयोऽलंकारः । यदुक्तम्—'वस्तुनि यत्रैकस्मिन्ननेकविषयस्तु भवति संदेहः । प्रतिपत्तुः सादृश्यादनिश्चयः संशयः स इति' ॥

अभिनवबुधा प्रथमनर्मारम्भे किं करोतीत्याह—

पटालग्ने पत्यौ नमयति मुखं जातविनया
हठाश्लेषं वाञ्छत्यपहरति गात्राणि निभृतम् ।
न शक्नोत्याख्यातुं[2] स्मितमुखसखीदत्तनयना
ह्रिया ताम्यत्यन्तः प्रथमपरिहासे नववधूः ॥ ४१ ॥

वस्त्राञ्चलाकर्षिणि प्रिये किंचिदङ्गीकाराज्जातप्रश्रया मुखं नमयति । बलात्कारेण परिरम्भमाकाङ्क्षति सत्यङ्गानि निभृतं यथा भवत्येवमन्यतो नयति । न तु मध्यावत्सभ्रूभङ्गाभ्यसूयाभिनयपूर्वकमपहरति । अत्रैवावसरे स्मितमुखीं वरसंनिधिं प्रापयितुमागतां सहचरीं प्रति क्षिप्तलोचना तत्कालोचितप्रियप्रश्नोत्तरमाख्यातुं न क्षमते । यदि कथमपि सखी नाभविष्यत्तदा सा कदाचित्किंचिदाख्यातुमप्यक्षमिष्यतेत्यर्थः । इत्थमन्तःकरणे लज्जया ताम्यति । लज्जा तस्याः प्रियतमस्वच्छन्दसंगमप्रतिकूला वैरिणी जातेत्यर्थः । यदुक्तम्—'दूरादुत्कण्ठन्ते दयितानां संनिधौ तु लज्जन्ते । ताम्यन्ति वेपमानाः शयने नवपरिणया वध्वः ॥' मुग्धानां च प्रियोपक्रान्तसंभोगच्छलारम्भ एवाकल्पिकेयमिति कौतुकिन्यः सख्यो न सत्वरमेव संनिधानमुज्झन्ति । जातिरलंकारः । यदुक्तम्—'संस्थानावस्थानक्रियादि यद्यस्य यादृशं भवति । लोके चिरप्रसिद्धं तत्कथनमनन्यथा जातिः ॥' 'हरति रुचिरं गाढाश्लेषे यदङ्गकमाकुला स्थगयति तथा यत्पाणिभ्यां मुखं परिचुम्बने । यदपि बहुशः पृष्टा किंचिद्ब्रवीत्यपरिस्फुटं रमयतितरां तेनैवासौ मनोऽभिनवा वधूः ॥' रते वामा मुग्धा नायिका । विहृतं नाम नाट्यालंकारः । 'प्राप्तकालं न यद्व्याद्रीडया विहृतं हि तत्' ॥

नोपेतोऽनुनयेन यः प्रियसुहृद्वाक्यैर्न यः संहृतो
यो दीर्घं दिवसं विषह्य विषमं यत्नात्कथंचिद्धृतः[3] ।

---

१. 'अशक्ता चाख्यातुं' इति शृङ्गारदीपिका. २. 'हृदये' इति शृङ्गारदीपिका.

Digitized by Microsoft®

अन्योन्यस्य हृते मुखे निहितयोस्तिर्यक्कथंचिद्दृशोः
सद्यो द्वाभ्यामतिविस्मृतव्यतिकरो मानो विहस्योज्झितः ॥ ४२ ॥

स प्रणयमानो द्वाभ्यामतिशयेन विस्मृतानुसंधानः स्वयं विहस्य मुक्तः । कयोः सत्योः । दृशोस्तिर्यक्कथंचिन्निक्षिप्तयोः । क्व । मुखे । कस्य । अन्योन्यस्य । किंविशिष्टे । कोपादन्यतो नीते । दृशोर्मुखे इत्युभयत्रान्योन्यस्येति संबन्धः । स कः । यः प्रसादनेन नापगतः । यः सखीप्रभृतीनां वचनैर्न शमितः । यश्च वियोगव्यथया दीर्घं विषयं च दिवसं प्रतिपाल्य गतकल्पोऽपि लाघवशङ्कया यत्नात्कथंचित्कथमपि व्यवस्थापितः । 'यत्नासंभाव्यभावो वा' इति विषममलंकारः ॥

काचिन्मनस्विनी दयितव्यलीकखेदं सख्याः कथयति—

गते प्रेमबन्धे प्रणयबहुमाने विगलिते
निवृत्ते सद्भावे जन इव जने गच्छति पुरः ।
तदुत्प्रेक्ष्योत्प्रेक्ष्य प्रियसखि गतांस्तांश्च दिवसा-
न्न जाने को हेतुर्दलति शतधा यन्न हृदयम् ॥ ४३ ॥

हे प्रियसखि, न वेद्मि किं कारणं यन्मे हृदयं शतधा न स्फुटति । कस्मिन्सतीत्याह—स्नेहानुबन्धे गते । अन्योन्यगुणवशीकारगौरवे गलिते । निष्प्रपञ्चनायां निवृत्तायाम् । विधेये प्रियतमे उदासीन इव गच्छति । किं कृत्वा हृदयं शतधा न याति, तत्पूर्वोक्तं पर्यालोच्य षड्गुण यत्नेति (?) लोकोक्तिः । न परं तदुत्प्रेक्षा । विधेयेन प्रेयसा सह व्यतीतांस्तानिर्वचनीयवासरान् । इदानींतनदुःखं प्राक्तनं सुखमनुस्मृत्येत्यर्थः । यथा किंचिदपक्वपात्रस्थितमवष्टम्भेन विना विदीर्यते तथा मानाध्मातं हृदयं प्रेमबन्धेन विना किमिति न स्फुटतीत्युक्तिश्लेशः । नायिकाः खलु सानुरागमपि नायकमीर्ष्याकालेषु निरनुरागं व्यपदिशन्तीत्येकानुरागो नात्र शङ्कनीय इति ॥

चिरविरहिणोरुत्कण्ठाश्लथीकृतगात्रयो-
र्नवमिव जगज्जातं भूयश्चिरादभिनन्दतोः ।
कथमिव दिने दीर्घे याते निशामधिरूढयोः
प्रसरति कथा बह्वी यूनोर्यथा न तथा रतिः ॥ ४४ ॥

बहुदिनवियोगिनोर्भागधेयैः संगतयोस्तरुणयोर्यथा लम्भकानुपलम्भकैर्भूयसी गृहदेशान्तरानुभूतवृत्तान्तकथा प्रसरति न तथा संभोगः । किंविशिष्टयोः । महता कष्टेन दीर्घेऽहनि व्यतीते सति रात्रिमधिरूढयोः । अथ च दीर्घं निःश्रेणिकाप्रायं पदार्थमतिक्र-

१. 'विहितयोः' इति शृङ्गारदीपिका. २. 'संबन्धे सपदि स्मितव्यतिकरे' इति शृङ्गारदीपिका. ३. 'प्रेमावेशे' इति शृङ्गारदीपिका. ४. 'उत्कण्ठार्त्या' इति शृङ्गारदीपिका. ५. 'याते दीर्घे' इति शृङ्गारदीपिका.

Digitized by Microsoft®

म्योश्चैरधिरुह्यते । प्राप्तयोरित्येतावन्मात्रे वाच्येऽधिरूढयोरिति लक्षणया लब्धोत्कर्षयोरित्यर्थः । यथा कश्चिदभिमानी गजस्कन्धाधिरूढः । संपूर्णमनोरथत्वेन किंचिन्न मानयति । दिन एव किंविशिष्टयोरित्याह—रत्युत्कण्ठाश्लथीकृतगात्रयोः । अस्मिन्दुरात्मनि दिने गते प्राप्तैकान्तौ स्वच्छन्दं रंस्यावह इति सुरतोत्कलिकया शिथिलीकृतान्यङ्गानि याभ्यां तयोः । रिरंसोर्हि प्रतिक्षणमुद्धूपितहृदयस्यावयवाः शिथिलीभवन्ति । पुनः कथंभूतयोः । भूयो नूतनमिव संसारमभिलक्ष्यीकृत्य समुद्भूतयोः । कदा । चिरात् । कोऽर्थः । अद्य प्राग्विरहनिष्फलत्वेन जगन्नष्टमिति ताभ्यां चिन्तितम् । वह्नीशब्दस्यायमभिप्रायः—रतिरपि वह्नी परं कथामानेन न भवति । सुरतान्तरालेषु परस्परवृत्तान्तोपवर्णनप्रश्नपरम्पराभिर्विभावरी प्रयाति, निद्रायाः कथैव नास्तीति तात्पर्यम् ॥

दीर्घा वन्दनमालिका विरचिता दृष्टैव नेन्दीवरैः
पुष्पाणां प्रकरः सितेन रचितो नो कुन्दजात्यादिभिः ।
दत्तः[1] स्वेदमुचा पयोधरभरेणार्घो[2] न कुम्भाम्भसा
स्वैरेवावयवैः प्रियस्य विशतस्तन्व्या कृतं मङ्गलम् ॥ ४५ ॥

यथ कश्चिद्वशीकर्तुकामः सर्वाधिकारेषु स्वीयमेव कुटुम्बं नियुङ्क्ते तथा दयितस्य गृहं प्रविशतः कृशाङ्ग्याः स्वैरेवाङ्गैर्मङ्गलमुपढौकितम् । किं तदित्याह—दीर्घेत्यादि । उत्सवेषु या तोरणादिसंनिवेशनीया लोकप्रसिद्धा वन्दनमाला सा दृष्टैव दीर्घा सूत्रिता न तु कुवलयैः । कुसुमानामितस्ततः प्रक्षेप ईषद्धसितेनैव निर्मितो न पुनर्मालत्यादिभिः । स्वेदस्यन्दिना स्तनप्राग्भारेणैवार्घः संपादितः, न तु कलशतोयेन । दृष्टैवेत्यत्र य एवकारः स एव स्मितेनेत्यत्र पयोधरभरेणेत्यत्र चानुवर्तते । वन्दनमालिकेत्यत्र स्वार्थे कप्रत्ययः । न तु हस्वार्थे । तथासति दीर्घेत्यस्यानुपपद्यमानत्वात् । दैर्घ्येण स्निग्धश्यामलत्वेन पक्ष्मलत्वेन च दृष्टैव यदर्थः साधितस्तैरिन्दीवरैः किम् । सौकुमार्येण वैशद्येन परिमलेन च स्मितेनैव यत्कार्यमनुष्ठितं तेन पुष्पप्रकरेणालम् । काठिन्येन प्रथिम्ना सजलत्वेन गरिम्णा च पयोधरेणैव यद्विधेयं संपादितं तेन कुम्भाम्भसा पर्याप्तमित्याक्षेपोऽलंकारः । इन्दीवरैः कुन्दजात्यादिभिरिति बहुवचनापेक्षया दृष्टिस्मितयोरेकवचनेन महानुत्कर्षः । अयमवश्यं गृहप्रवेशो देशान्तरादागतस्यावधार्यमाणो रसपुष्टिमाधत्ते । अत एव तन्व्येति । 'भाविन्यागमने भर्तुरात्मानं च गृहं च या । अलंकरोति हर्षेण सा स्याद्वासकसज्जिका ॥' इत्यनेन तत्कालं वासकसज्जा नायिका ॥

अद्य त्वमन्यादृशी, वयमेव दुर्जनीभूताः स्मः । युवां पुनरभिन्नावेवेति सस्मितं सख्या प्रभाते पृष्टा काचित्तां प्रत्याह—

कान्ते सागसि शापिते[3] प्रियसखीवेषं विधायागते
भ्रान्त्यालिङ्ग्य मया रहस्यमुदितं तत्संगमाकाङ्क्षया ।

---

१. 'दत्तम्' इति शृङ्गारदीपिका. २. 'अर्घ्यम्' इति शृङ्गारदीपिका. ३. 'यापिते' इति शृङ्गारदीपिका.

Digitized by Microsoft®

मुग्धे दुष्करमेतदित्यतितमामुद्दामहासं बला-
दाश्लिष्य च्छलितास्मि तेन कितवेनाद्य प्रदोषागमे ॥ ४६ ॥

सापराधे प्रेयसि यद्यस्मद्गृहमागच्छसि तदामुकशपथस्त्वेति निवारितेऽप्यमुकसखीवेषं कृत्वा प्राप्ते सति मया निजवयस्याभ्रमेण परिरभ्य प्रियसंगमस्पृहया स दुरात्मा यद्येवं परिरभ्यत इत्यादिकमपि रहस्यमुक्तम् । अथ सिद्धसमीहितेन तेन शठेन मुग्धे यदेतत्त्वयोक्तं तन्मम दुष्करमित्युक्त्वा निरतिशयेन सशब्दहासं यथा भवत्येवं हठादालिङ्ग्याद्य रजनीमुखसमये वञ्चितास्मि । तदाहं तमज्ञास्यम् । भवादृशीनां सखीनामेव भ्रमेण मुष्टास्मीति भावः । अत्र कामुकस्य हठाश्लेष उद्दामहासोपलम्भेन नायिकाया अपसरणं सूचयति । अन्यथा सखीभ्रमेण स्वयं कृताश्लेषायाः कीदृशं हठालिङ्गनम् । मुग्धे इत्यत्र पत्यौ सखीमोहः रहस्यमुदितमित्यनेन काममोहश्च । रसान्तरं प्रसादनोपायः । यथा—'अभिव्यक्तालीकः सकलविफलोपायविभवश्चिरं ध्यात्वा सद्यः कृतकृतकसंरम्भनिपुणम् । इतः पृष्ठे पृष्ठे किमिदमिति संत्रास्य सहसा कृताश्लेषां धूर्तः स्मितमधुरमाश्लिष्यति वधूम् ॥' समयाभियोगश्चायं नायकस्य । यदुक्तम्—'प्रदोषे निशि तमसि च योषितो मन्दसाध्वसाः सुखेन सुरतव्यवसायिन्यो रागवत्यश्च भवन्ति' इति । प्रदोषागमे छलिते-त्युचितम् । अन्यस्यापि यस्य भूतादिच्छलनं भवति तस्य प्रदोषे प्रायः श्रूयते । अद्य प्रदोषागमे इत्यत्राद्यशब्दो विचार्यते—यदैव सा छलिता तदैव नायकः संप्रतिपत्तिमात्रं कृत्वा गत इति तावन्न घटते । यतो मानिनी सखीवेषप्रायोपायकष्टप्रसादिता सर्वां शर्वरीं लालनीया भवति । अगते च तस्मिन्प्रदोषसमयानन्तरं कस्याग्रे कथं वा स्ववृत्तान्तं निवेदयति । न चैवंविधानि वाक्यानि मनोगतानि घटन्ते । ततश्चाद्यशब्दः कथमुपपद्यते । अत्रोच्यते—लोकोक्तिमात्रमेतत् । यथा व्यतीतरात्रिवृत्तान्तेऽप्युपवर्ण्यमाने अद्य रात्रौ मया स्वप्नो दृष्ट इति व्यवह्रियते । तथा अद्य प्रदोषागमे इत्यत्रापि ॥

कश्चिद्वियोगी प्रियतमामानवृत्तान्तमनुस्मरति—

आशङ्क्य प्रणतिं पटान्तपिहितौ पादौ करोत्यादरा-
द्व्याजेनागतमावृणोति हसितं न स्पष्टमुद्वीक्षते ।
मय्यालापवति प्रतीपवचनं सख्या सहाभाषते
तन्व्यास्तिष्ठतु निर्भरप्रणयिता मानोऽपि रम्योदयः ॥ ४७ ॥

तन्व्यास्तावदास्तां निरन्तरमनुवृत्तिपरता, यावन्मानोऽपि रमणीयोदयः । सर्वास्ववस्थासु स्पृहणीयेति भावः । कथमित्याह—आशङ्क्येत्यादि । एष प्रणामं करिष्यतीति चेष्टाविशेषैरनुमीय प्रयत्नाद्वस्त्राञ्चलावगुण्ठितौ स्वचरणौ विदधाति । न त्वन्यतो नयति । कोपस्य स्वल्पत्वात् । पूर्वानुभूतस्य कस्यचिन्मर्मण उल्लेखेनाकस्मादागतं हास्यं किमिद-

१. 'दुष्कर एष इत्यतितरामुक्त्वा सहासं बलादालिङ्ग्य' इति शृङ्गारदीपिका.
२. 'वचना सख्या समं भाषते' इति शृङ्गारदीपिका.

Digitized by Microsoft ®

मिति । मिथ्यापदार्थनिर्वर्णनार्थं ग्रीवावलनापदेशेन रुणद्धि । व्यक्तं नावलोकते । मय्यन्यतोमुखेऽन्तरान्तरा पश्यतीत्यर्थः । मयि वाङ्मिश्रणार्थमालापयुक्ते तदन्तरार्थं सख्या सह विपरीतवचनमाचष्टे । लेशोऽलंकारः । यदुक्तम्—'दोषीभावो यस्मिन्गुणस्य दोषस्य वा गुणीभावः । अभिधीयते तथाविधकर्मनिमित्तः स लेश इति' ॥

[1]यावन्त्येव पदान्यलीकवचनैरालीजनैः पाठिता
तावन्त्येव कृतागसो द्रुततरं [2]संलप्य पत्युः पुरः ।
[3]प्रारेभे परतो यथा मनसिजस्येच्छा तथा वर्तितुं
प्रेम्णो मौग्ध्यविभूषणस्य सहजः कोऽप्येष कान्तः क्रमः ॥ ४८ ॥

मुग्धा यावन्त्येव पदानि व्यलीकवचनैः कृत्वा सखीजनैः शिक्षिता तावन्त्येव कृतापराधस्य भर्तुरग्रे अनन्यसामान्योऽयमर्थो मयैव केवलं साधित इत्यद्भुतातिशयेन शुकवदुच्चार्य तदनन्तरं यथा मनसिजस्येच्छा तथा चेष्टितुमुपचक्रमे । संभोगप्रवणा बभूवेत्यर्थः। यतः प्रेम्णो मौग्ध्येन शोभमानस्याकृत्रिमः कोऽप्यनिर्वचनीयः सुन्दरः प्रकारः । अलीकवचनैरित्यत्रालीकशब्दो व्यलीकवदपराधार्थः । यथा—'अभिव्यक्तालीकः' इत्यादि । तेनापराधे यानि वचनान्युच्यन्ते तैरलीकवचनैः, न तु प्रणयमानार्थं मिथ्यापराधारोपकैरिति । अन्यथा कृतागस इत्यस्यानुपपद्यमानत्वात् । संलप्येति क्त्वाप्रत्ययेन पूर्वकालतायां प्रतिपादितायां मनसिजस्येच्छावर्तनस्य यद्यपि परत्वं स्वतःसिद्धं तथाप्यमुकं कृत्वा पश्चादमुकं कर्तव्यमिति लोकोक्त्या परतःशब्दो नाधिकः ॥

दूरादुत्सुकमागते विवलितं संभाषिणि स्फारितं
संश्लिष्यत्यरुणं गृहीतवसने [4]कोपाञ्चितभ्रूलतम् ।
मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णेक्षणं
[5]चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि ॥ ४९ ॥

अहो आश्चर्यम् । यज्जातापराधे प्रियतमे मानिन्याश्चक्षुरनेकरूपतादक्षिणं संवृत्तम् । कथं तथा जातमित्याह—दूरादित्यादि । यदि तमपराधकारिणं पश्यामि तदा शिक्षां ग्राहयामीत्युत्पन्नकोपावेगेन दूरस्थे तस्मिन्नुत्सुकम् । सविधं प्राप्तेऽवधीरणयान्यतो नीतम् । वक्तुं प्रवृत्ते सत्यपि निःशङ्को वदन्वर्तत इत्याक्षेपवुद्ध्या स्फारितम् । बलादालिङ्गितुमुपनते बहुमानयोग्यामेवं मां धृष्यतीति रोषेण लोहितम् । धृतवस्त्रे कोपकुञ्चितभ्रूलतम् । अत्रारुणतासकाशादञ्चितभ्रूलतत्वस्योद्भटत्वेन सर्वेष्वपि भावेषु कोपहेतुकेषु सत्स्वपि विशेषतः कोपाञ्चितेत्यमुना कोपशब्दप्रयोगेण बहुमानरोष एव पोषं प्रापितः ।

---

१. 'सा यावन्ति' इति शृङ्गारदीपिका. २. 'व्याहृत्य' इति शृङ्गारदीपिका. ३. 'प्रारब्धा' इति शृङ्गारदीपिका. ४. 'संकुञ्चितभ्रूलतम्' इति शृङ्गारदीपिका. ५. 'पूर्णेक्षणात्' इति शृङ्गारदीपिका.

Digitized by Microsoft®

तस्मात् 'किंचाञ्चितभ्रूलतम्'इति यत्कैश्चित्पाठान्तरं कृतं तद्व्यर्थश्रमपर्यालोचितमरमणीयं च मन्यामहे । पादप्रणामसंपर्के च बहुमानलाभात्प्रसादोन्मुखत्वव्यञ्जकेन बाष्पाम्बुना पूर्णा संवरणायोपक्रान्ता ईक्षणक्रिया यस्य तत्तथोक्तम् । चक्षुरित्येकवचनमवज्ञाद्योतकम् । कर्तृक्रियादीपकमलंकारः ॥

अज्ञानामतितानवं कुत इदं कस्मादकस्मादिदं[1]
मुग्धे पाण्डुकपोलमाननमिति प्राणेश्वरे पृच्छति ।
'तन्व्या सर्वमिदं स्वभावत इति व्याहृत्य पक्ष्मान्तर-
व्यापी बाष्पभरस्तया वलितया[2] निःश्वस्य मुक्तोऽन्यतः ॥ ५० ॥

तन्व्या तत्कालमेव पराङ्मुखत्वेनान्यतो विवृत्तया बाष्पोत्पीडो निःश्वासपूर्वमुक्तः । किं कृत्वा । इत्युदीर्य । इति किम् । सर्वमिदमङ्गतानवादिकं स्वभावादेव । क्व सति । प्राणेश्वरे मया सह यथाकथंचिदेव वाङ्मिश्रणं करोत्विल्यनुसंधानेनेति पर्युनुयुञ्जाने । इति किम् । हे मनोहरे, अवयवानामतिकार्श्यं कस्मादेतत् । कुतश्चेदं पाण्डुगण्डफलकं मुखम् । कथम् । अकस्मात् । कोऽभिप्रायः—मया ते शरीरदौर्बल्यपाण्डुकपोललसदृशं किमपि न चेष्टितमस्तीति स्वापराधापह्नवः । प्राणेश्वरशब्दस्य चायमभिप्रायः—य एव प्राणेश्वरः स एव यद्युदासीनवत्पृच्छति तदा जीवितव्यस्य किं कार्यमिति । अत एव निःश्वासपूर्वमन्यतो भूत्वाश्रुमोक्षः कृतः । व्याजोक्तिरलंकारः । यदुक्तम्—'व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनम्' । यथा—'शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लसद्रोमाञ्चादिविसंस्थुलाखिलविधिव्यासङ्गभङ्गाकुलः । हा शैल्यं तुहिनाचलस्य करयोरित्यूचिवान्सस्मितं शैलान्तःपुरमातृमण्डलगणैर्दृष्टोऽवताद्वः शिवः' ॥

कश्चित्कुपितनायिकाप्रसादनारम्भनिरुपायः कस्यापि रहःसहचरस्याग्रे निवेदयति—

पुरस्तन्व्या[3] गोत्रस्खलनचकितोऽहं नतमुखः
प्रवृत्तो वैलक्ष्यात्किमपि लिखितुं दैवहतकः ।
स्फुटो रेखान्यासः कथमपि स तादृक्परिणतो
गता येन व्यक्तिं पुनरवयवैः सैव तरुणी ॥ ५१ ॥

ततश्चाभिज्ञाय स्फुरदरुणगण्डस्थलरुचा
मनस्विन्या रूढप्रणयसहसोद्बद्धदगिरा ।

---

१. 'कम्पश्च कस्मादयं' इति शृङ्गारदीपिका. २. 'दयितया' इति शृङ्गारदीपिका. ३. एतद्युग्मं शृङ्गारदीपिकायां नास्ति, किं तु दशरूपावलोकस्य चतुर्थपरिच्छेदेऽसूयोदाहरणे धनिकेनामरुशतकनाम्नैव समुद्धृतमस्ति.

Digitized by Microsoft®

अहो चित्रं चित्रं स्फुटमिति निगद्याश्रुकलुषं
रुषा ब्रह्मास्त्रं मे शिरसि निहितो वामचरणः ॥५२॥ (युगलम्)

तन्व्या पुरतो वार्तान्तरेऽन्याङ्गनानामोच्चारणचकितोऽहं किंचिदवाङ्मितवदनः प्रतिकूलविधिप्रेरितो वैलक्ष्यात्किंचिल्लिखितुं प्रवृत्तः । अथ मयि लिखत्येव केनाप्यनिर्वचनीयप्रकारेण व्यक्तः स कोऽपि रेखालेखस्तादृशं परिपाकं गतो येन यस्या एव गोत्रस्खलनमापतितं सैव युवतिर्नामापेक्षया पुनरप्यङ्गैरभिव्यक्तिं जगाम । ततश्चित्रनायिकामुपलभ्य तया वामोऽथ च प्रतिकूलश्चरणश्चण्डिम्ना निक्षिप्तः । किंविशिष्टः । रूपकालंकारेण ब्रह्मास्त्रम् । यथा वारंवारमतिप्रहारिणि शत्रावनन्योपायतया ब्रह्मास्त्रं मुच्यते तथा मयि प्रथममपराधिनि पुनर्गोत्रस्खलनकारिणि पश्चादन्याङ्गनाचित्रलेखिनि वामपदो न्यस्त इत्यर्थः । किं कृत्वा । अश्रुकलुषं यथा भवत्येवमित्यभिधाय । इति किम् । अहो आश्चर्यमाश्चर्यमभिव्यक्तम् । कोऽभिप्रायः—लोकाः, पश्यत दुरात्मनोऽस्य तस्यां तदेकतानताम् । गोत्रस्खलने न पर्याप्तमिदानीं तामेव लिखन्वर्तते । किं विशिष्टया सत्या निगद्य । आरूढप्रणयेत्यादि । प्रकर्षं प्राप्तेन प्रेमविशेषेण य एव मे तथा वशीभूत आसीत्स एवायमित्थमुद्वृत्तो जात इत्याश्चर्यकोपव्यञ्जकेन हासेन सह वर्तत इति सहसा उद्गतरोदनखना च गीर्यथा स्यात्तथा । कुटस्यादिः कुटादिरिति षष्ठीतत्पुरुषेण कुटादिसंबन्धाल्लिखितुमित्यत्र गुणप्रतिषेधसमर्थनम् । अन्यथा लेखितुमित्येव प्राप्नोति । यथा—'सृष्ट्वा सृष्ट्वा समस्तं जनमनुलिखता भूरिभाग्याक्षराणि क्षिप्रं विद्वल्ललाटे कथमपि विधिना लेखितुं विस्मृता श्रीः । दत्तास्मिन्हंसपादं मलयजतिलकच्छद्मना क्ष्मातलेन्दो हस्ते दत्तैः सुवर्णैः प्रतिकृति भवता शोधितो भालदेशः ॥' यच्च लेखनारम्भे सैव तरुणी व्यक्तिं गता तत्र नायकस्य तन्मयी चित्तवृत्तिर्निमित्तम् । चित्रकला च विलासिनां प्रसिद्धैव । यदुक्तम्—'गीतं वाद्यं नृत्तं चालेख्यं विशेषकपत्रच्छेद्यम्' इत्यादि । विषममलंकारः । यदुक्तम्—'यत्र क्रियाविपत्तेर्न भवेदेव क्रियाफलं तावत् । कर्तुरनर्थश्च भवेत्तदपरमभिधीयते विषमम्' ॥

कश्चिन्नायिकां समासोक्तिभिरनुनयति—

कठिनहृदये मुञ्च भ्रान्तिं व्यलीककथाश्रितां
पिशुनवचनैर्दुःखं नेतुं न युक्तमिमं जनम् ।
किमिदमथवा सत्यं मुग्धे त्वयाद्य विनिश्चितं
यदभिरुचितं तन्मे कृत्वा प्रिये सुखमास्यताम् ॥ ५३ ॥

मामनपराधमुपेक्ष्य मत्संगमं विनैव तिष्ठसीति हेतोः हे कठिनहृदये, अपराधकथाविषयां मिथ्याबुद्धिं त्यज । व्यलीककथाश्रितां न तु व्यलीकाश्रिताम् । व्यलीकस्य कथा-

१. 'कथाश्रयां' इति शृङ्गारदीपिका.

Digitized by Microsoft ®

पि नास्तीत्यर्थः । परगृहभङ्गव्यसनिनां कर्णेजपानां वचनैरिममिति त्वद्वैमुख्येनैवंविधदुःखस्थं जनमतिविधेयं मां दुःखं प्रापयितुं न ते युक्तम् । अथवा अलमनेन कियन्मे जीवितेन प्रयोजनम् । तस्मात्सत्यं कथय अचेतने, किमिदं त्वया ममोपरि विनिश्चितं किं पर्याप्तम् । हे प्रिये, यत्किंचिदभिवाञ्छितं तन्मे विधाय सुखं स्थीयताम् । तवैव सुखार्थमहमकारणोत्पन्नं मानं त्याजयामि । ममाभावे (?) चेत्तव सुखं तत्किं मानत्याजनेनेत्यर्थः । युक्तमित्यत्र 'नपुंसके भावे क्तः' । तेन 'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्' इत्यादिवत् 'प्रधानक्रियाशक्त्यभिधाने गुणक्रियाशक्तिरभिहितवत्प्रकाशते' इति न्यायेनेमं जनमित्यत्र न प्रथमा । तत्र तु सांप्रतमित्यत्र द्वितीया न युज्यत इति कर्मविवक्षा ॥

रात्रौ वारिभरालसाम्बुदरवोद्विग्नेन जाताश्रणा
पान्थेनात्मवियोगदुःखपिशुनं गीतं तथोत्कण्ठया ।
आस्तां जीवितहारिणः प्रवसनालापस्य संकीर्तनं
मानस्यापि जलाञ्जलिः सरभसं लोकेन दत्तो यथा ॥ ५४ ॥

कस्मिंश्चिद्ग्रामे यामिन्यामध्वगेन मुक्ताश्रुणा तेन प्रकारेण तत्कालोचितं किंचिदुत्कलिकया गीतम्, यथा 'ककुभोत्था विभावैव निर्दिष्टा यष्टिकेन या । धैवतांसग्रहन्यासाङ्गहीना मन्द्रमध्यभाक् । समस्वरा च संपूर्णा करुणे मधुकर्यसौ ॥' एवंप्रायम् । किं विशिष्टम् । विरहक्लेशसूचकम् । अथ वात्मशब्देन जीवात्मा अत एवोत्तरार्धम् 'आस्तां जीवितहारिणः' इत्यादि । कीदृशेन । वारिभरालसजलधररसितोद्विग्नेन । अत्र लाक्षणिकेनालसशब्देन गर्भवेदनाक्रान्तयुवतिस्तनितवद्गर्जितस्य निःसीमगम्भीरता व्यज्यते । निशीथे हि निवातनिर्भरं वर्षन्तो बलाहकास्तथैव गर्जन्ति, भवन्ति च वराकाणां वियोगिनामुद्वेजनाद्दुर्ललिताः । अत एवोक्तमुपाध्यायेन—'या क्रिया मान्मथैर्बाणैः शल्यितेषु वियोगिषु । जलं ददति यत्तस्यै तेनामी जलदाः स्मृताः ॥' तथा कथं गीतमित्याह—आस्तां तावत्प्राणहारिणः प्रवासनाम्नो ग्रहणं यावत्प्रेमवर्त्माभिज्ञेन लोकेनोभयरूपस्यापि मानस्य जलाञ्जलिर्दत्तः । लक्षणया लोकान्तरं गतो मान इत्यर्थः । 'त्वं तावदास्व दूरे भूत्वावयवोऽपि ते निहन्त्यहितान्' इत्यादिवदत्र विषमालंकारः ॥

कश्चिद्वियोगी मत्तनायिकायाः प्रणयमानमनुस्मरति—

स्वं दृष्ट्वा करजक्षतं मधुमदक्षीबाविचार्यैर्ष्यया
गच्छन्ती क्व नु गच्छसीति विधृता बाला पटान्ते मया ।
प्रत्यावृत्तमुखी सबाष्पनयना मां मुञ्च मुञ्चेति सा
कोपप्रस्फुरिताधरा यदवदत्तत्केन विस्मार्यते ॥ ५५ ॥

---

१. 'सा मुञ्च मुञ्चेति मां रोष' इति शृङ्गारदीपिका.

Digitized by Microsoft®

मया मुग्धा वस्त्राञ्चले गृहीता । किं कुर्वती । गच्छन्ती । कया ईर्ष्यया । किं कृत्वा । स्वमेव नखपदं दृष्ट्वा । पुनः किं कृत्वा । अविचार्य । यतो मदिरामदमत्ता मया किं कृत्वा विधृता । नु इति प्रश्ने । क्व गच्छसीत्युक्त्वा । अथ सा वलितवदना सास्रदृष्टिः कोपकम्प्रौष्ठी मां त्यज त्यजेति यदवोचत्तत्केन विस्मार्यते । अपि तु न केनापि । अत एव स्वं करजक्षतं दृष्ट्वा न स्वन्याङ्गनायाः । तस्य तदेकचित्तत्वात् । अत्र बालाशब्दोऽज्ञानमात्रापेक्षया न तु वयोपेक्षया । बालानायिकाविधेयनखपदादीनामवर्ण्यमानत्वात् । ताः प्रत्युत संगमेषु पराङ्मुख्यो भवन्ति । निर्बन्धेन नीवीनिरसनोद्युक्ते प्रेयसि बलात्सुरतप्रतीपं विदधति । किं च मिथ्यानखपदारोपणेऽपि कम्पन्ते यदुक्तं मुग्धाविस्रम्भणे—'अप्रतिपद्यमानां च भीषयेत् । अहं खलु दन्तपदानि तवाधरे करिष्यामि । स्तनमण्डले नखपदानि । आत्मनश्च स्वयं कृत्वा त्वया कृतमिति ते सखीजनस्य वक्ष्यामि ।' यथानर्घराघवस्य अभिषेकसुग्रीवाङ्के(सुग्रीवाभिषेकाङ्के)—'स्वयमपि नखलक्ष्म स्वेन कृत्वा भवत्या कृतमिति चतुराणां दर्शयिष्ये सखीनाम् । इति सुतनु रहस्ते भीपितायाः स्मरामि स्मर परिमलमुद्राभङ्गसर्वसहायाः॥'मधुमदक्षीवेति रतावसानिकम् । यदुक्तम्—'सव्येन बाहुना परिरभ्य चषकं गृहीत्वा सान्त्वयन्पाययेत् । भृष्टमांसमातुलुङ्गचुक्राद्युपदंशान्मधुरमिदं मृदु विशदमिदमिति विदश्य तत्तदुपाहरेत् । हर्म्यतलस्थितायाश्चन्द्रिकासेवनार्थमासनम् । तत्र चानुकूलाभिः कथाभिरनुवर्तेत । अङ्कसंलीनायाश्चन्द्रमसं पश्यन्त्या नक्षत्रपङ्क्तिव्यक्तीकरणमरुन्धतीध्रुवसप्तर्षिमण्डलदर्शनं च ॥' इति ॥

काचिन्मानिनीं शिक्षयति—

चपलहृदये किं स्वातन्त्र्यात्तथा गृहमागत-
श्चरणपतितः प्रेमार्द्रार्द्रैः प्रियः समुपेक्षितः ।
तदिदमधुना यावज्जीवं निरस्तसुखोदया
रुदितशरणा दुर्जातानां सहस्व रुषां फलम् ॥ ५६ ॥

कार्याकार्यपर्यालोचनशून्यतया हे अव्यवस्थितहृदये, कुतो हेतोर्वल्लभोऽवधीरितः । किंविशिष्टः । गृहमागतः । कथम् । तथा । कोऽर्थः प्रसाद्य संगमाकाङ्क्षया । पुनः कीदृशः । चरणप्रणतः । पुनरपि कथंभूतः । प्रेमार्द्रार्द्रैः । लक्षणयातिसरसकोमल इत्यर्थः । कस्मात्समुपेक्षितः, स्वातन्त्र्यात् । मामपृष्ट्वेत्यर्थः । तदिदानीं दुरुत्पन्नानां निजक्रुधां फलमनुभव । कीदृशी सती । रुदितशरणा । किं तत्फलमित्याह—निरस्तसुखोदया । कियन्तं कालम् । यावज्जीवम् । जीवोऽपि तव क्षणस्थायीति भावः । रुषामिति बहुवचनेन वारंवारं त्वया कोपं कृत्वा सर्वं विनाशितमिति प्रतीयते । किं स्वातन्त्र्यादित्यत्र स्वातन्त्र्यमेव त्वया कुतः कृतमिति किंशब्दार्थः । अन्यथा स्वातन्त्र्यहेतुके प्रियसमुपेक्षणे सिद्धे किंशब्दोऽधिकः स्यात् । परिकरोऽलंकारः । यदुक्तम्—'साभिप्रायैः सम्यग्विशेषणैर्वस्तु यद्विशेष्येत । द्रव्यादिभेदभिन्नं चतुर्विधः परिकरः स इति ॥' यथा—'उचितपरिणाम-

Digitized by Microsoft ®

रम्यं स्वादु सुगन्धि स्वयं करे पतितम्। फलमुत्सृज्य तदानीं ताम्यसि मुग्धे मुधेदानीम्॥

अत्रान्तरे बहवः प्रक्षेपकश्लोकाः सन्ति। तत्र विचारः—यः कश्चित्स्वाञ्श्लोकान्रचयित्वा परकाव्ये प्रक्षिपति स तावन्न प्रसिद्धये, स्वनामलेखनाभावात्। तस्मादेवं संभाव्यते—यद्यस्मिन्सार्वपार्षदे काव्ये मम श्लोका अर्हन्ति तदाहं विशिष्टः कविरिति प्रक्षेपककवेराशयः। तेऽपि सन्तु यथा विसदृशनीरलहरीलेह्यस्वराणां (?) गायनानामोडवप्रयोगेनातोद्यलास्यानुविधानशालिनि रक्तिनिर्भरगीतलास्यमानमनसां प्रविष्टानामातोद्यकराणां ततसुषिरघनावनद्धात्मनि वादित्रे मन्दमुन्मुद्रितनिनादे नायिकानां नानाविधदृष्टिवृष्टिभिराप्यायितविदग्धचेतसां ललितहस्तकचारीचमत्कारेणाञ्चितभ्रमितनमितकुञ्चितस्तिमितक्षिप्तक्षुभितावयवानां कुचकलशनितम्बडम्बरान्तरतरङ्गितोद्वलितललितवलिभागानां क्वचिद्विस्रब्धमिव क्वचित्त्वरितत्वरितमिव क्वचिद्भीतभीतमिव क्वचित्सुप्तसुप्तमिव क्वचिदुन्निद्रितोन्निद्रितमिव सान्द्रमुखरागमनोभवमनोज्ञं नृत्यन्तीनामन्तरेऽट्टचेटकास्तथानिर्वचनीयचमत्काराणाममरुकश्लोकानां मध्ये छन्दोमात्रमेलनेन हासोत्पादकतया च प्रक्षेपकश्लोकाः ते यथा—

'मन्दं मुद्रितपांसवः परिपतज्झांकारिझञ्झामरु-
द्वेगव्यस्तकुटीरकाग्रनिपतच्छिद्रेषु लब्धान्तराः।
कर्मव्यग्रकुटुम्बिनीकुचभरस्वेदच्छिदः प्रावृषः
प्रारम्भे मदयन्ति कन्दलदलोल्लासाः पयोबिन्दवः॥

अमी झञ्झानिलाः शिरोर्तिमुत्पादयन्ति विदुषाम्॥

'इयमसौ तरलायतलोचना गुरुसमुन्नतपीनपयोधरा।
पृथुनितम्बभरालसगामिनी प्रियतमा मम जीवितहारिणी॥'

जीवितहारिणी शाकिनी॥

'सालक्तकं शतदलाधिककान्तिरम्यं रत्नौघधामनिकारुणनूपुरं च।
क्षिप्तं भृशं कुपितया मृगनेत्रया यत्सौभाग्यचिह्नमिव मूर्ध्नि पदं विरेजे॥'

इयं सा भद्रदेशिनां सर्वस्वं सौभाग्यस्योपरिमञ्जरी (?)॥

'श्रुत्वाकस्मान्निशीथे नवघनरसितं विस्रथाङ्गं पतन्त्या
शय्याया भूमिपृष्ठे करतलधृतया दुःखितालीजनेन।
सोत्कण्ठं मुक्तकण्ठं कठिनकुचतटापातशीर्णाश्रुबिन्दु
स्मृत्वा स्मृत्वा प्रियस्य स्खलितमृदुवचो रुद्यते पान्थवध्वा॥'

वियोगमर्म निगूढं दुःखमेवोपवर्णयन्ति। तद्विपर्ययादियं मिथ्यामरणनिःसृताया योषितो मांधारिका (?)॥

---

१. इतः प्रभृति प्रक्षिप्तं श्लोकपञ्चकं शृङ्गारदीपिकायामपि नास्ति.

Digitized by Microsoft®

'पीतो यतःप्रभृति कामपिपासितेन तस्या मयाधररसः प्रचुरः प्रियायाः
तृष्णा ततः प्रभृति मे द्विगुणत्वमेति लावण्यमस्ति बहु तत्र किमत्र चित्रम् ॥'

नूनं शाकंभरीखनिकर्मकर एष महानुभावः कविः ॥

नूनमियं श्लोककन्था कुतार्किकच्छान्दसवैयाकरणैर्ग्रथिता। यदुक्तमुपाध्यायेन—'संपर्केण कुतर्काणां छन्दोव्याकरणस्पृशाम् । उद्वीयते रसः खण्डैः पावकेनेव पारदः' ॥

बाले नाथ विमुञ्च मानिनि रुषं रोषान्मया किं कृतं
खेदोऽस्मासु न मेऽपराध्यति भवान्सर्वेऽपराधा मयि ।
तत्किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते
नन्वेतन्मम का तवास्मि दयिता नास्मीत्यतो रुद्यते ॥ ५७ ॥

कश्चिन्मानिनीमनुनेतुं संबोधयति—हे मुग्धे । नायिका वक्ति—हे नाथ । नायकः—विमुञ्च मानिनि रुषम् । नायिका—रोषान्मया किं कृतम् । अपि तु न किमपि । कोऽभिप्रायः—न ते किंचिद्विरुद्धमुक्तम् । न च ताडनादिकं कृतम् । नापि तत्र गच्छन्वारितोऽसि । स्वशरीरेण दुरवस्थामनुभवन्ती तिष्ठामि । नायकः—रोषात्त्वया किमपि न कृतमित्येव न परमस्मासु खेदः कृतः । नायिका—खेदस्तस्योपपद्यते योऽपराधी भवति । भवांस्तु न मेऽपराध्यति । विपरीतलक्षणया विधिरत्र । सर्वेऽपराधा मयि । मया यत्त्वमुपेक्षितस्तेनैवमुच्छृङ्खलो जातः। नायकः—उक्तेरभिप्रायमजानन्निव, तत्किं रोदिषि गद्गदेन वचसा । नायिका—कस्याग्रतो रुद्यते । त्वमन्यासक्तो न मे कष्टं जानासि । त्वां च विहाय ममान्या गतिर्नास्तीति भावः । नायकः—पूर्ववत् । नन्वेतन्ममाग्रतो रुद्यते । नायिका—का तवास्मि । उदासीनो मयि सांप्रतं भवानित्यर्थः । नायकः—वल्लभा त्वं मे । नायिका—नास्मीत्यतो रुद्यते । कोऽर्थः दयिता नास्मि योषित्संबन्धः पुनरस्त्येव । प्रश्नोत्तरमलंकारः । न तु वक्रोक्तिः । शब्दश्लेषकाकोरभावात् । यत्क्वचिदर्थान्तरमत्र प्रतीयते तद्व्यङ्ग्यमेव । वक्रोक्तेरुदाहरणं चैतत्—'किं गौरि मां प्रति रुषा ननु गौरहं किं कुप्यामि कां प्रति मयीत्यनुमानतोऽहम् । जानाम्यतस्त्वदनुमानत एव सत्यमित्थं गिरो गिरिभुवः कुटिला जयन्ति ॥' 'गुरुपरतन्त्रतया बत दूरतरं देशमुद्यतो गन्तुम् । अलिकुलकोकिललालिते नैष्यति सखि सुरभिसमयेऽसौ ॥' धीराधीरा मध्या नायिका । 'न मेऽपराध्यति भवान्सर्वेऽपराधा मयि' इत्यनेन धैर्यम् । 'चापल्यरहिता धैर्यं हृद्वृत्तिरविकत्थना ॥'

श्लिष्टः कण्ठे किमिति न मया मूढया प्राणनाथ-
श्चुम्बत्यस्मिन्वदनविनतिः किं कृता किं न दृष्टः ।

---

१. शाकंभरी राजपूतानादेशान्तर्वर्ती 'सांभर' इति प्रसिद्धो लवणाकरः.

Digitized by Microsoft®

नोक्तः कस्मादिति नववधूचेष्टितं चिन्तयन्ती
पश्चात्तापं वहति तरुणी प्रेम्णि जाते रसज्ञा ॥ ५८ ॥

यथा यथा मौग्ध्यमपगतं तथा तथा प्रियसंगमबाहुल्येनोपलब्धे प्रेम्णि आस्वादामिश्रा संवृत्ता सती इत्थममुना प्रकारेण तरुणी पश्चात्तापं बिभर्ति । किं कुर्वती । इति स्वमेव नववधूचेष्टितं चिन्तयन्ती । इति किम् । मया मन्दभाग्यया किमिति न प्राणेश्वरः कण्ठे आलिङ्गितः । तस्मिन्परिरब्धुमुद्यते मया भुजाभ्यां निजमुरः किं पिहितमित्यर्थः । अस्मिंश्चुम्बति सति वदनविनतिः किमिति मया कृता । प्रतिचुम्बनं किमिति नारब्धमित्यर्थः । किमिति न दृष्टः सततं नीरङ्गीलम्बनव्यग्रया[1] सम्यक्कदाचिदपि स्फारीकृतलोचनया नावलोकित इत्यर्थः । नोक्तः कस्मात् । तस्मिन्सविलासमालपति सति प्रत्युत्तरं किं न दत्तम् । अवनतवदनया स्थितमेवेत्यर्थः । तारुण्ये संगमसुखमनुभवन्ती मौग्ध्येन तदाहं वञ्चितेति चिन्तयतीति भावः ॥

काचिदपमानितानुनया पश्चात्तापयुक्ता यदि त्वं तेन विना स्थातुं न शक्नोषि तत्किमिति मानं करोषीति सख्या निर्भर्त्सिता तां प्रत्याह—

श्रुत्वा नामापि यस्य स्फुटघनपुलकं जायतेऽङ्गं समन्ता-
दृष्ट्वा यस्याननेन्दुं भवति वपुरिदं चन्द्रकान्तानुकारि ।
तस्मिन्नागत्य कण्ठग्रहनिकटपदस्थायिनि प्राणनाथे
भग्ना मानस्य चिन्ता भवति मयि[3] पुनर्वज्रमय्यां कदाचित्[4] ॥ ५९॥

नाहं सर्वदैव मानं करोमि किंत्वत्यन्तकठिनायां मयि निन्द्या मानचिन्ता कदाचिदुत्पद्यते । क्व सति । तस्मिन्प्राणेश्वरे प्रसादनतात्पर्येणागत्य कपोलचुम्बनप्रत्यासन्नस्थानस्थायिन्यपि । कोऽर्थः । यस्मिन्नवसरे चुम्बनं युज्यते तस्मिन्नाहं मानं करोमि । तस्मिन्प्राणेश्वरे कीदृशे । यस्य नामाप्याकर्ण्य व्यक्तसान्द्ररोमाञ्चं ममाङ्गं सर्वतो जायते । यस्य वक्त्रचन्द्रमसमवलोक्येदं वपुरुद्भिन्नस्वेदबिन्दुजालतया चन्द्रकान्तमणिसदृशं भवति । दयितमुखं दृष्ट्वा खिद्यामीति पर्यवसितत्वाद्भिन्नकर्तृकता नाशङ्कनीया । अयमपि श्लोकः प्रक्षेपक इति संभाव्यते । परं विरुद्धो नास्ति । एवंविधा अन्येऽप्यन्तरान्तरा द्विन्नाः सन्ति । तेऽप्यविरुद्धा इति व्याख्यास्यन्ते ॥

लाक्षालक्ष्म ललाटपट्टमभितः केयूरमुद्रा गले
वक्त्रे कज्जलकालिमा नयनयोस्ताम्बूलरागोऽपरः ।
दृष्ट्वा कोपविधायि मण्डनमिदं प्रातश्चिरं प्रेयसो
लीलातामरसोदरे मृगदृशः श्वासा समाप्तिं गताः ॥ ६० ॥

---

१. नीरङ्गी मुखाच्छादनवस्त्रम्. २. 'यत्समन्तात्' इति शृङ्गारदीपिका. ३. 'मम' इति शृङ्गारदीपिका. ४. 'कथंचित्' इति शृङ्गारदीपिका.

Digitized by Microsoft®

ईर्ष्याविकारसंवरणार्थमाघ्राणच्छद्मना मुखप्रत्यासन्नीकृतस्य लीलातामरसस्योदरे कुरङ्गलोचनायाः श्वासा निसृत्य निसृत्य प्रौढापमानजन्मनाभिषङ्गेणान्तर्निरुद्धतया समाप्तिं गताः । किं कृत्वा । अन्याङ्गनाया मण्डनं तदिदं प्रेयसः संक्रान्तमत एव कोपविधायि प्रभाते चिरं दृष्ट्वा । इदं किम् । ललाटपट्टमभितस्तत्प्रसादनपादपतनानुमापकं लाक्षालक्ष्म । तदालिङ्गनशंसिनी[1] केयूरमुद्रा कण्ठे । तल्लोचनचुम्बनसूचको वक्त्रे कज्जलकालिमा । अपरश्च तत्कृतचुम्बनपिशुनो नयनयोस्ताम्बूलरागः । अहेतुरलंकारः । यदुक्तम्—'बलवति विकारहेतौ सत्यपि नैवोपगच्छति विकारम् । यस्मिन्नर्थः स्थैर्यान्मन्तव्योऽसावहेतुरिति ॥' 'ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्या कषायिता' इत्यनेन खण्डिता नायिका । धृष्टो नायकः । यच्चेदं लीलातामरसं तदवश्यं विरहसंतापप्रतिविधानोपनतसखीजनोपनीतशीतोपचारीयम् ॥

काचित्प्राणपरित्यागकृताध्यवसाया देशान्तरं प्रस्थितं प्रियं प्रत्याह—

लोलैर्लोचनवारिभिः[2] सशपथैः पादप्रणामैः प्रियै-
रन्यास्ता[3] विनिवारयन्ति कृपणाः प्राणेश्वरं प्रस्थितम् ।
पुण्याहं[4] व्रज मङ्गलं सुदिवसः[5] प्रातः प्रयातस्य ते
यत्स्नेहोचितमीहितं प्रियं[6] मया तन्निर्गतः[7] श्रोष्यसि ॥ ६१ ॥

अन्यास्ताः प्राणलोभेन कृपणाः स्त्रियः न त्वहम् । याः प्रस्थितं प्राणेश्वरं निवारयन्ति । कैः । झलज्झलायमानैर्बाष्पाम्बुभिः । न केवलं तैः । किं तु यदि त्वं यास्यसि तदा तेऽमुकस्य शपथ इति सशपथैश्चरणप्रणामैः । किंविशिष्टैः । अनुरागव्यञ्जकलात्प्रियैः । अहं पुनरेवं वच्मि—हे प्रिय, पुण्याहं कल्याणं सुदिनं ते तस्माद्यदृच्छया गच्छ । यच्च तव प्रोषितस्य स्नेहोचितं मया किंचिदीप्सितमस्ति तन्निश्चयेन गतः सन्कस्मादपि पथिकादाकर्णयिष्यसि । अथ च यद्यहमिदानीमेव प्राणान्मुञ्चामि तदा तवामङ्गलं स्यात् । अत एव पुण्याहमित्यादि । पराभवोऽलंकारः । आशीर्वचनाक्षेपश्च । यथा—'गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवाः । ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् ॥ इत्याशीर्वचनाक्षेपो यदाशीर्वादवर्त्मना । स्वावस्थां सूचयन्त्यैव कान्तयात्रा निषिध्यते' ॥

काचिन्निजसख्याः स्वयं स्थापितप्रतिष्ठासु भर्तृकायाः स्वरूपं सिद्धसमीहितत्वेनान्यासामग्रे कथयति—

लग्ना नांशुकपल्लवे भुजलता न द्वारदेशेऽर्पिता[8]
नो वा पादयुगे स्वयं निपतितं तिष्ठेति नोक्तं वचः ।

---

१. 'वान्तैः' इति शृङ्गारदीपिका. २. 'अन्यैः' इति शृङ्गारदीपिका. ३. 'धन्याहं' इति शृङ्गारदीपिका. ४. 'सुदिवसं' इति शृङ्गारदीपिका. ५. 'प्रियतम त्वं निर्गतः' इति शृङ्गारदीपिका. ६. 'स्थितं' इति शृङ्गारदीपिका. ७. 'मुहुः' इति शृङ्गारदीपिका.

Digitized by Microsoft®

काले केवलमम्बुदालिमलिने गन्तुं प्रवृत्तः शठ-
स्तन्व्या बाष्पजलौघकल्पितनदीपूरेण रुद्धः प्रियः ॥ ६२ ॥

सा वस्त्राञ्चले प्रियस्य न लग्ना । तथा द्वारदेशेऽर्गलवद्भुजलता न न्यस्ता । नापि चरणयुगले लुठितम् । तिष्ठेति वचनमपि नोक्तम् । कथं तर्हि निवारित इत्याह—काल इत्यादि । यस्मिन्देशान्तरादागत्य मिथुनानि मिलन्ति तस्मिन्मेघमालामलीमसे समये निर्दयः साहसिको गन्तुं प्रवृत्तः सन्कृशाङ्ग्या केवलमश्रुकल्लोलकल्पितनदीपूरेण वल्लभो निषिद्धः । अत्राश्रुनदीपूरेणेति वाक्येन रूपकेण मेघकार्यमश्रुभिरेव कृतमित्यनेन मेघाक्षेपेण परिपुष्टो विप्रलम्भः । औपम्यभेदः । पूर्वालंकारोऽप्यत्र प्रतीयते । यथा—'काले जलदकुलाकुलदशदिशि पूर्वं वियोगिनीवदनम् । गलदविरलसलिलभरं पश्चादुपजायते गगनम्' ॥

काचित्परपुरुषानुरागिणी कस्याश्चिज्जरत्कुलटायाः पुरतः प्रतीकारप्रत्याशया स्वदुःखं निवेदयति—

आस्तां विश्वसनं सखीषु विदिताभिप्रायसारे जने
तत्राप्यर्पयितुं दृशं सुरचितां शक्नोमि न व्रीडया ।
लोकोऽप्येष परोपहासचतुरः सूक्ष्मेङ्गितज्ञोऽप्यलं
मातः कं शरणं व्रजामि हृदये जीर्णोऽनुरागानलः ॥ ६३ ॥

हे मातः, कं शरणं व्रजामि । अपि तु न कमपि । तस्माद्धृदय एव केवलं संतापहेतुत्वेनानुराग एवानलो जरां प्राप्तः । तत्फलं किमपि नासादितमित्यर्थः । कथमित्याह—आस्तामित्यादि । प्रियं जनं प्रति प्रेषणतदानयनादिकार्यसाधके सखीजने विश्वसनं तावदास्ताम् । ताः कस्याप्यग्रे स्फुटित्वा कथयेयुरित्यर्थः । तर्हि स्वयं दूतीविलसितं किमिति नारभ्यते इत्याह—इयं मयि सर्वात्मनानुरक्तेति विदितोऽभिप्रायसारो येन तस्मिञ्जने दृष्टिमप्यारोपयितुं लज्जया न शक्नोमि । का कथा गमनानयनादिकार्यस्य । तर्हि लज्जां परित्यज्य तदवलोकनरसास्वादेनैव किमिति कालो नातिवाह्यत इत्याह—एष स्वपरगृहसंचारी लोकोऽमुक्यमुकेन सह वर्तत इत्यादि परोपहासकुशलोऽप्यतिशयेन सूक्ष्मेङ्गितज्ञोऽपि । अपिशब्दः । समुच्चये । सूक्ष्मेङ्गितज्ञोऽपि यदि मनसि धृत्वा तिष्ठति तदा कः शङ्कते । असौ परोपहासचतुरोऽपीति तात्पर्यम् । असत्समुच्चयोऽलंकारः । यथा राज्ञः श्रीहर्षदेवस्य—'दुल्लहजणाणुराओ लज्जा गरुई परव्वसो अप्पा । पिअसहि विसमं पेम्मं मरणं सरणं णवर एक्कम् ॥'

---

१ 'सलिलितां' इति शृङ्गारदीपिका. २. 'दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा । प्रियसखि विषमं प्रेम मरणं शरणं केवलमेकम् ॥' इति च्छाया.

Digitized by Microsoft®

त्वमस्माकमग्रे परं मानस्य वार्तामेव करोषि तत्संनिधौ पुनरन्यैव संपद्यस इति सखीभिः काचिदुपालब्धा स्वदोषं परिहरति—

न जाने संमुखायाते प्रियाणि वदति प्रिये ।
सर्वाण्यङ्गानि किं यान्ति नेत्रतां किमु कर्णताम् ॥ ६४ ॥

अहं किं करोमि समस्तान्येव ममाङ्गानि लोचनतां गच्छन्ति श्रवणतामथवेति न जाने । क्व सति । प्रिये संमुखायाते सति । न परं तथा, अभिमतालापं जल्पति च । तमभिमुखमागच्छन्तमुत्कण्ठया पश्यन्त्यास्तत्पेशलालापानाकर्णयन्त्याश्च ममेन्द्रियान्तराणि स्वव्यापारं परिहरन्तीति तात्पर्यम् । अङ्गशब्दोऽत्रेन्द्रियार्थः । अन्तरङ्गमित्यत्रापि दृष्टत्वात् । उत्तरसंशययथासंख्यान्यलंकाराः । ललितं नाम सात्त्विको नायकगुणः । यदुक्तम्—'शोभा विलासो माधुर्यं गाम्भीर्यं स्थैर्यतेजसी । ललितौदार्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः ॥' यथा—'लावण्यमन्मथविलासविजृम्भितेन स्वाभाविकेन सुकुमारमनोहरेण । किं वा ममैव सखि योऽपि ममोपदेष्टा तस्यैव किं न विषमं विदधीत तापम् ॥' भावप्रगल्भा नायिका ॥

अनल्पचिन्ताभरमोहनिश्चला विलोक्यमानैव करोति साध्वसम् ।
स्वभावशोभानतिमात्रभूषणा तनुस्तवेयं बत किं न सुन्दरि ॥ ६५ ॥
इति प्रिये पृच्छति मानविह्वला कथंचिदन्तर्धृतबाष्पगद्गदम् ।
न किंचिदित्येव जगाद यद्वधूः कियन्न तेनैव तयास्य वर्णितम् ॥ ६६ ॥

(युग्मम्)

अन्तर्निरुद्धबाष्पगद्गदं यथा भवत्येवं वधूर्न किंचिदेवोत्तरं यदवोचत्तेनैव तयास्य प्रियस्य कियन्न स्वदुःखं वर्णितम् । अपि तु भूयः । किंविशिष्टा सती जगाद, बहुदिवसोपचितेन मानेन विह्वला । क्व सति । सापराधे दयिते इति पर्यनुयुञ्जाने सति । इति किम् । इयं दुर्बला शरीरलता गुरुतरचिन्ताया दुर्वहत्वेन यद्वैचित्यं तेन निश्चला निरीक्ष्यमाणैव सती किमिति भयमुत्पादयति । कार्श्येन निश्चेष्टतया चामङ्गलचिन्तां प्रणिददातीत्यर्थः । विशेषेण दृश्यमानैव साध्वसं करोति दूरात्पुनराकृत्यविसंवादेन पूर्ववत्स्वस्थावस्थैव प्रतिभासते । यत आभरणनिरादरतया स्व ावरामणीयका । तथा च प्राग्भारे(?) णानतिस्तन्मात्रं भूषणं यस्याः सा तथा । 'अङ्गानामतितानवं कुत इदं–'इत्यादिश्लोकवदत्रापि संविधानम् ॥

काचिद्दूती प्रणयापमानितं नायकं संबोधयति—

विरहविषमः कामो वामस्तनूकुरुते तनुं[1]
दिवसगणनादक्षश्चायं व्यपेतघृणो यमः[2] ।

---

१. 'कामं तनुं कुरुते' इति शृङ्गारदीपिका. २. 'दक्षः स्वैरं' इति शृङ्गारदीपिका.

Digitized by Microsoft®

त्वमपि वशगो मानव्याधेर्विचिन्तय नाथ हे
किसलयमृदुर्जीवेदेवं कथं प्रमदाजनः ॥ ६७ ॥

हे नाथ, विषमेषुर्युवयोस्तनुं दुर्बलां करोति । किंविशिष्टः । प्रतिकूलः । कीदृशः सन्प्रतिकूलः । विरहे विषमः । संभोगे पुनरनूकूल एवेत्यर्थः । शरीरकार्श्योपन्यासेनैवं प्रतिदिनोत्पद्यमानक्षीणताया कतिपयदिवसैः संभोगयोग्यतैव युवयोरस्तमेष्यतीत्यर्थः । अयमिति प्रत्यक्षनिर्देशेन पुर इव वर्तमानो निरनुक्रोशोऽन्तकश्च दिवसगणनादक्षः एवंविधानपि दिवसांल्लेखयति । संभोगे विप्रलम्भे चायुःक्षयस्तावदस्त्येव । तस्माद्विप्रलम्भे मृत्युर्वरमुतस्त्रित्संभोग इति यमशब्दस्योपयोगः । देहदौर्बल्येन संभोगपरिहारेण च मान एव व्याधिस्तस्य त्वमपि वशगः । अद्य यावन्मयैवं ज्ञातमासीयत्तैव मानव्याधेर्वशगेत्यपिशब्दार्थः । तस्माद्विचिन्तय, एवमुत्पातपरम्परया प्रमदाजनः कथं जीवति । प्रस्तुते एकस्यामपि प्रमदायां प्रमदाजन इति जात्यपेक्षया लोकोक्तिः । अथवा प्रकृष्टो मदो रिरंसालक्षणो मान्मथो विकारो यस्याः सा प्रमदा । सैव विधेयत्वेन जनः । अथवा नायकस्यानेकनायिकास्पृहणीयत्वेन प्रमदासमूह एवास्तु । किंविशिष्टः । किसलयमृदुः । विरहदुरवस्थां सोढुमक्षम इत्यर्थः । अथ च किसलयकोमलं प्रमदाजनमालिङ्ग्य किमिति चरितार्थो न भवसीति । असत्समुच्चयोऽलंकारः ॥

कश्चित्प्रियामानोपशान्तिं कस्यचिद्विस्रम्भसंभावितस्याग्रे कथयति—

पादासक्ते सुचिरमिह ते वामतां कैव मुग्धे
मन्दारम्भे प्रणयिनि जने कोऽपराधोपरोधः ।
इत्थं तस्याः परिजनकथाकोमले कोपवेगे
बाष्पोद्भेदैस्तदनु सहसा न स्थितं न प्रवृत्तम् ॥ ६८ ॥

तस्यास्तदनन्तरं त्वरितमेव बाष्पोत्पीडैर्न विलम्बितं न च स्खलम् । क्व सति । कोपवेगे सति । किंविशिष्टे । सखीप्रायपरिजनस्येत्थं संबोधकथया शिथिले न तु दृढे । कोपवेगस्य कोमलतयाश्रुभिर्न स्थितम् । कोपसत्तया च न प्रवृत्तम् । स्रम्भितैरेव जातमित्यर्थः । इत्थं कथमित्याह—हे अचेतने, इह प्रणयिनि जने सुचिरं चरणलग्ने कैव तव वामता । प्रातिकूल्यं न युज्यत इत्यर्थः । अथ च येन स्वेदरोमाञ्चप्रभृतयो भवन्ति तस्मिन्नपि दयितशरीरस्पर्शे तव कठिनायाश्चेतसि मानस्तिष्ठतीति भावः । ननु सापराधोऽयं वामतां कथं त्यजामीत्याह—अस्मिन्मन्दारम्भे । कोऽर्थः—दोषोद्घोषणे कृतेऽपि निरुत्तरतया नम्रमुखे यथाकथंचित्प्रसादमेवाकाङ्क्षति सति । तस्मादपराधस्य क उपरोधः ।

---

१. 'नैव कान्ते' इति शृङ्गारदीपिका. २. 'कोपने कोऽपराधः' इति शृङ्गारदीपिका. ३. 'परिजनगिरा कोपवेगे प्रशान्ते' इति शृङ्गारदीपिका.

Digitized by Microsoft®

प्रणयिजनस्यैवोपरोधोऽस्त्विति भावः । विरोधोऽलंकारः । यदुक्तम्—'यस्मिन्द्रव्यादीनां परस्परं सर्वथा विरुद्धानाम् । एकत्रावस्थानं समकालं भवति स विरोधः' ॥

काचिन्मनस्विनी दयितमुपालभते—

[1]तथाभूदस्माकं प्रथममविभक्ता तनुरियं
[3]ततो न त्वं प्रेयानहमपि हताशा प्रियतमा ।
तदानीं नाथस्त्वं वयमपि कलत्रं किमपरं
[4]मयाप्तं प्राणानां कुलिशकठिनानां फलमिदम् ॥ ६९ ॥

आदौ तावदियमस्माकं तनुस्तथानिर्वचनीयेन प्रकारेणाविभक्ता जाता । संयोगाभावः कदाचिदपि नासीदित्यर्थः । अत एवैक्यप्रतिपादकस्तनुरियमिति प्रयोगः, न तु तनू इमे इति । आवयोरिति वाच्ये प्रणयबहुमानादस्माकमिति । तदनन्तरं न त्वं प्रेयान् अहमपि हताशा न प्रियतमेति ज्ञानमविभागेऽपि भेदमाचष्टे । तदतिशयी तादात्म्येन स्त्रीपुरुषभेदोऽपि निवृत्त इत्यर्थः । इदानीं गवामिव त्वमस्माकं पतिः वयमप्यग्निसाक्षितया परिणीता इति यावज्जीवं भर्तव्या इति कलत्रम् । न तु प्रेमगन्धोऽपि । तदेतस्मादपि किमन्यत् । केवलं त्वयि पराङ्मुखे येन गजोन्मूलितकोमलमृणालनालन्यायेन विशुष्कास्तेन तेषां वज्रकर्कशानां प्राणानामिदं नाथकलत्रव्यवस्थारूपं फलमासादितम् । अथ च कारणानुरूपं कार्यमिति कर्कशानां फलमपि कर्कशमेवेत्यर्थः ॥

मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्यते
मानं धत्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि ।
[5]सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीताननां
नीचैः शंस हृदि स्थितो हि ननु मे प्राणेश्वरः श्रोष्यति ॥ ७० ॥

काचिदमुना प्रकारेण सख्या प्रतिबोधिता सती प्रतिवचनमाह—नीचैः शंस । यस्मात्त्वय्युच्चैरुच्चरन्त्यां मम हृदये कृतास्पदः प्राणेश्वरः श्रोष्यति । तवोपरि क्रुद्धो भविष्यतीति भावः । अथ च प्राणनाथोऽयं यस्य हस्ते स जयतीति(?) यद्यहमनेन सह विप्रतिपद्ये तदा मे प्राणान्गृहीत्वा तिष्ठतीति । अत एव भीताननना । संकुचितत्वेन भीतमिवाननं यस्याः सा तथा । इयं च मुग्धा तदेकताने हृदि प्राणेश्वरं साक्षादेव स्थितं मन्यते । एवं कथं प्रतिबोधितेत्याह—हे मुग्धे, बाल्यदुर्ललितेनैव सर्वः कालोऽतिवाहितुं कस्मादारभ्यते त्वया । केवलं मुग्धेत्याशङ्कनीया भविष्यसि । तस्मादीर्ष्याकारणं विनापि मानं धारय । माने धृते कथमवस्थातुं प्रभविष्यामीत्याह—धृतिमवस्थापय । न-

---

१. 'पुरा' इति शृङ्गारदीपिका. २. 'अविछि(भि)न्ना' इति शृङ्गारदीपिका. ३. 'ततोऽनु त्वं प्रेयान्वयमपि हताशाः प्रियतमाः' इति शृङ्गारदीपिका. ४. 'हतानां' इति शृङ्गारदीपिका. ५. 'अखिलं कालं' इति शृङ्गारदीपिका. ५. 'सख्येदं' इति शृङ्गारदीपिका.

Digitized by Microsoft®

न्वयं विना कारणैः स्थातुं न शक्नोमि तेन सह बाह्याकारेण(?)धृतिं बध्नामीत्याह—प्रेयसि विषये प्राञ्जलतां परित्यज । मोट्टायितं नाम नाट्यालंकारः । 'मोट्टायितं तु तद्भावभावनेष्टकथादिषु' । यथा पद्मगुप्तस्य—'चित्रवर्तिन्यपि नृपे तत्त्वावेशेन चेतसि । व्रीडार्धवलितं चक्रे मुखेन्दुमवशैव सा' ॥

एष प्रक्षेपकश्लोकोऽपि व्याख्यायते । काचिज्जरदभिसारिका नवनिष्पन्नस्वैरिणीं प्राह—

क्व प्रस्थितासि करभोरु घने निशीथे
प्राणाधिको वसति यत्र जनः प्रियो मे ।
एकाकिनी वत कथं न बिभेषि बाले
नन्वस्ति पुङ्खितशरो मदनः सहायः ॥ ७१ ॥

मणिबन्धकनिष्ठयोरन्तरं करभः । तदाकारावूरू यस्यास्तस्याः । यथापूर्वं पीवरतया ऊर्वोर्गौरवेण कथं गन्तुं शक्ष्यसीत्याशयेन संबोधनं हे करभोरु, निर्भरेऽर्धरात्रे क्व चलितासि । यथा मरणाध्यवसिता यदृच्छया मनोगतमाचष्टे तथा मन्मथोन्मत्ततया दुष्कराभिसारप्रवृत्ता सती उत्तरमाह—जीवितादप्यधिको यत्र स्थाने मम वल्लभो वसति । किंभूतः । जनो विधेयः । इत्युभयानुरागः । पूर्वां पुनः पृच्छति—हे बाले, असहाया केन प्रकारेण न बिभेषि । बतशब्दः खेदार्थो बालाशब्दवत् । सोल्लुण्ठं स्वैरिण्युत्तरं ब्रूते—ननु विद्यते सज्जितसायको मदनः सहायः । शरप्रहारोन्मुखमन्मथहेतुकोऽयमारम्भ इत्यर्थः । सहायो हि गन्तव्यं स्थानं प्रापयति । ननु सहायो यं सहायिनमनुगच्छति न तु तमेव प्रहर्तुं शरं पुङ्खयति तत्कथमत्र मदनः सहायः । सत्यम् । ईदृशमेवात्र साहाय्यं यत्पुङ्खितशरसज्जितमेव सहायी गन्तव्यं स्थानं प्राप्यते । यथा हन्यमानस्वार्थस्येव दर्शनेन्द्रियस्य तमसि नीलिमोपलम्भः । अथवा नन्वस्ति पुङ्खितशरो मदनः सहाय इति सोल्लुण्ठम् । अहं किं करोमि, यद्यद्विषमशरः कारयति तदेव करोमि । यथा विपरीतलक्षणायाम्—'उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् । विदधदीदृशमेव सदा सखे सुखितमास्व ततः शरदां शतम् ॥' प्रश्नोत्तरमलंकारः ॥

लीलातामरसाहतोऽन्यवनितानिःशङ्कदष्टाधरः
कश्चित्केसरदूषितेक्षण इव व्यामील्य नेत्रे स्थितः ।
मुग्धा कुञ्चलिताननेन्दु ददती वायुं स्थिता तत्र सा
भ्रान्त्या धूर्ततयाथवा नतिमृते तेनानिशं चुम्बिता ॥ ७२ ॥

कश्चित्कामुकोऽन्याङ्गनास्वच्छन्ददष्टौष्ठो नायिकया क्रीडातामरसेन ताडितः सँल्लो-

---

१. 'प्राणेश्वरः' इति शृङ्गारदीपिका. २. 'मनः प्रियः' इति शृङ्गारदीपिका. ३. 'वद' इति शृङ्गारदीपिका. ४. 'प्रेयान्' इति शृङ्गारदीपिका. ५. 'कान्ता कुञ्चलिताननेन' इति शृङ्गारदीपिका. ६. 'तदा' इति शृङ्गारदीपिका. ७. 'तेनाभवत्' इति शृङ्गारदीपिका.

Digitized by Microsoft®

चने मुद्रयित्वा स्थितः । किंविशिष्ट इव । कैतवेन कुशेशयकिंजल्कदूषितदृष्टिरिव । अथ सा मुग्धा नायमधरक्षतप्रकाशापह्नवार्थमभिनयं करोति, किं तु मत्प्रहारदूषितदृष्टित्वेन व्यथित एवेति या भ्रान्तिस्तया । अथवाभिनयं जानाति परं प्रेम्णः कुटिलस्वरूपत्वाल्लुण्ठनार्थं या धूर्तता तया मुकुलिताननमृगाङ्कं यथा भवत्येवं वदनमारुतं निश्चला सती तस्य लोचनयोर्ददती तेन प्रणामोपायं विनैव सिद्धसमीहितेन वारंवारं चुम्बिता । भ्रान्तिपक्षे प्रियतमस्यापराधग्रहणं तावद्दूरत एवास्ताम्, प्रत्युत प्रहरणीकृतपङ्कजकिंजल्ककल्कदूषितदृष्टिरिति स्वयमपराधिनी जाता । अतः कुड्मलिताननेत्यनेनानुल्बणमुखमारुतवितरणप्रयत्नः । अन्यथा चुम्बनार्थमभियुक्ता कोपेन पराङ्मुखी भवति । मौग्ध्यमप्येतस्मिंस्तदिति प्रत्यय एव । न तु वयोमौग्ध्यम् । धूर्ततयेत्यनुपपन्नत्वात् । धूर्ततापेक्षया च स्थितेत्यत्र प्रियप्रत्यासत्तिजनितेन हर्षातिरेकेणापराधविस्मरणं हेतुः । अत एव प्रणत्युपायं विनैव तेन चुम्बिता । अत्र केचिद्वायुपदेन जुगुप्साश्लीलमिति दोषमाचक्षते । तद्यदि कीरदेशे कुड्मलिताननेन्दुपदसंनिधावपि कमलपरिमलोद्गारिणो मुखमारुतस्य प्रतीतिर्न भवति भवति चाश्लीलप्रतीतिस्तदा वाग्देवतादेश इति व्यवसितव्य एवासौ । किं तु ह्यदैकमयीवरलब्धप्रसादौ काव्यप्रकाशकारौ प्रायेण दोषदृष्टी येनैवंविधेष्वपि परमार्थसहृदयानन्दमन्त्रे(पदे)षु सरसकविसंदर्भेषु दोषमेव साक्षादकुरुताम् । उक्तं च भट्टवार्तिके—'न चाप्यतीव कर्तव्यं दोषदृष्टिपरं मनः । दोषो ह्यविद्यमानोऽपि तच्चित्तानां प्रकाशते ॥' इति ॥

काचित्सखी कोपनिर्धूतभर्तृकायाः पश्चात्तापमपरस्याः प्रतिपादयति—

स्फुटतु हृदयं कामः कामं करोतु तनुं तनुं
न सखि चपलप्रेम्णा कार्यं पुनर्दयितेन मे ।
इति सरभसं मानावेशादुदीर्य वचस्तया
रमणपदवी सारङ्गाक्ष्या निरन्तरमीक्षिता ॥ ७३ ॥

तया कुरङ्गलोचनया गतवतो रमणस्य पदवी निरन्तरं निर्वर्णिता । किं कृत्वा । इत्यमुना प्रकारेणापर्यालोचिताध्यवसितत्वेन सरभसं यथा भवत्येवं मानावेशवशाद्वचनमुच्चार्य । इति कथम् । हे सखि, संततचिन्ताप्राग्भारेण हृदयं मे विदीर्यताम् । स्वेच्छया मन्मथस्तनुं दुर्बलां करोतु । क्षणिकप्रेम्णा प्रियेण न किंचित्प्रयोजनम् । धृत्यौत्सुक्ये व्यभिचारिभावौ ॥

काचित्कान्तैकान्तवृत्तान्तं सख्याः कथयति—

गाढाश्लेषविशीर्णचन्दनरजःपुञ्जप्रकर्षादियं
शय्या संप्रति कोमलाङ्गि परुषेत्यारोप्य मां वक्षसि ।

---

१. 'कोपाटोपात्' इति शृङ्गारदीपिका. २. 'सशङ्कितं' इति शृङ्गारदीपिका. ३. 'पश्यश्लेष' इति शृङ्गारदीपिका.

Digitized by Microsoft®

गाढौष्ठ[1]ग्रहपूर्वमाकुलतया पादाग्रसंदंशके-
नाकृष्याम्बरमात्मनो यदुचितं धूर्तेन तत्प्रस्तुतम् ॥ ७४ ॥

तेन धूर्तेन स्वच्छन्दमधरपीडनपूर्वकमनङ्गपर्याकुलतया चरणाग्रस्थाङ्गुलियन्त्रेण मन्नितम्बसिचयं मोचयित्वा तत्कालयोग्यमात्मनो यत्समीहितं तत्प्रक्रान्तम् । अत्र संनिवेशवशेन पुरुषायितम् । तथा आत्मनो यदुचितं न तु मम । तेनाग्राम्यत्वं लज्जा च । किं कृत्वा । इति हृदये मामारोप्य । इति किम् । हे सुकुमाराङ्गि, इदानीमिदं तल्पं कर्कशम् । कस्मात् । निर्भरमालिङ्गनोद्धटितचन्दनरजःपुञ्जप्रसञ्जनात् । इयं च नायिका प्रौढत्वेन मनस्विनी पूर्वमासीत् । अन्यथा सात्त्विकस्वेदेन चन्दनरजो नोपपद्यते ॥

कथमपि कृ[2]तप्रत्याख्याने प्रिये स्खलितोत्तरे
विरहकृशया कृत्वा व्याजं प्रकल्पितमश्रुतम् ।
असहनसखीश्रोत्रप्रा[3]प्तिप्रमादसंभ्रमं
विगै[4]लितदृशा शून्ये गेहे समुच्छ्वसितं पुनः ॥ ७५ ॥

सापराधे प्रिये कथमपि प्रणामशपथादिभिः कृतनिराकरणे सति । अथ तस्यै गोत्रस्खलितावसरे सुबहुदिवसमानात्मकविरहदुर्बलतया यथाकथंचित्संगमलौल्येन संप्रतिपित्सया परिजनव्यापारादिकं व्याजं विधायाश्रुतं नाटितम् । अथ चासहनवयस्याकर्णेऽन्याङ्गनानामप्राप्तिः सैव प्रमादस्तेन पर्याकुलं यथा भवत्येवं बाष्पायितदृष्ट्या शून्ये वेश्मनि पुनः समुच्छ्वसितम् । निवृत्ते रुदिते यदि प्राणी रुदितहेतुभूतां दुरवस्थामनुस्मरति तदोत्कम्पितहृदयः पुनरुच्छ्वसिति । संगमलोभेन सैव नायिका परगोत्रस्खलनं सहते न तु सखी । तस्मात्तयैवं चिन्तितं यद्येतद्गोत्रस्खलनमसहनसखीकर्णे प्रमादात्पतितं भवति तदाहमपि लघ्वी कथं जीवामि । अतिबहुमानसंभावनायाः ससंभ्रममिति विशेषणम् ॥

आदृष्टिप्रसरात्प्रियस्य पदवीमुद्वीक्ष्य निर्विण्णया
विच्छि[5]न्नेषु पथिष्वहःपरिणतौ ध्वान्ते समुत्सर्पति ।
दत्त्वैकं सशुचा गृहं प्रति पदं पान्थस्त्रियास्निन्क्षणे
मा भूदागत इत्यमन्दवलितग्रीवं पुनर्वीक्षितम् ॥ ७६ ॥

कयाचिदध्वगवध्वा सकलं दिवसं यावदृष्टिः प्रसरति तावदन्तरे दयितस्यागमनपद्धतिमुद्वीक्षिकया वीक्ष्य प्राणनिरपेक्षतारम्भकं निर्वेदं प्राप्तया वासरान्ते विरलसंचारेषु वर्त्मसु तमसि सम्यगुत्कटं प्रसरति सति निष्प्रत्याशया सशुचा गृहं प्रति पदमेकं क्षिप्त्वा-

---

१. 'ग्रहपीडनाकुलतया' इति शृङ्गारदीपिका. २. 'कृतप्रत्यापत्तौ' इति शृङ्गारदीपिका. ३. 'प्राप्तिं विशङ्क्य' इति शृङ्गारदीपिका. ४. 'विवलितदृशा' इति शृङ्गारदीपिका. ५. 'विश्रान्तेषु' इति शृङ्गारदीपिका.

Digitized by Microsoft ®

स्मिन्नेवान्तरे कदाचिदागतो मा भूदिति प्रत्याशया औत्सुक्याद्वेगविवर्तितकंधरं यथा भवत्येवं पुनः पृष्टतो विलोकितमिति तदेकतानेन प्रीतिप्रकर्षः । पथिष्विति बहुवचनेन सर्वमार्गेषु प्रियस्यागमनपदवी निर्वर्णितेत्यर्थः । पान्थस्त्रियेत्येकवचनेन विरहद्वोगभेषजात्मकप्रबोधनवाक्यप्रस्तावनादिभिराश्वासदायिनी वयस्यापि तस्या नास्तीति भावः । तदेवं प्रवासात्मको विप्रलम्भोऽप्येष करुणप्राय एवेति मर्मणि स्पृशति । परमग्रेतनश्लोकस्यौचित्येन रसिकाः संजीवन्ति । 'दूरदेशान्तरस्थे तु कार्यतः प्रोषिते प्रिये' इति प्रोषितभर्तृका नायिका ॥

आयाते दयिते मनोरथशतैर्नीत्वा कथंचिद्दिनं
वैदग्ध्यापगमाज्जडे परिजने दीर्घां कथां कुर्वति ।
दृष्टास्मीत्यभिधाय सत्वरपदं व्याधूय [2]चीनांशुकं
तन्वङ्ग्या रतिकातरेण मनसा नीतः प्रदीपः शमम् ॥ ७७ ॥

कृशाङ्ग्या रत्यर्थं कातरेण मनसा विशिष्टया प्रदीपो विध्यापितः(निर्वापितः) । किं कृत्वा । द्रुतपदं प्रदीपसमीपमेत्य चीनदेशोद्भवं वस्त्रं विशेषेणास्फाल्य । एतदेव किं कृत्वा । इति मिथ्याभिधाय । इति किम् । दृष्टास्मीति । वृश्चिकादिना हि दष्टो विस्फुल्लवस्त्राञ्चलचरणविन्यासप्रक्रियोद्भ्रान्तो दीपविध्यापनभाण्डपातनादिकमवश्यं करोति । क्व सति । दयिते मनोरथशतैरायाते सति । पुनरपि किं कृत्वा दीपः शमितः । उभयत्र संबन्धान्मनोरथशतैरेवमेवमुपालम्भपरिरम्भचुम्बनादिकं करिष्यामीति स्वरूपैर्महता कष्टेन दिनमतिवाह्य । ननु व्याजेन दीपमुपशमय्य किमिति रतिमाकाङ्क्षतीत्याह—वैदग्ध्येत्यादि । इदानीं कीदृशोऽवसरः । कीदृशमत्रत्यानां चेतः । किमस्माभिः कर्तव्यमित्यादिवैदग्ध्याभावान्मूर्खे परिजने गृहदेशान्तराकथां दीर्घां कुर्वति । इयं च कथा संभोगान्तरायत्वाद्विद्विष्टा । यदुक्तम्—'या गोष्ठी लोकविद्विष्टा या च स्त्रैरविसर्पिणी । परार्हिंसात्मिका या च न तामवगिरेद्बुधः ॥ नात्यन्तं संस्कृतेनैव नात्यन्तं देशभाषया । कथां गोष्ठीषु कथयंल्लोके बहुमतो भवेत् ॥ लोकचित्तानुवर्तिन्या क्रीडामात्रैककार्यया । गोष्ठ्या समाचरंल्लोके नृणां बहुमतो भवेत् ॥'

कश्चिद्विरही प्रियतमामनुध्यायति—

आलम्ब्याङ्गणवा[3]टिकापरिसरे चूतद्रुमे मञ्जरीं
सर्पत्सान्द्रपरागलम्पट[4]रटद्भृङ्गाङ्गनाशोभिनीम् ।
मन्ये त्वां तनुमुत्तरीयशकलेनाच्छाद्य बाला स्फुर-
त्कण्ठध्वाननिरोधकम्पितकुचश्वासोद्गमा रोदिति ॥ ७८ ॥

---

१. 'गत्वा वासगृहे जडे' इति शृङ्गारदीपिका. २. 'चेलाञ्चलम्' इति शृङ्गारदीपिका. ३. 'वापिका' इति शृङ्गारदीपिका. ४. 'रणत्' इति शृङ्गारदीपिका.

Digitized by Microsoft ®

मन्येऽवश्यमस्मिन्समये मुग्धा रोदिति । किंविशिष्टा । स्फुरणानुमेयो यः कण्ठध्वानस्तस्य निरोधस्तेन कम्पितौ कुचौ येन तादृशः श्वासोद्गमो यस्याः सा तथोक्ता । किं कृत्वा । निजां कृशां शरीरलतामुपरितनांशुकशकलेन पिधाय । पुनः किं कृत्वा । रसालशाखिनि मञ्जरीमालम्ब्य । किंविशिष्टाम् । सर्पत्सान्द्रपरागो येषु । ते च रजस्वसंभवाद्योग्यतया मधुनि मधुलम्पटा मधुकराः प्रसरन्ति । घनैः कुसुमरजसि परिमललोभेन लम्पटा रटन्तो ये भृङ्गास्तेषामङ्गनाश्च ताभिः शोभत इत्येवंशीला ताम् । चूतद्रुम एव क इत्याह—यत्र मया सह क्रीडितं यत्रैव च पिष्टविकाराशन(?)यूतपणव्यतिकरे जयपराजयव्यवस्थया विलसितं तस्या अङ्गणवाटिकायाः प्रदेशे । स्वामित्यनेन विशेषध्वनिना संप्रति तस्यास्तनुरेवेत्यर्थः । प्राणानां गतकल्पत्वात् । यः शाखादिकमवलम्ब्य तिष्ठति तस्याङ्गमुद्घाटितं भवति । तथापि विकलतयोत्तरीयशकलेनाच्छाद्य न तु सावधानतया समस्तेन । चूतद्रुमालम्बनपूर्वकं संस्थानमपि प्राणजिहासया दुष्करप्रायम् । मुकुलिताम्रदर्शनस्यापि विरहिणामशक्यत्वात् । यथा मालतीमाधवे—'धत्ते चक्षुर्मुकुलिनि रणत्कोकिले बालचूते मार्गे गात्रं क्षिपति बकुलामोदगर्भस्य वायोः । दावप्रेम्णा सरसविसिनीपत्रमात्रान्तरायस्ताम्यन्मूर्तिः श्वयति बहुशो मृत्यवे चन्द्रपादान् ॥' अङ्गनवाटिका च शृङ्गारिणां भवत्येव । यदुक्तम्—'तत्र भवनमासन्नोदकं वृक्षवाटिकासहितं द्विवासगृहं कारयेत् ॥ [अथ च मूलगृहद्वारि सहकारारोपणं सुप्रसिद्धम् । यदुक्तम्—'किं द्वारि दैवहतिके सहकारकेण संवर्धितेन विषपादप एष पापः । अस्मिन्मनागपि विकासविकारभाजि भीमा भवन्ति मदनज्वरसंनिपाताः ॥' इति ॥]

कश्चित्प्रोषितभर्तृकात्मानमधिक्षिपति—

यास्यामीति समुद्यतस्य गदितं विस्रब्धमाकर्णितं
गच्छन्दूरमुपेक्षितो मुहुरसौ व्यावृत्य तिष्ठन्नपि ।
तच्छून्ये पुनरास्थितासि भवने प्राणास्त एते दृढाः
सख्यस्तिष्ठत जीवितव्यसनिनी दम्भादहं रोदिमि ॥ ७९ ॥

हे सख्यः, स्वस्थावस्थया तिष्ठत मद्विषये नाधृतिः कार्या । यतोऽहं जीविताकाङ्क्षिणी च्छद्मना रोदिमि । यदि च प्राणनिरपेक्षा भवामि रोदिम्येव न । किं च, दयितस्य प्रवासार्थमुद्यतस्य यास्यामीति वचनं मया विस्रब्धं यथा भवत्येवमाकर्णितम् । गच्छन्सन्मदपेक्षया वारंवारमसौ व्यावृत्य तिष्ठन्नपि दूरं यावदुपेतः । तदैव किल जीवितत्यागावसर आसीत् । तस्मादनेकसङ्ग्रामनिर्व्यूढास्मि । इदानीं पुनर्यस्मिन्नेव भवने तेन सह विलसितं तस्मिन्नेषा वज्रमयी आस्थितास्मि । त एते चण्डालचरिताः प्राणा अपि दृढा एव । अत्र चायमुक्तेरुल्लेखः—पूर्वार्धे यद्यहं यास्यामीति गदिते पर्याकुली भवामि तदा च गच्छन्तं निवारयामि । यदि जीविताकाङ्क्षिणी भवामि । तस्माद्विस्रब्धचेष्टा गमनोपेक्षिणी च किं न भवामि इति मे पूर्वं निश्चितमासीत् । इदानीं कस्मादपि दुर्दै-

Digitized by Microsoft ®

वादेवंविधा कर्कशा संवृत्तास्मि । गदितमित्यत्र भावे क्तः । अत्राविवक्षितवाच्यस्य ध्वनेर्भेदोऽप्यन्ततिरस्कृतवाच्यो नाम । यथादिकवेर्वाल्मीकेः—'निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते' इति ॥

कांचित्सखी नायिकां भीषयित्वा मानग्रहापस्मारान्मोचयति—

अनालोच्य प्रेम्णः परिणतिमनादृत्य सुहृद-
स्त्वयाकाण्डे मानः किमिति सरले संप्रति कृतः ।
समाकृष्टा ह्येते प्रलयदहनोद्भासुरशिखाः
स्वहस्तेनाङ्गारास्तदलमधुनारण्यरुदितैः ॥ ८० ॥

धूर्तविदग्धानां कुटिलमनोज्ञेषु चेष्टितचमत्कारेषु प्रविश्य क्रीडितुं न जानासीति हे सरले, तस्मिन्नेवावसरे तव दयितोऽन्याङ्गनानवरङ्गस्नेहवागुरायां पतित इत्यकाले संप्रति त्वया किमिति मानः कृतः । किं कृत्वा । प्रेम्णः परिणतिमनालोच्य । दिनानि पश्च यथा तथास्तु । अक्षिणी निमील्य समयोऽतिवाहनीयः । पानीयमवश्यं पानीयवर्त्मन्यागमिष्यतीत्यादि किमपि न संप्रधारितमित्यर्थः । न केवलमिदं कृत्वा, एवंविधोपदेशपेशलान्सादृशान्सुहृदोऽप्यनादृत्य । इदानीं पुनः किं कर्तुं याति । यतः प्रलयदहनस्येवोद्भासुराः शिखा येषां तेऽमी स्वहस्तेनाङ्गारास्त्वया सम्यगाकृष्टाः । उपाख्यानमेतत् । अथ च देहदाहात्मक उपन्यासः । तस्मादिदानीं पुनः पर्याप्तमरण्यरुदितैः । लोकोक्तिरियम् । अथ चारण्यप्रायं सर्वमिदानीं ते शून्यमासीत् ॥

कश्चिन्मनस्विनीमनुनयति—

कपोले पत्राली करतलनिरोधेन मृदिता
निपीतो निःश्वासैरयममृतहृद्योऽधररसः ।
मुहुः कण्ठे लग्नस्तरलयति बाष्पः स्तनतटं
प्रियो मन्युर्जातस्तव निरनुरोधे न तु वयम् ॥ ८१ ॥

हे निरनुरोधे, पादोपान्तेऽपि लुठतोऽपि मे भणितं न करोषि मन्युस्ते वल्लभो जातः । किंचिदुपेक्षालेशेनान्तर्गर्भितेयमुक्तिः । अत एव न तु वयमित्यौदासीन्यव्यञ्जकं बहुवचनम् । कथं मन्युरेव प्रियकार्यं करोतीत्याह—कपोल इत्यादि । विषादानुभावतया यस्मिन्सततं मुखं न्यस्तं तस्य करतलस्य निरोधेन कपोले पत्राली प्रोच्छिता । स्वेदाननुभूतत्वात् । सुधास्वादुरयमित्यनिर्वचनीय ओष्ठरसो निःश्वासैः शोषितः । अन्तर्निरुद्धतया कण्ठे सक्तो बाष्पः स्तनतटं कम्पयति । अपह्नुतिरलंकार ॥

शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।

---

१. 'तरले' इति शृङ्गारदीपिका. २. 'स्तनतटीं' इति शृङ्गारदीपिका.

Digitized by Microsoft®

विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला[1] चिरं चुम्बिता ॥ ८२ ॥

व्रीडानम्रवदना बाला वल्लभेन स्मयमानेन चिरं चुम्बिता । किं कृत्वा लज्जानम्रमुखी । पत्युः कपोलस्थलीं जातपुलकामिति हेतोर्जाग्रदवस्थाशंसिनीं विलोक्य । कपोलावलोकनमेव किं कृत्वा कृतम् । निद्राव्याजमुपागतस्य मुखं परिचुम्ब्य । कथम् । विस्रब्धम् । विस्रब्धचुम्बनमेव किं कृत्वा कृतम् । सुचिरं निर्वर्ण्य । मुग्धा ह्यन्यदा लज्जासाध्वसाभ्यां पराङ्मुखीकृताः क्व दयितमुखनिर्वर्णनचुम्बनरसमनुभवन्ति । सुचिरं निर्वर्णनमेव किं कृत्वा कृतम् । शयनात्स्तोकमुत्थाय । कथम् । प्रबोधशङ्कया शनैः । स्तोकोत्थानमेव किं कृत्वा कृतम् । मा कदाचिदपि कोऽपि मां पश्येदिति शङ्कया शून्यमपि वासगृहं विशेषेण दृष्ट्वा । (अत्र भिन्नकर्तृकत्वशङ्का न कार्या । लज्जाक्रियापेक्षया समानकर्तृकत्वात् ।) नायिकायाश्च साभिप्रायचुम्बनमेतत् । यदुक्तम्—'सुप्तस्य मुखमालोकयन्त्याः साभिप्रायेण चुम्बनं रागोद्दीपनम्' इति । स्वाधीनपतिका मुग्धा नायिका ॥

लोलेन[2] भ्रूलतया विपक्षदिगुपन्यासेऽवधूतं[3] शिर-
स्तद्वृत्तान्तनिरीक्षणे कृतनमस्कारो विलक्षः स्थितः ।
कोपात्ताम्रकपोलभित्तिनि मुखे दृष्ट्वा गतः पादयो-
रुत्सृष्टो गुरुसंनिधावपि विधिर्द्वाभ्यां न कालोचितः ॥ ८३ ॥

श्वशुरप्रायगुरुजनसकाशेऽपि द्वाभ्यां चातुर्येण कोपप्रसादनात्मको विधिः समयोचितो न मुक्तः । कथं कथमित्याह—तत्र गत्वा आगतोऽसीति सूचकं स्पन्दितया भ्रूलतयान्यवनिताग्रहोद्देशोपक्षेपे नायिकया शिरोऽवधूतम् । नायकोऽपि शिरःकम्पनवृत्तान्तनिरीक्षणे विलक्षः स्थितः । किंविशिष्टः । नमस्या भवती यदेवमेव निरपराधस्य ममापराधमारोपयतीत्याशयेन कृतनमस्कारः । अथवा तस्यै दिशे मम नमस्कार एवेति भावः । न केवलं विलक्षः स्थितः नायिकाया मुखे इदानीं किं ते कितव कर्तुं शक्नोमि यद्येकान्ते लब्धो भवसि तदा शिक्षां ग्राहयामीति कोपात्ताम्रगण्डमण्डले मुखे सत्यभिनयेन प्रणामं सूचयन्दृष्ट्वा तत्पादयोः पतितः । अत्र कोपेन पुलकाद्यभावात्कपोले कर्कशत्वसाधारणधर्मो भित्तित्वेन रूपितः । दृष्टिश्चेयं लज्जितशङ्किता । यथा—'किंचिदञ्चितपक्ष्माग्रा पतितोर्ध्वपुटा भिया । त्रपाधोगततारा च शङ्किता दृष्टिरिष्यते' ॥

काचित्सखीभिरुपदिष्टं मानं स्थापयितुमक्षमा ताः प्रत्याह—

जाता नोत्कलिका स्तनौ न लुलितौ गात्रं न रोमाञ्चितं
वक्त्रं स्वेदकणान्वितं न सहसा यावच्छठेनामुना ।

---

१. 'बालाभवच्चुम्बिता' इति शृङ्गारदीपिका. २. 'लोलभ्रूलतया' इति शृङ्गारदीपिका. ३. 'विधूतं' इति शृङ्गारदीपिका. ४. 'ईषत्ताम्रकपोलकान्तिनि मुखे दृष्ट्वा नतः' इति शृङ्गारदीपिका.

Digitized by Microsoft®

दृष्टेनैव मनो हृतं धृतिमुषा प्राणेश्वरेणाद्य मे
तत्केनात्र निरूप्यमाणनिपुणो मानः समाधीयताम् ॥ ८४ ॥

तस्मात्कथयत केनोपायेनात्र संस्थानके मानः स्थैर्यं नीयताम्, अपि तु न केनापि । कथंभूतः । निरूप्यमाणनिपुणः । निपुणं निरूप्यमाणो निरूप्यमाणनिपुणः । सुप्सुपेति समासः । पूर्वनिपातानियमः । यतो यन्मानात्मकविरहातिवाहनक्षममिति संभावितमासीत्तदद्य मे मनो दृष्टेनैव यावदमुना शठेन प्राणेश्वरेण सहसा लुण्ठितम् । किंविशिष्टेन । एतदसंगमे कथं जीविष्यामीति मे धृतितस्करेण । (यदि पुनः संनिधावुपविश्य प्रणामादिकमारभते तदा तस्य कथैव का । तच्चानेन कृतमेव न । कथं ज्ञायत इत्याह— उत्कण्ठा न जाता । कुचौ न कम्पितौ । अङ्गं न पुलकितम् । मुखमपि खेदकणचितं न जातम् ।) संनिधावुपविश्य यदि प्रणामादिकमारभते तदा सर्वमेव जातप्रायं भवतीत्यर्थः । अहो नूतनोऽयं तस्करो यदृष्टिमात्र एव पदार्थमपहरतीत्याश्चर्यद्योतकं शठेनेति प्रीतिवचनमेव ॥

दृष्टः कातरनेत्रया चिरतरं बद्धाञ्जलिं याचितः
पश्चादंशुकपल्लवेन[1] विधृतो निर्व्याजमालिङ्गितः ।
इत्याक्षिप्य[2] यदा समस्तमघृणो गन्तुं प्रवृत्तः शठः
पूर्वं प्राणपरिग्रहो दयितया मुक्तस्ततो वल्लभः ॥ ८५ ॥

तदा प्रवसतो नायकस्य दयितया प्रथमं जीवितास्था मुक्ता तदनन्तरं दयितो मुक्तः । तदा कदा । यदेत्यादिकं सर्वममानयित्वा गन्तुमेव कितवः प्रवृत्तः । किंविशिष्टः । मुमूर्षुमपि वल्लभामुपेक्षत इति निर्घृणः । इत्यादिकं किमित्याह—स्थापनार्थं दैन्यव्यञ्जकत्वेन कातरचक्षुषा चिरतरमवलोकितः । पश्चादञ्जलिं बद्ध्वा प्रार्थितः । अनन्तरं वस्त्राञ्चलेन विधृतः । चरमं गाढमुपगूढः । गन्तुं प्रवृत्तो न तु गत एवेति हेतोरेकानुरागो न शङ्कनीयः । कर्तृदीपकमलंकारः । यदुक्तम्—'यत्रैकमनेकेषां वाक्यार्थानां क्रियापदं भवति । तद्वत्कारकपदमपि तदेतदिति दीपकं द्वेधा ॥' अतिशयभेदः पूर्वं च । यदुक्तम्—'यत्रातिप्रबलतया विवक्ष्यते पूर्वमेव जन्यस्य । प्रादुर्भावः पश्चाज्जनकस्य तु तद्भवेत्पूर्वम् ॥' यथा—'दुर्लभजनमभिलषतामादौ दंदह्यते मनो यूनाम् । गुरुरनिवारप्रसरः पश्चात्कामानलो ज्वलति' ॥

कश्चिद्वियोगी दयितादुरवस्थामनुस्मरति—

तप्ते महाविरहवह्निशिखावलीभि-
रापाण्डुरस्तनतटे हृदये प्रियायाः ।

---

१. 'पल्लवे च' इति शृङ्गारदीपिका. २. 'इत्याक्षिप्य समस्तमेवमघृणो' इति शृङ्गारदीपिका.

Digitized by Microsoft®

मन्मार्गवीक्षणनिवेशितदीनदृष्टे-
र्नूनं छमच्छमिति बाष्पकणाः पतन्ति ॥ ८६ ॥

नूनमहमेवं मन्ये—दयिताया हृदि च्छमच्छमित्यश्रुविप्रुषः पतन्ति । किंविशिष्टायाः । मदागमनपदवीगवेषणदत्तदीनदृष्टेः । किंविशिष्टे हृदये । महतीभिर्वियोगानलज्वालाभिस्तप्ते । पुनः कीदृशे । आपाण्डुरस्तनतटे । संतप्तवस्तुनि पतितं पयश्छमत्करोतीत्यनुकारः । रूपकमलंकारः । यदुक्तम्—'यत्र गुणानां साम्ये सत्युपमानोपमेययोरभिधा । अविवक्षितसामान्या कल्प्यत इति रूपकं ज्ञेयम् ॥' परं गृहीतमुक्तोऽलंकारः ॥

काचित्सखी मानिनीवृत्तान्तमपरसख्याः कथयति—

चिन्तामोहविनिश्चलेन मनसा मौनेन पादानतः
प्रत्याख्यानपराङ्मुखः प्रियतमो गन्तुं प्रवृत्तोऽधुना ।
सव्रीडैरलसैर्निरन्तरलुठद्बाष्पाकुलैरीक्षणैः
श्वासोत्कम्पिकुचं निरीक्ष्य सुचिरं जीवाशया वारितः ॥ ८७ ॥

तया प्रियतमो निवारितः । किंविशिष्टः सन् । गन्तुं प्रवृत्तः । यतः प्रत्याख्यानेन पराङ्मुखो निराकृत एव । किंविशिष्टः सन् । चरणानतः । केन विशिष्टः । विदितापराधत्वान्मौनेन । पुनरपि केन । चेतसा । कथंभूतेन । प्रसादं करिष्यति न वेति चिन्तयान्तःकरणशून्यत्वान्मोहेन च स्तिमितेन । विनिश्चलमिति भीरुत्वोक्तिः । कदा । अधुना । इदानीं यावत्प्रसादोपायांश्चकारेत्यर्थः । कया वारितः । जीविताशया । प्रत्याख्यानं तावत्साहसेन कृतम् । गन्तुं प्रवृत्ते तस्मिन्प्राणान्धारयितुमशक्यत्वादनन्यगतिकत्वं जातमित्यर्थः । अद्याहमेव त्वया विना जीवितुं न शक्नोमि, तदा किमेवं लघ्वी भवामीत्यभिधानात् । श्वासेनोत्कम्पितौ कुचौ यत्र तत्तथोक्तम् । अथ च यद्यहं जीवामि तदा प्रियसंगमं प्राप्नोमीति जीवने कृता आशा जीवाशा । किं कृत्वा वारितः । सुचिरं निरीक्ष्य । कैः । ईक्षणैः । किंविशिष्टैः । अवष्टम्भत्यागव्यञ्जकतया सव्रीडैः । दैन्यद्योतकतयालसैः । अपमानातिशयान्निरन्तरलुठद्बाष्पाकुलैः ॥

कश्चिद्देशान्तरादागतो मनोरथप्राप्तप्रियतमासमागमं प्रणिधत्ते—

म्लानं पाण्डु कृशं वियोगविधुरं लम्बालकं सालसं
भूयस्तत्क्षणजातकान्ति रभसप्राप्ते मयि प्रोषिते ।

---

१. 'मोहनिबध्यमानमनसा' इति शृङ्गारदीपिका. २. 'प्रत्याख्यात' इति शृङ्गारदीपिका. ३. 'प्रवृत्तः शठः' इति शृङ्गारदीपिका. ४. 'तन्वङ्ग्या स पुनस्तया तरलया तत्रान्तरे वारितः' इति शृङ्गारदीपिका. ५. 'विलास' इति शृङ्गारदीपिका. ६. 'चालसं' इति शृङ्गारदीपिका. ७. 'मधुरं प्राप्ते' इति शृङ्गारदीपिका.

Digitized by Microsoft ®

साटोपं रतिकेलिकालसरसं[1] रम्यं किमप्यादरा-
द्यत्पीतं[2] सुतनोर्मया[3] वैदनकं[4] वक्तुं न तत्पार्यते ॥ ८८ ॥

यन्मया सुतनोर्वदनकमधरग्रहचमत्कारिचुम्बनपूर्वकत्वेन यत्नात्पीतं तदनिर्वचनीयत्वाद्वक्तुं न शक्यते । तस्य विशेषणान्याह—आन्तरेण मर्मस्पृशा दुःखेन कुसुममिव म्लानम् । प्रत्यूषदुपारांशुवत्कान्तिविगलितत्वेन पाण्डु । असौस्थ्येनाहारस्यारोचकत्वात्सुतनोरिति [पदेन] शरीरकार्श्यात्कृशम् । किंविशिष्टं सदुक्तवक्ष्यमाणविशेषणयोग्यं जातमित्याह—वियोगविधुरम् । इदं विशेषणं हेतुत्वेन सालसं यावत्सर्वत्र संबध्यते । नहि वैधुर्यमेव केवलं वियोगहेतुकम् । म्लानत्वादीनामपि तन्निमित्तत्वात् । प्रसाधनपरित्यागेन कर्तनादिरहितत्वाल्लम्बालकम् । अन्तःखेदेन सालसम् । अथ दर्शनात्मकसंभोगसमुचितं विशेषणमाह । चिरमनोरथप्राप्त्या पुनस्तत्कालोल्लसितकान्ति । क्व सति । मयि पथिकेऽकस्मादभ्रसप्राप्ते सति । अथ चुम्बनसमयविशेषणमाह—त्वमद्य यावन्मां विहाय तत्र स्थित इत्याशयेन मानाद्भ्रूभङ्गादिभिः साटोपम् । रतिक्रीडासमये आर्द्रमत एव किमपि रमणीयम् । सालसमित्यत्रालसपदं भावप्रधानम् । तेन सालस्यमित्यर्थः । मुग्धाया अल्पत्वेन मुखमप्यल्पं तेनाल्पार्थे कप्रत्ययेन वदनकम् । भूयस्तत्क्षणजातकान्तीत्यनेन विलासः । 'तात्कालिको विशेषस्तु विलासोऽङ्गक्रियादिषु' ॥

सैवाहं प्रमदा नृणामधिगतावेतौ च तौ नूपुरा-
वेषास्माकमवृत्तिरेव सहजस्त्रीडाधनः स्त्रीजनः ।
इत्थं लज्जितया स्मृतेरुपगमे मत्वा तनुं संभ्रमा-
त्पुंभावः प्रथमं रतिव्यतिकरे मुक्तस्ततो वल्लभः ॥ ८९ ॥

कयाचिद्विपरीतरतिव्यतिकरे पूर्वं पर्याकुलतया पुरुषभावस्त्यक्तस्तदनन्तरं वल्लभो मुक्तः । किं कृत्वा । तनुं ज्ञात्वा । मोहनसमये शरीरपरिज्ञानमेव नासीत्, का पुनः कथा स्त्रीपुरुषविषयविभागस्येति भावः । किंविशिष्टया । लज्जितया । क्व सति । इत्थं स्मृतेरुपगमे । इत्थं कथम् । सैवाहं लज्जावती गृहलोकानां विदिता इदानीं प्रकृष्टमदा जाता । एतौ च तौ नूपुरौ संभोगाभियोगेन शब्दायमानौ मयोच्छृङ्खलया लोकानां श्रुतिसंवादेन ज्ञापितौ । एषास्माकं स्त्रीणामक्रियैव । यतः सहजस्त्रीडैव धनं यस्य स तथोक्तः स्त्रीजनः । अतिशयभेदः पूर्वमलंकारः । 'निःसाध्वसत्वं प्रागल्भ्यम्' इत्यनेन च प्रागल्भ्यं नाम नाट्यालंकारः ॥

करकिसलयं धूत्वा धूत्वा विमार्गति वाससी
क्षिपति सुमनोमालाशेषं प्रदीपशिखां प्रति ।

---

१. 'केलिदत्तरभसं' इति शृङ्गारदीपिका. २. 'पीतं यत्' इति शृङ्गारदीपिका. ३. 'मुखमिदं तत्केन विस्मार्यते' इति शृङ्गारदीपिका. ४. 'विलम्बितमेखला' इति शृङ्गारदीपिका.

Digitized by Microsoft ®

स्थगयति मुहुः पत्युर्नेत्रे विहस्य समाकुला
सुरतविरतौ रम्या[1] तन्वी मुहुर्मुहुरीक्षते ॥ ९० ॥

संभोगावसाने क्षामाङ्गी रमणीया पतिं वारंवारमवलोकते । अत एव साकूतं विहस्य लज्जया संभ्रान्ता भर्तुर्नेत्रे भूयोभूयः समाच्छादयति । रम्यैव कथमित्याह—इतस्ततः पतिते वाससी पाणिपल्लवं भ्रमयित्वा परिधानार्थं मृगयति । प्रदीपविध्यापनार्थं सुरतसंमर्दक्रुटितधम्मिल्लकुसुममालाशेषं क्षिपति । प्रियनयनस्थगनं च घट्टितकचुम्बनेऽप्युक्तमस्ति मुग्धायाः—'ईषत्परिगृह्य मीलिताक्षी जिह्वाग्रेण घट्टयन्ती करेण तस्य नयने छादयतीति घट्टितकम्' । 'मन्मथाप्यायिता छाया सैव कान्तिरिति स्मृता' इत्यनेन कान्तिर्नाट्यालंकारः । यथा भट्टनारायणस्य—'उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा धृत्वा चान्येन वासो विगलितकबरीभारमंसे वहन्त्याः । भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु' ॥

काचित्सखी मानिनीं भीषयित्वा नायकसंप्रतिपत्तौ प्रवेशयति—

सन्त्येवात्र गृहे गृहे युवतयस्ताः पृच्छ गत्वाधुना
प्रेयांसः प्रणमन्ति किं तव पुनर्दासो यथा वर्तते ।
आत्मद्रोहिणि दुर्जनैः[2] प्रलपितं कर्णेऽनिशं मा कृथा-
श्छिन्नस्नेहरसा भवन्ति पुरुषा दुःखानुवर्त्याः[3] पुनः ॥ ९१ ॥

सन्त्येवात्र गृहे गृहे यौवनोद्धताः स्त्रियः । ताः पृच्छ गत्वा । कदा । अधुना । विलम्बं मा कृथा इत्यर्थः । किं पृच्छामीत्याह—प्रेयांसः किं तथा प्रणमन्ति यथा तव प्रेयान्दासवत्प्रणमंश्च वर्तते । प्रेयांसो हि प्रणम्यन्ते । तस्मात् हे आत्मद्रोहिणि, दुर्जनैरनर्थमभिहितं कर्णेऽप्यनिशं मा कृथाः का पुनः कथा हृदये । कर्णेजपवचनैर्हि प्रियोऽपमानितः सन्कदाचित्स्नेहमुत्सृजति । निःस्नेहे तस्मिन्सति किं भवतीत्याह—छिन्नस्नेहरसाः पुरुषाः पुनर्दुःखानुवर्त्या भवन्ति दुःखेनानुवर्तितुं शक्यन्ते । दुराराध्या इत्यर्थः ॥

काचिन्मानशिक्षणनिर्बन्धदुर्ललिताः सखीरुपालभते—

निःश्वासा वदनं दहन्ति हृदयं निर्मूलमुन्मथ्यते[4]
निद्रा नैति न दृश्यते प्रियमुखं नक्तंदिवं रुद्यते ।
अङ्गं शोषमुपैति पादपतितः प्रेयांस्तदोपेक्षितः[5]
सख्यः कं गुणमाकलय्य दयिते मानं वयं कारिताः ॥ ९२ ॥

---

१. 'रम्यं तन्वी पुनः पुनरीक्षते' इति शृङ्गारदीपिका. २. 'दुर्जनप्रलपितं कर्णे भृशं' इति शृङ्गारदीपिका. ३. 'दुःखानुवृत्त्या यतः' इति शृङ्गारदीपिका. ४. 'उन्मूल्यते' इति शृङ्गारदीपिका. ५ 'तथा' इति शृङ्गारदीपिका.

Digitized by Microsoft®

हे सख्यः, कं स्वार्थमनुसंधाय दयिते वयं मानं कारिताः । वयमिति बहुवचनेन सखीष्वौदासीन्यम् । अनर्थ एव को जात इत्याह—निःश्वासा इत्यादि । अनन्तदुःखसंबाधत्वेन संततमुष्णसन्तो निःश्वासवायवो मुखमुष्णतया तपन्ति । निराधारतया हृदयं निर्मूलमुन्मथ्यते । कर्मकर्तरि यकू । चिन्ताज्वरेण निद्रा नागच्छति । संतापशमनं चन्द्ररुचिरं प्रियमुखं न दृश्यते । तद्दर्शनमन्तरेण चक्षुषोः साश्रुत्वादहोरात्रं रुद्यते । सरस्त्याजितायाः कमलिन्या इवाङ्गं मे शुष्यति । तदा पादपतितोऽपि युष्मद्भणितेन प्रेयानवगणितः । विषमालंकारः । यदुक्तम्—'यत्र क्रियाविपत्तेर्न भवेदेव क्रियाफलं तावत् । कर्तुरनर्थश्च भवेत्तदपरमभिधीयते विषमम्' ॥

काचिन्मानिनी पुण्यसामग्र्या मनोरथशतप्राप्तप्रियतमसंप्रतिपत्तिः पुनर्विप्रतिपत्तिविषये स्वगतेन शपथं करोति—

अद्यारभ्य यदि प्रिये पुनरहं मानस्य वान्यस्य वा
गृह्णीयां शठदुर्नयेन मनसा नामापि संक्षेपतः ।
तत्तेनैव विना शशाङ्कधवलाः स्पष्टाट्टहासा निशा
ऐको वा दिवसः पयोदमलिनो यायान्मम प्रावृषि ॥ ९३ ॥

यद्यहमद्यारभ्य मानस्यान्यस्य वापि परिचरणप्रसादादेर्नामापि गृह्णीयाम् । अस्तु तावत्करणम् । केन । मनसा । कीदृशेन । शठदुर्नयेन । कोऽर्थः । मिथ्यैवास्य दोषमारोपयामीति । तदा किं स्यादित्यत आह—संक्षेपत इत्यादि । संदिग्धमरणानेकप्रतिज्ञानां परिहारेण निःसंदेहमरणाध्यवसायतया संक्षेपतस्तेनैव प्रियेण विना सुधांशुधवला अत एव स्पष्टाट्टहासा इव यामिन्यो मे यान्तु । दुःखितस्य हि हसन्कोऽपि न प्रतिभासते । अत एव प्रावृट्काले समन्ततः संनद्धमेघमालामलीमस एकोऽपि दिवसो यायात् । एकसंख्याविशेषेण चन्द्रवत्यनेकरात्रिभ्योऽपि प्रावृड्दिवसस्यातिवाहयितुमशक्यत्वमुक्तम् ॥

काचित्सखी नूतनमानिनीमात्मप्रियदुर्नयावेदनेन बोधयति—

इदं कृष्णं कृष्णं प्रियतम ननु श्वेतमथ किं
गमिष्यामो यामो भवतु गमनेनाथ भवतु ।
पुरा येनैवं मे चिरमनुसृता चित्तपदवी
स एवान्यो जातः सखि परिचिताः कस्य पुरुषाः ॥ ९४ ॥

हे सखि, कस्य परिचिताः पुरुषाः । अपि तु न कस्यापि । आत्मीया न भवन्तीत्यर्थः । अथातिनिर्बन्धमानेनोद्वेजितैस्तैः सह परिचयोऽपि दुर्लभः । यतः स एवान्यो

---

१. 'नहि प्रिये पुनरहं मानस्य वा भाजनं गृह्णीयां विषरूपिणः शठमतेर्नामापि' इति शृङ्गारदीपिका. २. 'किं तेनैव' इति शृङ्गारदीपिका. ३. 'किरणस्पष्टा—' इति शृङ्गारदीपिका. ४. 'नैकोऽपि' इति शृङ्गारदीपिका.

Digitized by Microsoft®

जातः । एतेनातः प्राग्यैवाहं स एवासीदित्यर्थः । तस्मात्त्वमपि सागसि प्रिये खेदं मा कृथाः । स एव कः येन पुरा मम चित्तपदवी चिरकालमेवमनुसृता । येन येन वर्त्मना मम चित्तं विलसितं तेन तेन पृष्ठतो लग्नः । सर्ववारानुवृत्तिपर आसीदित्यर्थः । एवं कथमित्याह—हे प्रियतम, इदं कृष्णम् । स आह—कृष्णम् । ननु श्वेतमिदम् । स आह—अथ किम् । गमिष्यामः । स आह—यामः । नायिकाभविष्यदुक्तौ नायकस्य वर्तमानोक्त्यानुवृत्तेरतिशयः । आस्तां गमनेन । स आह—आस्ताम् ॥

काचिदन्तर्विलीनमाना स्वगतेन वितर्कं संधारयति—

चरणपतनं सख्यालापा मनोहरचाटवः
कृशतरतनोर्गाढाश्लेषो हठात्परिचुम्बनम् ।
ईति हि चपलो मानारम्भस्तथापि हि[3] नोत्सहे
हृदयदयितः कान्तः कामं किमत्र करोम्यहम् ॥ ९५ ॥

इत्यमुना प्रकारेण नूनं गत्वर एव मानोपक्रमः । तथापि स्फुटमीर्ष्यया न मानं त्यक्तुमुत्सहे । इतिशब्दस्यापि शब्दस्याग्रे च हिशब्दो मानारम्भचापल्यस्य मानत्यागानुत्साहस्य च निश्चयं गमयति । इति किम् । चरणपतनेत्यादि । प्रियस्य मच्चरणे पतनम् । तदनुरुद्धसखीनामालापाः । किंविशिष्टाः । मनोहराणि चाटूनि येषु ते तथोक्ताः । मदीयदुर्बलाङ्गस्य प्रियकृतं गाढालिङ्गनम् । बलात्कारेण समन्ताच्चुम्बनम् । कृशतरतनोरित्यस्य पदस्यायमभिप्रायः—मया तावन्मानः कृतो यावत्क्षीणेन्दुलेखाशेषं मम शरीरमभूत् । ननु यदि नोत्सहे तदा प्रियेण विनैव स्थास्यामीत्याह—अतिशयेन हृदयदयितः कान्तश्च तत्किमत्र प्रस्तावे करोमीति । चिन्ता व्यभिचारिभावः ॥

तन्वङ्ग्या गुरुसंनिधौ नयनयोर्यद्वारि संस्तम्भितं
तेनान्तर्गलितेन मन्मथशिखी सिक्तो वियोगोद्भवः ।
मन्ये तस्य निरस्यमानकिरणस्यैषा मुखेनोद्गता
श्वासायाससमाकुलालिसरणिव्याजेन धूमावली ॥ ९६ ॥

इयं बाल्य एव प्रियं विना स्थातुं न शक्नोतीति गुरुजनेन ज्ञास्य इति लज्जया तत्संनीधौ नयनयोर्वारि स्तम्भितम् । तेनाभ्यन्तर एव व्यावृत्त्य गलितेन यो हृदये विरहोद्भवः कामानलः सिक्तस्तस्य संस्तभ्यमानज्वालस्य नूनमेषा वदनद्वारेण धूमवर्तिरुत्थिता । केन । सुगन्धिश्वासेन य उष्णताजनित आयासस्तेन समाकुलानामलीनां या पद्धतिस्तद्व्याजेन । जलाभिषेकेण मन्दितार्चिषि वैश्वानरे हि धूमोद्गमः समुल्लसति ॥

---

१. 'सास्रालापाः' इति शृङ्गारदीपिका. २. 'इति बहुफलो' इति शृङ्गारदीपिका. ३. 'च' इति शृङ्गारदीपिका.

Digitized by Microsoft ®

काचित्सखीभिर्मानं शिक्षितानध्यवसायगर्भं संदेहमाह—

भ्रूभेदो गुणितश्चिरं नयनयोरभ्यस्तमामीलनं
रोद्धुं शिक्षितमादरेण हसितं मौनेऽभियोगः कृतः ।
धैर्यं कर्तुमपि स्थिरीकृतमिदं चेतः कथंचिन्मया
बद्धो मानपरिग्रहे परिकरः सिद्धिस्तु दैवे स्थिता ॥ ९७ ॥

मानस्वीकारे मया सामग्री प्रगुणीकृता सिद्धिः पुनर्दैवाधीना । दैवयोगान्मानानिर्वाहो भवति न वेत्यर्थः । कथं परिकरो बद्ध इत्याह—भ्रूभेद इत्यापि । सूत्रपाठप्राथमकल्पिकन्यायेन भ्रूभङ्गश्चिरं गुणितः । लोचनयोः संकोचनमभ्यस्तम् । प्रयत्नेन स्मितं निवारयितुं शिक्षितम् । वाचंयमत्वेऽभियोगः कृतः । अकातरतां विधातुमपि कथंचिदेतच्चेतः स्थिरीकृतम् । एते प्रकारास्तस्मिन्दृष्टे निर्वाहं न गमिष्यन्तीत्यर्थः ॥

काचित्स्वैरिणी चिरमनोरथप्राप्तकामुकचौर्यरतं साधितसाध्यतया सख्याः कथयति—

अहं तेनाहूता किमपि कथयामीति विजने
समीपे चासीना सरसहृदयत्वादवहिता ।
ततः कर्णोपान्ते किमपि वदताघ्राय वदनं
गृहीता[1] धम्मिल्ले सखि स च मया गाढमधरे ॥ ९८ ॥

हे सखि, किमपि कथयामीति व्यपदेशेन विजने तेनाहमाहूता । अहं च सखि, साभिलाषहृदया तस्य प्रियतमस्य समीप आसीना । अथ च तेन श्रवणोपान्ते किंचिद्वदता पर्याकुलतया मन्मुखमाघ्रायापसरणशङ्कयाहं धम्मिल्ले गृहीता । न केवलमेवम्, स च मया गाढमधरे गृहीतः । किमपि कथयामीति विस्रम्भणम् । यदुक्तम्—'विविक्ते च किंचिदस्ति कथयितव्यमित्युक्त्वा निर्वचने भावं तत्रोपलक्षयेत्' ॥

देशैरन्तरिता शतैश्च सरितामुर्वीभृतां काननै-
र्यत्नेनापि न याति लोचनपथं कान्तेति जानन्नपि ।
उद्ग्रीवश्चरणार्धरुद्धवसुधः[2] प्रोन्मृज्य साश्रे दृशौ[3]
तामाशां पथिकस्तथापि[4] किमपि ध्यायन्पुनर्वीक्षते ॥ ९९ ॥

तथापि किमपि ध्यायन्पथिकस्तां दयितासंबद्धां दिशं वारंवारमवलोकयति । अथ वाशामिवाशाम् । किं कृत्वा । साश्रुणी नेत्रे पदार्थोपलम्भार्थं प्रकर्षात्प्रोञ्छ्य । किंविशिष्टः । दर्शनोत्कलिकयोत्कंधरः । पुनः कीदृशः । उन्नतो भवितुं परार्धेनावष्टब्धभूमिः ।

---

१. 'गृहीत्वा धम्मिल्ले मम सखि निपीतोऽधररसः' इति शृङ्गारदीपिका. २. 'चरणाग्र' इति शृङ्गारदीपिका. ३. 'तथैव' इति शृङ्गारदीपिका. ४. 'मुहुः' इति शृङ्गारदीपिका.

Digitized by Microsoft ®

तथापि कथमित्याह—इति जानन्नपि । इति किम् । यत्नेनापि कान्ता नयनयोर्गोचरं न गच्छति । किंविशिष्टा । यतोऽन्तरिता । कैः । देशैः । न परं तैः । नदीनां पर्वतानां च शतैः । न केवलमेभिः, विपिनैश्च ॥

[1]चक्षुःप्रीतिप्रसक्ते मनसि परिचये चिन्त्यमानाभ्युपाये
[2]रागे यातेऽतिभूमिं विकसति सुतरां गोचरे दूतिकायाः ।
आस्तां [3]दूरेण तावत्सरभसदयितालिङ्गनानन्दलाभ-
[4]स्तद्गेहोपान्तरथ्याश्रमणमपि परां निर्वृतिं संतनोति ॥ १०० ॥

साभिलाषप्रियाश्लेषसंगमप्राप्तिस्तावदूरत एवास्तु । कस्तादृशः सुकृतराशिर्यस्यैवं संपद्यते । तन्मन्दिरोपान्तरथ्यासंचरणमप्यनिर्वचनीयं (..... अस्मिन्नपि निस्तरणोपाये कश्चित्परेङ्गितज्ञः प्रतिबन्धीभवतीत्यभिप्रायः । केन । मनसा । संस्तवे चिन्त्यमानप्रातिवेश्मिकमैत्रीप्रभृत्युपाये । अनुरागे प्रकर्षं गते । दूतिकायाः सुतरां पुष्पवन्मनोज्ञे..... विकसति । अनुभवी वक्ता । 'यत्रासंभाव्यभावो वा' इति विषमभेदः ॥)

तव प्रियः कथं रमत इति सखीभिः पृष्टा काचिदाह—

कान्ते तल्पमुपागते विगलिता नीवी स्वयं बन्धना-
द्वासो विश्रथमेखलागुणधृतं किंचिन्नितम्बे स्थितम् ।
एतावत्सखि वेद्मि सांप्रतमहं तस्याङ्गसङ्गे पुनः
[5]कोऽयं [6]कासि रतं नु वा [7]कथमिति स्वल्पापि मे न स्मृतिः ॥ १०१ ॥

हे सखि, सांप्रतं तावदेतावदेवाहं जानामि । एतावत्किम् । कान्ते शय्यां प्राप्ते सति नितम्बसिचयबन्धनसंस्पर्शनिर्वृतिं सम्यग्विस्तारयति । स्पर्शमपि विनैव नीवीविस्रंसनं जातमिति सात्त्विकातिशयः । विश्रङ्खलमेखला तत्रावलम्बितमम्बरं नितम्बे मनाक्स्थितम् । तदङ्गस्पर्शे तु क एषः । का वाहम् । रतमाहोस्वित्केन प्रकारेण । कापि स्मृतिर्नास्तीत्यर्थः । अत एवोक्तम्—'धन्यासि या कथयसि प्रियसंगमेऽपि विश्रब्धचाटुकशतानि रतान्तरेषु । नीवीं प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किंचिदपि स्मरामि ॥' इति ॥

कश्चिद्वियोगी स्वगतं वितर्कयति—

प्रासादे सा दिशि दिशि च सा पृष्ठतः सा पुरः सा
पर्यङ्के सा पथि पथि च सा तद्वियोगातुरस्य ।

---

१. 'चक्षुःप्रीत्या निषण्णे मनसि परिचयाच्चिन्त्यमाने' इति शृङ्गारदीपिका. २. 'याते रागे विवृद्धिं प्रविसरति गिरां विस्तरे' इति शृङ्गारदीपिका. ३. 'दूरे स' इति शृङ्गारदीपिका. ४. 'तत्क्षणात्तद्वासः स्रथ–' इति शृङ्गारदीपिका. ५. 'केवलं' इति शृङ्गारदीपिका. ६. 'कोऽसौ' इति शृङ्गारदीपिका. ७. 'तु किं कथमपि' इति शृङ्गारदीपिका.

Digitized by Microsoft ®

हंहो चेतः प्रकृतिरपरा नास्ति मे कापि सा सा
सा सा सा सा जगति सकले कोऽयमद्वैतवादः ॥ १०२ ॥

तद्विरहातुरस्य ममान्या कापि प्रकृतिर्नास्ति । तर्हि किमस्तीत्याह—प्रासादादिषु सैव । तस्मादहो आश्चर्यम् । सा सेति सकले जगति कोऽयमद्वैतवादः । आत्मनोऽप्यलेखिततत्वेन तस्यां तादात्म्यम् । विशेषोऽलंकारः । यदुक्तम्—'यत्रैकमनेकस्मिन्नाधारे वस्तु विद्यमानतया । युगपदभिधीयतेऽसावत्रान्यः स्याद्विशेष इति ॥' यथा—'हृदये चक्षुषि वाचि च तव सैवाभिनवयौवना वसति । वयमत्र निरवकाशा विरमं कृतं पादपतनेन ॥' पूर्वार्धे यावन्त एव साशब्दाः प्रयुक्तास्तावन्त एवोत्तरार्धेऽनूदिताः ॥

समाप्तेयं रसिकसंजीविनी टीका ।

कृतिर्महाराजाधिराजवीरचूडामणिश्रीमदर्जुनवर्मदेवस्य ।

समाप्तमिदं रसिकसंजीविनीटीकासमेतममरुशतकम् ।

---

१ परिशिष्टम् ।

वेमभूपालविरचितशृङ्गारदीपिकाख्यटीकायां केचन श्लोका अधिकाः सन्ति, तेऽत्र सटीकास्तत एवोद्ध्रियन्ते । यथा—

नायकोक्तिः—

नभसि जलदलक्ष्मीं सास्रया वीक्ष्य दृष्ट्या
प्रवससि यदि कान्तेत्यर्धमुक्त्वा कथंचित् ।
मम पटमवलम्ब्य प्रोल्लिखन्ती धरित्रीं
यदनु कृतवती सा तत्र वाचो निवृत्ताः ॥ १०३ ॥

नभस्याकाशे जलदलक्ष्मीं मेघसामग्रीं सास्रया सबाष्पया दृष्ट्या दृशा वीक्ष्यावलोक्य 'हे कान्त हे प्रिय, प्रवससि यदि प्रवासं करोषि चेत्' इति कथंचित्कृच्छ्रेणार्धं सावशेषम् । वाक्यमिति शेषः । उक्त्वा मम पटमंशुकमवलम्ब्य गृहीत्वा धरित्रीं भुवं प्रोल्लिखन्ती कर्षन्ती अनु पश्चात्सा यत्कर्म कृतवती तत्र तस्मिन्कर्मणि वाच उक्त्यो निवृत्ता व्यावृत्ता इति संबन्धः । यत्कृतवतीत्यत्र यच्छब्दवाच्यैश्चिन्तानिःश्वासवैवर्ण्यबाष्पगद्गदादिकादिभिरनुभावैस्त्वां विना क्षणमपि जीवितुमहं न शक्नोमीत्ययमर्थः प्रवससि यदीत्यस्य वाक्यस्य शेषत्वेनावगन्तव्यः । तत्र वाचो निवृत्ता इत्यनेन नायिकायाश्चिन्तानिःश्वासादीनामनुभावानां दशाविशेषः पश्यतां मनोगोचर एव न वाग्गोचर इत्ययमर्थोऽवगम्यते । दैन्यं नाम संचारिभावः । अत्र नायिका स्वीया मुग्धा च । नायकोऽनुकूलः । भविष्यत्प्रवासविप्रलम्भशृङ्गारः । तत्र नर्मस्फोटः । जातिरलंकारः । मालिनी वृत्तम् ॥

Digitized by Microsoft ®

कवेर्वाक्यम्—

स्मररसनदीपूरेणोढाः पुनर्गुरुसेतुभि-
र्यदपि विधृतास्तिष्ठन्त्यारादपूर्णमनोरथाः।
तदपि लिखितप्रख्यैरङ्गैः परस्परमुन्मुखा
नयननलिनीनालानीतं पिबन्ति रसं प्रियाः॥ १०४॥

प्रियाः। 'पुमान्स्त्रिया' इत्येकशेषः। प्रियश्च प्रियाश्चेत्यर्थः। स्मररसनदीपूरेणोढाः स्मरेण कामेन कृतो रसो रागः स एव नदीपूरस्तेनोढा उद्धृताः। बलान्नीता इत्यर्थः। पुनर्भूयो गुरुसेतुभिर्गुरवो गुरुजनास्त एव सेतवः प्रवाहबन्धास्तैर्यद्यस्मात्कारणाद्विधृता अपि निवारिताश्च भवन्ति। तस्मादारात्समीपेऽपूर्णमनोरथा अपर्याप्तकामास्तिष्ठन्ति आसते। तदापि तथापि लिखितप्रख्यैश्चित्रसदृशैरङ्गैः शरीरैरुपलक्षिताः परस्परमन्योन्यमुन्मुखा अभिमुखाः सन्तो नयननलिनीनालानीतं नयनानि दर्शनान्येव नलिनीनालानि पद्मकाण्डानि तैरानीतमाहृतं रसं पिबन्ति आस्वादयन्तीति संबन्धः। अत्र स्मररसनदीपूरेणोढा इत्यनेनात्यन्ताभिलाषपरतन्त्रा इति गम्यते। लिखितप्रख्यैरङ्गैरित्यनेन स्तम्भं नाम सात्त्विकभावं गता इति गम्यते। अत्रौत्सुक्यं नाम संचारी भावः। संभोगश्शृङ्गारः। यथोक्तं दशरूपके—'अनुकूलौ निषेवेते यत्रान्योन्यं विलासिनौ। दर्शनस्पर्शनादीनि स संभोग उदाहृतः॥' इति। अत्र चेष्टाकृतं संभोगेच्छारूपं शृङ्गारिनर्म जातिलंकारः। हरिणीवृत्तम्॥

नायकमानेतुं गत्वा समागतां लक्ष्यमाणसंभोगचिह्नां दूतीं नायिका प्राह—

निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्॥ १०५॥

स्तनतटं कुचतटं निःशेषच्युतचन्दनं निःशेषं यथा भवति तथा च्युतं गलितं चन्दनं यस्मात्तथोक्तम्। अधरो दशनच्छदो निर्मृष्टरागोऽपगतालक्तकोऽपगतताम्बूलरागो वा। नेत्रे दूरमत्यर्थमनञ्जने कज्जलरहिते। तन्वी तवेयं तनुः पुलकिता सरोमाञ्चा मिथ्यावादिन्यसत्यप्रलापिनि बान्धवजनस्य सुहृज्जनस्याज्ञातपीडागमे। अज्ञातोऽनवगतः पीडागमो दुःखप्राप्तिर्यया सा तथोक्ता तस्याः संबुद्धिः। अज्ञातबान्धवजनपीडागमे इत्यर्थः। हे दूति संदेशहरे, अतोऽस्मात्प्रदेशाद्वापीं दीर्घिकां स्नातुं जलावगाहनं कर्तुं गतासि यातासि तस्याधमस्य निकृष्टस्य नायकस्यान्तिकं पुनः समीपं तु न गतासीति संबन्धः। अत्र वापीस्नानचिह्नकथनव्याजेन संभोगचिह्नकथनान्नायकस्याधमत्वकथनाच्च तदन्तिकमेव रन्तुं गतासीत्ययमर्थो व्यज्यते। अत्र नायिका स्वीया प्रगल्भा च। नायकः शठः।

Digitized by Microsoft®

ईर्ष्याक्रोधप्रायं नर्म । समाधिरलंकारः । यथोक्तं काव्यादर्शे—'युगपन्नैकधर्माणामभ्यासश्च मतो यथा' इति । शार्दूलविक्रीडितं वृत्तम् ॥

नायकोक्तिः—

आयस्ता कलहं पुरेव कुरुते न स्रंसने वाससो
भुग्नभ्रूरतिखण्ड्यमानमधरं धत्ते न केशग्रहे ।
अङ्गान्यर्पयति स्वयं भवति नो वामा हठालिङ्गने
तन्व्या शिक्षित एष संप्रति पुनः कोपप्रकारोऽपरः ॥ १०६ ॥

आयस्ता आयासं प्राप्ता । ईर्ष्याकोपेनेति शेषः । पुरेव पूर्वमिव वाससो वस्त्रस्य स्रंसने कलहं विवादं न कुरुते न विधत्ते । किं च केशग्रहे कचाकर्षणे पुरेव भुग्नभ्रूर्भूभङ्गवती सती अतिखण्ड्यमानमत्यन्तं दश्यमानमधरं दन्तच्छदं न धत्ते न वहति । किं च हठालिङ्गने प्रसभाश्लेषे पुरेव वामा वक्रा न भवति । किं त्वङ्गानि गात्राणि स्वयमात्मनार्पयति प्रयच्छति । संप्रति पुनरिदानीं तु तन्व्या कान्तया एषोऽयमपरोऽन्यः कोपप्रकारो रोषभङ्गिः शिक्षितोऽभ्यस्त इति संबन्धः । अत्रावहित्थं नाम संचारी भावः । नायिका स्वीया धीरा प्रगल्भा च । नायकः शठः । ईर्ष्यामानकृतो विप्रलम्भशृङ्गारः । अत्र नर्मगर्भः । युक्तिरलंकारः । शार्दूलविक्रीडितम् ॥

कवेर्वाक्यम्—

क्वचित्ताम्बूलाक्तः क्वचिदगुरुपङ्काङ्कमलिनः
क्वचिच्चूर्णोद्गारी क्वचिदपि च सालक्तकपदः ।
वलीभङ्गाभोगैरलकपतितैः शीर्णकुसुमैः
स्त्रिया नानावस्थं प्रथयति रतं प्रच्छदपटः ॥ १०७ ॥

क्वचिदेकत्र ताम्बूलाक्तस्ताम्बूलरसेन रञ्जितः । क्वचिदेकत्रागुरुपङ्काङ्कमलिनोऽगुरोः पङ्कस्तस्याङ्को लक्ष्म तेन मलिनो मलीमसः । क्वचिदेकत्र चूर्णोद्गारी चूर्णस्य कर्पूरादिक्षोदस्योद्गारो गलनं सोऽस्मिन्नस्तीति चूर्णोद्गारी । 'अत इनिठनौ' इति मत्वर्थ इनिप्रत्ययः । क्वचिदपि च कुत्रापि सालक्तकपदोऽलक्तकेन लाक्षया सहितं सालक्तकं पदं पादमुद्रा यस्मिन्स तथोक्तः । वलीभङ्गाभोगैर्वल्य एव भङ्गास्तरङ्गास्तेषामाभोगो विस्तारस्तैश्च । अलकपतितैरलकेभ्यः पतितान्यलकपतितानि तैः शीर्णकुसुमैः शीर्णानि विकीर्णानि च तानि कुसुमानि च शीर्णकुसुमानि तैश्चोपलक्षितः प्रच्छदपट आस्तरणवस्त्रं स्त्रियाः कान्ताया नानावस्थं बहुप्रकारावस्थानं रतं रमणं प्रथयति ख्यापयतीति संबन्धः । अत्र क्वचित्ताम्बूलाक्त इत्यनेन मार्जारकरणं सूचितम् । यथोक्तं रतिरहस्ये—'प्रसारिते पाणिपादे शय्यास्पृशि मुखोरसि । उन्नतायां स्त्रियः कव्यां मार्जारकरणं मतम् ॥' इति । क्वचिदगुरुपङ्काङ्कमलिन इत्यनेन करिपदं नाम बन्धविशेषः सूच्यते ।

Digitized by Microsoft®

यथोक्तम्—'भूगतस्तनभुजास्यमस्तकामुन्नतस्फिजमधोमुखीं स्त्रियम् । कामति स्वकरकृष्टमेहने वल्लभे करिपदं तदुच्यते ॥' इति । क्वचिच्चूर्णोद्वारीत्यनेन धेनुकं नाम करणं सूच्यते । यथोक्तम्—'न्यस्तहस्तयुगला भुवस्तले योषिदेति कटिरूढवल्लभा । अग्रतो यदि शनैरधोमुखी धेनुकं वृषवदुन्नते प्रिये ॥' इति । क्वचिदपि च सालक्तकपद इत्यनेन पुरुषायितं सूच्यते । तत्स्पष्टमेव । वलीभङ्गाभोगैरित्यनेनालकैपतितैः शीर्णकुसुमैरित्यनेन च रत्युपमर्दातिशयः सूच्यते । जातिरलंकारः । शिखरिणीवृत्तम् ॥

कवेर्वाक्यम्—

पुष्पोद्भेदमवाप्य केलिशयनाद्दूरस्थया चुम्बने
कान्तेन स्फुरिताधरेण निभृतं भ्रूसंज्ञया याचिते ।
आच्छाद्य स्मितपूर्णगण्डफलकं चेलाञ्चलेनाननं
मन्दान्दोलितकुण्डलस्तवकया तन्व्यावधूतं शिरः ॥ १०८ ॥

पुष्पोद्भेदं रजःप्रादुर्भावमवाप्य प्राप्य केलिशयनाद्दूरस्थया क्रीडातल्पं विहाय विप्रकृष्टया । ल्यब्लोपे पञ्चमी । स्फुरिताधरेण स्पन्दिताधरेण कान्तेन प्रियेण भ्रूसंज्ञया साधनेन निभृतं निगूढं चुम्बने याचिते प्रार्थिते सति स्मितपूर्णगण्डफलकं मन्दहासभरितकपोलतलमाननं चेलाञ्चलेनांशुकपल्लवेनाच्छाद्य पिधाय मन्दान्दोलितकुण्डलस्तवकया मन्दं शनैरान्दोलिते आलोलिते कुण्डले कर्णवेष्टने एव स्तबकौ गुच्छौ यस्याः सा तथोक्ता तया तन्व्या कान्तया शिरोऽवधूतं तिर्यग्वक्रितमिति संबन्धः । शिरोऽवधूतमित्यनेन प्रतिषेधः सूचितः । औत्सुक्यं नाम संचारी भावः । नायिका स्वीया मध्याप्रगल्भयोरन्यतरा स्वाधीनपतिका च । नायकोऽनुकूलः । संभोगशृङ्गारः । अत्र चेष्टाकृतं संभोगेच्छारूपं शृङ्गारिनर्म । सूक्ष्मोऽलंकारः । यथोक्तं काव्यादर्शे—'इङ्गिताकारलक्ष्यार्थसौक्ष्म्यात्सूक्ष्म इति स्मृतः' इति । शार्दूलविक्रीडितम् ॥

नायिका नायकमुपालभते—

शठान्यस्याः काञ्चीमणिरणितमाकर्ण्य सहसा
यदाश्लिष्यन्नेव प्रशिथिलभुजग्रन्थिरभवः ।
तदेतत्काचक्षे घृतमधुमयत्वद्बहुवचो-
विषेणाघूर्णन्ती किमपि न सखी मे गणयति ॥ १०९ ॥

हे शठ धूर्त, अन्यस्या इतरनायिकायाः काञ्चीमणिरणितं मेखलारत्नशिञ्जितमाकर्ण्याश्लिष्यन्नेवालिङ्गन्नेव सहसा शीघ्रं प्रशिथिलभुजग्रन्थिर्विश्लथबाहुबन्धनोऽभव आसीरिति यत्तदेतच्छाढ्यं काचक्षे कुत्र ब्रवीमि । यतो घृतमधुमयत्वद्बहुवचोविषेण घृतमधुमयं सर्पिःक्षौद्ररूपं त्वद्बहुवचस्त्व भूरिवचनं घृतमधुमयं च तत्त्वद्बहुवचश्च तदेव विषं तेनाघूर्णन्ती भ्राम्यन्ती मे सखी किमपि न गणयति न विचारयति । न विश्वसितीत्यर्थः ।

Digitized by Microsoft ®

वचनमिति शेषः । इति संबन्धः । अत्र नायकवचसां घृतमधुमयत्वकथनेन तदानीं हितत्वं पश्चादहितत्वं च गम्यते । यतो घृतं मधुमिश्रितं विषाके विषत्वमापद्यते । यथोक्तं वाग्भटे—'मधुसर्पिर्वसातैलपानीयानि द्विशश्त्रिशः । एकत्र वा समांशानि विरुध्यन्ते परस्परम् ॥' इति । तदेतत्काचक्षे इत्यनेन सखी त्वया वञ्चिता कस्याग्रतो मम दुःखं कथयामीति स्वनिर्वेदः सूचितः । अत्र नायिका स्वीया प्रगल्भा च । नायकः शठः । विप्रलम्भशृङ्गारः । अत्र सोपालम्भवचनं नर्म । आक्षेपालंकारः । शिखरिणीवृत्तम् ॥

दूती नायकमुपालभते—

अच्छिन्नं नयनाम्बु बन्धुषु कृतं चिन्ता गुरुष्वर्पिता
दत्तं दैन्यमशेषतः परिजने तापः सखीष्वाहितः ।
अद्य श्वः परनिर्वृतिं भजति सा श्वासैः परं खिद्यते
विस्रब्धो भव विप्रयोगजनितं दुःखं विभक्तं तया ॥ ११० ॥

अच्छिन्नं संततं नयनाम्बु अश्रु बन्धुषु कृतमर्पितम् । चिन्ता विचारो गुरुषु जनन्यादिष्वर्पिता न्यस्ता । दैन्यं दीनत्वं परिजनेऽशेषतः सर्वस्मिन्परिचारकवर्गे । सप्तम्यर्थे तसिल् । दत्तं निहितम् । तापः संज्वरः सखीषु वयस्यास्वाहितो निक्षिप्तः । एवमनेन प्रकारेण तया विप्रयोगजनितं विरहोत्पादितं दुःखं विभक्तं विभागं प्रापितम् । सा यतः श्वासैः श्वसितैः परमत्यर्थं खिद्यते खिन्ना भवति । तस्मादद्यास्मिन्दिवसे श्वः परस्मिन्दिवसे वा परनिर्वृतिमत्यन्तसौख्यं भजति प्राप्नोति । अतो विस्रब्धो निश्चिन्तो भवेति संबन्धः । परनिर्वृतिं भजतीत्यनेन मरणं सूच्यते । विस्रब्धो भवेत्यनेनोपालम्भो गम्यते । अत्र मूर्च्छा नाम दशाविशेषः । नायिका परकीया कन्या च । अयोगविप्रलम्भशृङ्गारः । अत्र सोपालम्भवचनं नर्म । आक्षेपालंकारः । शार्दूलविक्रीडितं वृत्तम् ॥

पूर्वं कृतपरिचयेन नायकेन पश्चात्परित्यक्ता नायिका स्ववाटिकायां यदृच्छागतं प्रियं दृष्ट्वा तमुपालभते—

रोहन्तौ प्रथमं ममोरसि तव प्राप्तौ विवृद्धिं स्तनौ
संलापास्तव वाक्यभङ्गिमिलनान्मौग्ध्यं परं त्याजिताः ।
धात्रीकण्ठमपास्य बाहुलतिके कण्ठे तवासञ्जिते
निर्दाक्षिण्य करोमि किं नु विशिखाप्येषा न पन्थास्तव ॥ १११ ॥

प्रथमं ममोरसि रोहन्तावुद्भवन्तौ स्तनौ तवोरसि विवृद्धिं प्राप्तौ गतौ । मम संलापाः संभाषणानि तव वाक्यभङ्गिमिलनाद्वचनरीतिमिश्रणात्परमत्यर्थं मौग्ध्यं मूढतां त्याजिताः । मम बाहुलतिके धात्रीकण्ठमुपमातृकण्ठमपास्य विहाय तव कण्ठे आसञ्जिते आसङ्गं प्रापिते । हे निर्दाक्षिण्य अज्ञातपरचेतोनुवर्तन, एषा विशिखापि इयं रथ्यापि तव पन्था मार्गो न भवति । एवं सति किं नु करोमि किं कर्तव्यम् । नु पृच्छायाम् । भवन्तं

Digitized by Microsoft®

किमुपालभे इत्यर्थः । इति संबन्धः । अत्र नायिका साधारणा । सोपालम्भवचनं नर्म । आक्षेपालंकारः । शार्दूलविक्रीडितं वृत्तम् ॥

कवेर्वाक्यम्—

पराची कोपेन स्फुटकपटमुद्रामुकुलिता
प्रविश्याङ्गेनाङ्गं प्रणयिनि परीरम्भचतुरे ।
शनैर्नीवीबन्धं स्पृशति सभयव्याकुलकरं
विधत्ते संकोचग्लपितमवलग्नं वरतनुः ॥ ११२ ॥

कोपेन प्रणयकोपेन पराची पराङ्मुखी । स्फुटकपटनिद्रामुकुलिता । स्फुटं प्रव्यक्ता । तथैव भासमानेत्यर्थः । कपटेन कृता निद्रा तया मुकुलिता निमीलिताक्षी सती वरतनुस्तन्वी अङ्गेन गात्रेणाङ्गं स्वस्य गात्रं प्रविश्यासाद्य परीरम्भचतुरे आलिङ्गनदक्षे प्रणयिनि प्रिये नीवीबन्धं वस्त्रग्रन्थिं सभयव्याकुलकरं सभयो भयसहितो व्याकुलस्तरलः करो यस्मिन्कर्मणि तत्तथोक्तं शनैर्मन्दं स्पृशति सत्यवलग्नं मध्यं संकोचग्लपितमम्बराकर्षणकर्शितं विधत्ते करोतीति संबन्धः । अत्र कपटनिद्रयावलग्नसंकोचेन च नायिकाया विरहासहिष्णुत्वं व्यज्यते । औत्सुक्यं नाम संचारी भावः । नायिका स्वीया मध्या स्वाधीनपतिका च । नायकोऽनुकूलः संभोगश्चृङ्गारः । कैशिकीवृत्तेरङ्गं नर्म । युक्तिरलंकारः । शिखरिणी वृत्तम् ॥

नायकमानेतुं प्रेषिताया लक्ष्यमाणसंभोगचिह्नाया दूत्या नायिकायाश्च प्रश्नोत्तररूपा वाक्यमाला—

खिन्नं केन मुखं दिवाकरकरैस्ते रागिणी लोचने
रोषात्तद्वचनोदिताद्विलुलिता नीलालका वायुना ।
भ्रष्टं कुङ्कुममुत्तरीयकषणात्क्लान्तासि गत्यागतै-
रुक्तं तत्सकलं किमत्र वद हे दूति क्षतस्याधरे ॥ ११३ ॥

हे दूति, तव मुखं केन कारणेन खिन्नं सस्वेदं जातम् । अयं नायिकायाः प्रश्नः । दिवाकरकरैः खिन्नमिति दूत्या उत्तरमुक्तम् । ते तव लोचने दृशौ केन कारणेन रागिणी रक्ते । अयं नायिकायाः प्रश्नः । तद्वचनोदितात्तस्य धूर्तस्य वचनं वाक्यं तस्मादुदितादुद्गताद्रोषाद्रक्ते इत्युत्तरम् । नीलालकाः कृष्णकुन्तलाः केन विलुलिता व्याकुलिताः । अयं प्रश्नः । वायुना विलुलिता इत्युत्तरम् । कुङ्कुमं काश्मीरं केन भ्रष्टं विगलितम् । अयं प्रश्नः । उत्तरीयकषणात्संव्यानघर्षणाद्भ्रष्टम् । इत्युत्तरम् । केन क्लान्तासि क्लान्ता भवसि । अयं प्रश्नः । गत्यागतैर्गमनागमनैः क्लान्तास्मि । इत्युत्तरम् । हे दूति, सकलं त्वया यदुक्तं तत्सर्वं युक्तमुपपन्नम् । अधरे क्षतस्य व्रणस्य किं कारणमत्रास्मिन्प्रश्ने वद ब्रूहि । उत्तरमिति शेषः । इति संबन्धः । अत्र वदेत्यनेन त्वया वैदग्ध्यात्त-

Digitized by Microsoft®

त्सर्वं संभोगचिह्नमपह्नुतमधरक्षतं कथमपह्नूयेतेत्ययमर्थो गम्यते । नायिका स्वीया प्रगल्भा च । नायकः शठः । विप्रलम्भश्रृङ्गारः । वाक्योत्तरमलंकारः । शार्दूलविक्रीडितं वृत्तम् ॥

अत्यन्तापराधिनि प्रिये समागते सति कुपिताया नायिकाया आकारगोपनप्रकारं कविराह—

नान्तः प्रवेशमरुणद्विमुखी न चासी-
दाचष्ट रोषपरुषाणि न चाक्षराणि ।
सा केवलं सरलपक्ष्मभिरक्षिपातैः
कान्तं विलोकितवती जननिर्विशेषम् ॥ ११४ ॥

सा नायिका नायकस्यान्तः प्रवेशं स्वगृहान्तः प्रवेशं नारुणन्न निवारयति स्म । किं च विमुखी पराङ्मुखी नासीत् । किं च रोषपरुषाणि कोपकर्कशान्यक्षराणि वचनानि नाचष्ट नाभाषत । किं तु सरलपक्ष्मभिः सरलानि ऋजूनि पक्ष्माण्यक्षिरोमाणि येषु ते तथोक्तास्तैरक्षिपातैः संदर्शनैः कान्तं प्रियं जननिर्विशेषं सर्वजनसामान्यं यथा भवति तथा केवलं विलोकितवती दृष्टवती । एवेति शेषः । इति संबन्धः । जननिर्विशेषं विलोकितवतीत्यनेनापराधिनः प्रियस्यासाधारणं दण्डनं कृतमित्यवगम्यते । अवहित्थं नाम संचारी भावः । अत्र नायिका स्वीया धीरा प्रगल्भा च । नायकः शठः । ईर्ष्यामानकृतो विप्रलम्भश्रृङ्गारः । ईर्ष्याक्रोधप्रायं नर्म । आक्षेपालंकारः । वसन्ततिलकावृत्तम् ॥

कवेर्वाक्यम्—

प्रियकृतपटस्तेयक्रीडाविडम्बनविह्वलां
किमपि करुणालापां तन्वीमुदीक्ष्य ससंभ्रमम् ।
अपि विगलिते स्कन्धावारे गते सुरताहवे
त्रिभुवनमहाधन्वी स्थाने न्यवर्तत मन्मथः ॥ ११५ ॥

प्रियकृतपटस्तेयक्रीडाविलम्बनविह्वलां प्रियेण कृता प्रियकृता पटस्तेयक्रीडा पटस्य वस्त्रस्य स्तेयं चौर्यं तदेव क्रीडा विनोदस्तया विलम्बनं कालक्षेपस्तेन विह्वला व्याकुलाम् । किमपि करुणालापामनिर्वाच्यादीनभाषितां तन्वीं कान्तामुदीक्ष्यावलोक्य त्रिभुवनमहाधन्वी त्रैलोक्यैकवीरो मन्मथः कामः सुरताहवे संभोगसंगरे गते निवृत्ते सति स्कन्धावारे शिविरे विगलिते च्युते सत्यपि ससंभ्रमं सत्वरं यथा भवति तथा न्यवर्तत निवृत्तोऽभूत्स्थाने युक्तमिति संबन्धः । अत्र पटस्तेयक्रीडा संभोगावसाने कृतेति वेदितव्यम् । गते सुरताहवे इत्युक्तत्वात् । सुरतस्याहवत्वरूपणं परस्परोपमर्दस्य विद्यमानत्वात् । अत्र स्कन्धावारशब्देन स्रक्चन्दनादिप्रसाधनहारमेखलाद्याभरणलीलाविलासविभ्रमादिचेष्टास्वरूपोद्दीपनसामग्री कथ्यते । विगलिते इत्यनेन सुरतान्ते लक्ष्यमाणं सामग्रीशैथिल्यं क-

Digitized by Microsoft ®

ध्यते । न्यवर्तत मन्मथ इत्यनेन पुनः सुरतारम्भो गम्यते । यथा लोके शूरः पुरुषः परान्निर्जित्य गलितसंनाहः प्रयातः सन्पश्चात्परैरभिभूतानां स्वकीयानामार्तनादं श्रुत्वा तत्प्रशमनाय पुनर्निवर्तते तद्वदयमपीत्यभिप्रायः । अत्र व्रीडा नाम संचारी भावः । नायिका स्वीया मध्या स्वाधीनपतिका च । नायकोऽनुकूलः । संभोगशृङ्गारः । चेष्टाकृतं सहासं शृङ्गारिनर्म । हेतुरलंकारः । हरिणी वृत्तम् ॥

कवेर्वाक्यम्—

सालक्तकेन नवपल्लवकोमलेन
पादेन नूपुरवता मदनालसेन ।
यस्ताड्यते दयितया प्रणयापराधा-
त्सोऽङ्गीकृतो भगवता मकरध्वजेन ॥ ११६ ॥

स्पष्टोऽर्थः । अत्र दयितया पादेन ताडितोऽपि भगवता मकरध्वजेन सोऽङ्गीकृत इत्यनेन नानाविधैरुपचारैरुपलालितः किमुतेत्ययमर्थः सूचितः । एतावता कामपुरुषार्थस्योपादेयत्वमुक्तं भवति ॥

२ परिशिष्टम् ।

रुद्रमदेवकुमारप्रणीतटीकायां केचनाधिकाः श्लोकाः । यथा—

प्रयच्छाहारं मे यदि तव रहोवृत्तमखिलं
मया वाच्यं वोच्चैरिति गृहशुके जल्पति शनैः ।
वधूर्वक्त्रं व्रीडाभरनमितमन्तर्विहसितं
हरत्यर्धोन्मीलन्नलिनमनिलावर्जितमिव ॥ ११७ ॥

कांचन नायिका गृहशुके शनैर्मन्दमिति वदति सति मुखं वक्त्रं करोति । कथं जल्पति । हे नायिके, मह्यमाहारं देहि यदि न दास्यसि तदा तवैकान्तवृत्तान्तं समस्तं मयोच्चैः कथनीयम् । कीदृशं मुखम् । लज्जातिशयनम्रम् । गुप्तहसितम् । इदानीमुत्प्रेक्षते—अर्धविकसत्पद्मं वायुवक्रीकृतमिव ॥

किंचिन्मुद्रितपांसवः शिखिगणैरुत्पक्ष(रूर्ध्वाक्ष)मालोकिता
जीर्णावासरुदद्दरिद्रगृहिणीश्वासानिलैर्जर्जराः ।
एते ते निपतन्ति नूतनघनात्प्रावृड्भरानन्दिनो
विच्छायीकृतविप्रयुक्तवनिता वक्त्रेन्दवो बिन्दवः ॥ ११८ ॥

त एते नूतनघनाज्जलबिन्दवः पतन्ति । कथंभूताः । किंचिन्निषिद्धरेणवः । मयूरवृन्दैरूर्ध्वनयनं यथा स्यादेवं दृष्टाः । पुराणभवनदरिद्रकान्तानिःश्वासमारुतैरनेकधा कृताः । वर्षागमहर्षिणः । मलिनीकृतवियोगिवनिता वक्त्रचन्द्राः ॥

Digitized by Microsoft®

[1]नीत्वोच्चैर्विक्षिपन्तः कृततुहिनकणासारसङ्गान्परागा-
[2]नामोदानन्दितालीनतितरसुरभीन्भूरिशो दिङ्मुखेषु ।
एते ते कुङ्कुमाङ्कस्तनकलशभरास्फालनादुच्छलन्तः
पीत्वा सीत्कारिवक्त्रं हरिणशिशुदृशां हैमना वान्ति वाताः ॥ ११९ ॥

एते ते प्रसिद्धा हेमन्तसंबन्धिनो वाता वहन्ति । मृगाक्षीणां सीत्कारयुक्तं मुखं स्पृष्ट्वा । किं कुर्वन्तः । कुङ्कुमलेपयुक्तस्तनकलशताडनादूर्ध्वं गच्छन्तः । पुनः किं कुर्वन्तः । अनेकान्परागानुच्चैर्नीत्वा दिशामुखेषु निक्षिपन्तः । जनिततुषारकणवृष्टिभ्रमान् । पुनः कथंभूतान् । परिमलतोषितभ्रमरान् अतिशयसुगन्धान् ॥

पीतस्तुषारकिरणो मधुनैव सार्ध-
मन्तः प्रविश्य चषकप्रतिबिम्बवर्ती ।
[3]नानाकरं मनसि मानवतीजनस्य
नूनं विभेद यदसौ प्रससाद सद्यः ॥ १२० ॥

कविरुत्प्रेक्षते—निश्चयेनायं चन्द्रो मधुपात्रे प्रतिबिम्बितः सन्मद्येनैव सह पीतः सन्मानिनीसमूहस्य चित्तेऽन्तः प्रविश्य मानोत्पत्तिस्थानं चूर्णयामास । कथमेतज्ज्ञायते—यदसौ मानिनीलोकस्तत्क्षणान्मानरहितो बभूव ॥

ललनालोलधम्मिल्लमल्लिकामोदवासिताः ।
वान्ति रात्रौ रतक्लान्तकामिनीसुहृदोऽनिलाः ॥ १२१ ॥

एवंविधा वायवो रात्रौ ग्रीष्मे वहन्ति । कथंभूताः । अङ्गनाचपलकेशपाशमल्लिकापरिमलसुगन्धयः संभोगखिन्नकामिनीप्रियाः ॥

वान्ति कह्लारसुभगाः सप्तच्छदसुगन्धयः ।
वाता नवर[4]तिम्लानवधूसंगममन्थराः ॥ १२२ ॥

शरत्काले एवंविधा वाता वहन्ति । कीदृशः । सौगन्धिकमनोज्ञाः विषमच्छदसुरभयः । नवसंभोगखिन्नकामिनीसुखोत्पादनमन्मदाः ॥

रामाणां रमणीयवक्त्रशशिनः स्वेदोदबिन्दुप्लुतो
व्यालोलामलकावलीं प्रचलयंश्चुम्बन्नितम्बांशुकम् ।

---

१. 'क्षिप्त्वोच्चैः' इति पाठः. २. 'कौन्दानानन्दितालीनतिशय' इति पाठः. ३. 'मानान्धकारमपि' इति पाठः. ४. 'रतग्लानवधूगमन' इति पाठः. ५. 'नितम्बाम्बरम्' इति पाठः.

Digitized by Microsoft®

प्रातर्वाति मधौ विकृष्टविकसद्राजीवराजीरजो-
जालामोदमनोहरो रतिरसग्लानिं हरन्मारुतः ॥ १२३ ॥

मधौ वसन्ते प्रभात एवंविधो वातो वहति । कीदृशः । रमणीनां मनोहरमुखचन्द्रस्य स्वेदजलबिन्दुयुक्तः । तथा तासां चञ्चलां कुटिलकेशपङ्क्तिं कम्पयन् । तथा तासां कटीवस्त्रं स्पृशन् । तथा तासां संभोगसक्तिश्रमं स्फेटयन् । कीदृशः । अपहृतकमलपङ्क्तिपरागसमूहसौगन्ध्यहृद्यः ॥

अङ्गं चन्दनपाण्डु पल्लवमृदुस्ताम्बूलताम्रोऽधरो
धारायन्त्रजलाभिषेककलुषे धौताञ्जने लोचने ।
अन्तःपुष्पसुगन्धिराजिकबरी सर्वाङ्गलग्नाम्बरं
कान्तानां कमनीयतां विदधते ग्रीष्मेऽपराह्णागमे ॥ १२४ ॥

ग्रीष्मस्य संध्यासमये नारीणामेतानि वस्तूनि रमणीयतां कुर्वन्ति । एतानि कानि । चन्दनशुभ्रमङ्गम् । न केवलमङ्गम् । किसलयकोमलस्ताम्बूलरक्तोऽधरश्च । तथा प्रक्षालितकज्जले नयने च । कथंभूते । धारागृहजलस्नानारुणिते । तथा अशुष्कः केशपाशश्च । कीदृशः । मध्यस्थितकुसुमसुरभिः । तथा निर्मलसूक्ष्मवस्त्रं च ॥

वरमसौ दिवसो न पुनर्निशा ननु निशैव वरं न पुनर्दिनम् ।
उभयमेतदपि व्रजतु क्षयं प्रियतमेन न यत्र समागमः ॥ १२५ ॥

एका सखी एवं ब्रूते—हे सखि, असौ दिवसो वरं न पुना रात्रिः । ततो द्वितीया ब्रवीति—हे सखि, रात्रिरेव श्रेष्ठा न पुनर्दिनं वरम् । ततस्तृतीया वदति—यत्र दिने यस्यां रात्रौ च प्रियतमेन सह मेलापको नास्ति तद्द्वितयमपि नाशं यातु ॥

मन्दं मुद्रितपांसवः परिपतञ्ज्ञांतान्धकारा मरु-
द्वेगध्वस्तकुटीरकाग्रनिपतच्छिद्रेषु लब्धान्तराः ।
कर्मव्यग्रकुटुम्बिनीकुचभरस्वेदच्छिदः प्रावृषः
प्रारम्भे मेदयन्ति कन्दलदलोल्लासाः पयोबिन्दवः ॥ १२६ ॥

वर्षायाः प्रारम्भे एवंविधा जलबिन्दवो हर्षयन्ति । कथंभूताः । मन्दं यथा स्यादेवं निवारितधूलयः । सर्वदागच्छज्ज्ञाततमसः । वायुवेगापसारिततृणकुटीरकजातच्छिद्रेषु प्राप्तप्रवेशाः । तथा गृहकर्माकुलगृहस्थकामिनीकुचयुगस्वेदापहारिणः कन्दलपत्रोल्लासिनः ॥

---

१. 'प्रकाम' इति पाठः. २. 'प्रकुरुते ग्रीष्मापराह्णागमः' इति पाठः. ३. इतः प्रभृतिश्लोकपञ्चकमर्जुनवर्मदेवेन प्रक्षिप्तमित्युक्त्वा षट्पञ्चाशश्लोकानन्तरमुद्धृत(४६ पृष्ठे)मस्ति. ४. 'झांकारिझञ्झामरुत्' इति पाठः. ५. 'निपतन्ति' इति पाठः.

Digitized by Microsoft®

कोऽपि नायकः कामपि नायिकां दृष्ट्वानुरागातिशयात्पुनरुक्तं दोषमगणयित्वा इदमाह—

इयमसौ तरलायतलोचना गुरुसमुन्नतपीनपयोधरा ।
पृथुनितम्बभरालसगामिनी प्रियतमा मम जीवितहारिणी ॥ १२७ ॥

इयमसौ प्रियतमा मम जीवितमानन्दयति । चञ्चलदीर्घनयना । पृथुलोन्नतमांसलस्तनी । विस्तीर्णकटिप्रदेशभारमन्थरगामिनी ॥

सालक्तकं शतदलाधिककान्तिरम्यं
रात्रौ स्वधामनिकरारुणनूपुराङ्कम् ।
क्षिप्तं भृशं कुपितया तरलायताक्ष्या
सौभाग्यचिह्नमिव मूर्ध्नि पदं विरेजे ॥ १२८ ॥

कस्यचिन्नायकस्य मस्तके चञ्चलदीर्घलोचनया प्रियया कुपितया रात्रौ पदं दत्तं विरेजे शुशुभे । किमिव । सौभाग्यचिह्नमिव । कीदृशम् । सयावकम् । कमलाधिकदीप्तिमनोज्ञम् । निजायतनसमूहरक्तीकृतपादकटकचिह्नम् ॥

श्रुत्वाकस्मान्निशीथे नवघनरसितं विस्रथाङ्गं पतन्त्या
शय्याया भूमिपृष्ठे करतलधृतया दुःखितालीजनेन ।
सोत्कण्ठं मुक्तकण्ठं कठिनकुचतटोपान्तदीर्णाश्रुबिन्दु
स्मृत्वा स्मृत्वा प्रियस्य स्खलितमृदुवचो रुद्यते पान्थवध्वा ॥१२९॥

कयाचन पथिकस्त्रियार्धरात्रे नवमेघगर्जितमचिन्तितमेव श्रुत्वा रुद्यते । शयनान्मदशरीरं यथाभवत्येवं भूमौ पतन्त्या । दुःखितसखीजनेन प्रसारितहस्तं धृतया । कथं रुद्यते । उत्कण्ठायुक्तम् । तथा मुक्तकण्ठम् । किं कृत्वा । वल्लभं स्मृत्वा स्मृत्वा । कठिनस्तनोपरिपतितविदीर्णाश्रुबिन्दु अव्यक्तमृदुवचनं च यथा भवत्येवमनुरुद्यते ॥

कोऽपि नायको दूतीं प्रति ब्रूते—

पीतो यतः प्रभृति कामपिपासितेन
तस्या मयाधररसः प्रचुरः प्रियायाः ।
तृष्णा ततः प्रभृति मे द्विगुणत्वमेति
लावण्यमस्ति बहु तत्र किमत्र चित्रम् ॥ १३० ॥

यतः प्रभृति कंदर्पव्यथितेन मया तस्या अधररसः प्रचुरः पीतस्तदादि मम तृष्णाभिलाषो द्विगुणतामेति । अत्र किमाश्चर्यम् । यतस्तत्र लावण्यं सौन्दर्यमस्ति ॥

---

१. 'श्रीर्णाश्रु' इति पाठः.

Digitized by Microsoft ®

३ परिशिष्टम्।

मूलपुस्तकेष्वधिकाः श्लोकाः—

ग्रामेऽस्मिन्पथिकाय पान्थ वसतिर्नैवाधुना दीयते
रात्रावत्र विवाहमण्डपतले पान्थः प्रसुप्तो युवा।
तेनोत्थाय खलेन गर्जति घने स्मृत्वा प्रियां तत्कृतं
येनाद्यापि करङ्कदण्डपतनाशङ्की जनस्तिष्ठति ॥ १३१ ॥

कान्ते कत्यपि वासराणि गमय त्वं मीलयित्वा दृशौ
स्वस्ति स्वस्ति निमीलयामि नयने यावन्न शून्या दिशः।
आयाता वयमागमिष्यसि सुहृद्वर्गस्य भाग्योदयैः
संदेशो वद कस्तवाभिलषितस्तीर्थेषु तोयाञ्जलिः ॥ १३२ ॥

कोपस्तया हृदि कृतो यदि पङ्कजाक्षि
सोऽस्तु प्रियस्तव किमत्र विधेयमन्यत्।
आश्लेषमर्पय मदर्पितपूर्वमुच्चै-
र्मह्यं समर्पय मदर्पितचुम्बनं च ॥ १३३ ॥

हारो जलार्द्रवसनं नलिनीदलानि
प्रालेयशीकरमुचस्तुहिनांशुभासः।
यस्येन्धनानि सरसानि च चन्दनानि
निर्वाणमेष्यति कथं स मनोभवाग्निः ॥ १३४ ॥

तन्वी शरत्रिपथगा पुलिने कपोले
लोले दृशौ रुचिरचञ्चलखञ्जरीटौ।
तद्बन्धनाय सुचिरार्पितसुभ्रुचाप-
चाण्डालपाशयुगलाविव शून्यकर्णौ ॥ १३५ ॥

पादाङ्गुष्ठेन भूमिं किसलयरुचिना सापदेशं लिखन्ती
भूयो भूयः क्षिपन्ती मयि शितशबले लोचने लोलतारे।
वक्त्रं ह्रीनम्रमीषत्स्फुरदधरपुटं वाक्यगर्भं दधाना
यन्मां नोवाच किंचित्स्थितमपि हृदये मानसं तद्वुनोति ॥ १३६ ॥

Digitized by Microsoft®

ऊरुद्वयं मृगदृशः कदलस्य काण्डौ
मध्यं च वेदिरतुलं स्तनयुग्ममस्याः ।
लावण्यवारिपरिपूरितशातकुम्भ-
कुम्भौ मनोजनृपतेरभिषेचनाय ॥ १३७ ॥
हारोऽयं हरिणाक्षीणां लुठति स्तनमण्डले ।
मुक्तानामप्यवस्थेयं के वयं स्मरकिंकराः ॥ १३८ ॥

---

४ परिशिष्टम् ।

सुभाषितावलावमरुकनाम्ना समुद्धृताः पूर्वागतश्लोकाधिकाः श्लोकाः । यथा—

अन्योन्यग्रथितारुणाङ्गुलि नमत्पाणिद्वयस्योपरि
न्यस्योच्छ्वासविकम्पिताधरदलं निर्वेदशून्यं मुखम् ।
आमीलन्नयनान्तवान्तसलिलं श्लाघ्यस्य निन्द्यस्य वा
कस्येदं दृढसौहृदं प्रतिदिनं दीनं त्वया स्मर्यते ॥ १३९ ॥
असद्वृत्तो नायं न च खलु गुणैरेष रहितः
प्रियो मुक्ताहारस्तव चरणमूले निपतितः ।
गृहाणेमं मुग्धे व्रजतु निजकण्ठंप्रणयिता-
मुपायो नास्त्यन्यस्तव हृदयसंतापशमने ॥ १४० ॥
आलोकयति पयोधरमुपमन्दिरमभिनवाम्बुभरनीलम् ।
दयितारचितचितानलधूमोद्गमशङ्कया पथिकः ॥ १४१ ॥
आश्लिष्टा रभसाद्विलीयत इवाक्रान्ताप्यनङ्गेन या
यस्याः कृत्रिमचण्डवस्तुकरणाकूतेषु खिन्नं मनः ।
कोऽयं काहमिति प्रवृत्तसुरता जानाति या नान्तरं
रन्तुः सा रमणी स एव रमणः शेषौ तु जायापती ॥ १४२ ॥
किं बाले मुग्धतेयं प्रकृतिरियमथो रौद्रता किं नु कोपः
किं वा चापल्यमुच्चैर्व्रतमुत किमु ते यौवनारम्भदर्पः ।
यत्केशालापवक्रस्मितललितकुचभ्रूविलासावलम्बैः
स्वस्थो लोकस्त्वदीयैर्मनसि विनिहितैर्दह्यतेऽमीभिरार्यः ॥ १४३ ॥

Digitized by Microsoft®

गच्छेत्युन्नतया भ्रुवैव गदितं मन्दं वलन्त्या तया
तेनाप्यञ्चितलोचनद्वयपुटेनाज्ञा गृहीता शनैः ।
संकेताय वलद्दृशा पिशुनिता ज्ञाता च दिक्प्रेयसा
गूढः संगमनिश्चयो गुरुपुरोऽप्येवं युवभ्यां कृतः ॥ १४४ ॥

चटुलनयने शून्या दृष्टिः कृता खलु केन ते
क इह सुकृती द्रष्टव्यानामुवाह धुरं पराम् ।
यमभिलिखितप्रख्यैरङ्गैर्न मुञ्चसि चेतसा
वदनकमलं पाणौ कृत्वा निमीलितलोचना ॥ १४५ ॥

चलतु तरला धृष्टा दृष्टिं खला सखि मेखला
स्खलतु कुचयोरुत्कम्पान्मे विदीर्यतु कञ्चुकम् ।
तदपि न मया संभाव्योऽसौ पुनर्दयितः शठः
स्फुटति हृदयं मानेनान्तर्न मे यदि तत्क्षणम् ॥ १४६ ॥

तैस्तैश्चाटुभिराज्ञया किल तया वृत्ते रतिव्यत्यये
लज्जामन्थरया तया निवसिते भ्रान्त्या मदीयांशुके ।
तत्पट्टांशुकमुद्वहन्नहमपि स्थित्वा यदुक्तोऽधुना
वेषो युज्यत एष एव हि तवेत्येतन्न विस्मर्यते ॥ १४७ ॥

पत्रं न श्रवणेऽस्ति बाष्पगुरुणोर्नो नेत्रयोः कज्जलं
रागः पूर्व इवाधरे चरणयोस्तन्व्या न चालक्तकः ।
वार्तोच्छित्तिषु निष्ठुरेति भवता मिथ्यैव संभाव्यते
सा लेखं लिखतु च्युतोपकरणा न्यायेन केनाधुना ॥ १४८ ॥

यदि विनिहिता शून्या दृष्टिः किमु स्थिरकौतुका
यदि विरचितो मौने यत्नः किमु स्फुरितोऽधरः ।
यदि नियमितं ध्याने चेतः कथं पुलकोद्गमः
कृतमभिनयैर्दृष्टो मानः प्रसीद विमुच्यताम् ॥ १४९ ॥

यद्रात्रौ रहसि व्यपेतविनयं वृत्तं रसात्कामिनो-
रन्योन्यं शयनीयमीहितरसावाप्तिप्रवृत्तस्पृहम् ।

Digitized by Microsoft®

तत्सानन्दमिलद्दृशोः कथमपि स्मृत्वा गुरूणां पुरो
हासोद्भेदनिरोधमन्थरमिलत्तारं कथंचित्स्थितम् ॥ १५० ॥
याते गोत्रविपर्यये श्रुतिपथं शय्यागतायाश्चिरं
निर्ध्यातं परिवर्तनं हृदि पुनः प्रारब्धमङ्गीकृतम् ।
भूयस्तत्प्रकृतं कृतं च वलितक्षिप्तैकदोर्लेखया
मानिन्या न तु पारितः स्तनभरो नेतुं प्रियस्योरसः ॥ १५१ ॥
सा यौवनमदोन्मत्ता वयमस्वस्थचेतसः ।
तस्या लावण्यभङ्गेषु दाहोऽस्मासु विजृम्भते ॥ १५२ ॥
सति प्रदीपे सत्यग्नौ सत्सु तारामणीन्दुषु ।
विरामे मृगशावाक्ष्यास्तमोभूतमिदं जगत् ॥ १५३ ॥
सुरतविरतौ व्रीडावेशश्रमस्खलहस्तया
रहसि गलितं तन्व्या प्राप्तुं न पारितमंशुकम् ।
रतिरसजडैरङ्गैरङ्गं पिधातुमशक्तया
प्रियतमतनौ सर्वाङ्गीणं प्रविष्टमदृष्टया ॥ १५४ ॥
सख्यस्तानि वचांसि यानि बहुशोऽधीतानि युष्मन्मुखा-
द्वक्ष्येऽहं बहुशिक्षिता क्षणमिति ध्यात्वापि मौनं श्रिता ।
धूर्तेनैत्य च मण्डलीकृतकुचं गाढं परिष्वज्य मां
पीतान्येव सहाधरेण हसता वक्त्रस्थितान्येव मे ॥ १५५ ॥
उत्कम्पो हृदये स्खलन्ति वचनान्यावेगलोलं मनो
गात्रं सीदति चक्षुरश्रुकलुषं चिन्ता मुखं शुष्यति ।
यस्यैषा सखि पूर्वरङ्गरचना मानः स मुक्तो मया
वन्ध्यास्ता अपि योषितः क्षितितले यासामयं संमतः ॥ १५६ ॥
मानव्याधिनिपीडिताहमधुना शक्नोमि तस्यान्तिकं
नो गन्तुं न सखीजनोऽस्ति चतुरो यो मां बलान्नेष्यति ।
मानी सोऽपि जनो न लाघवभयादभ्येति मातः स्वयं
कालो याति चलं च जीवितमिति क्षुण्णं मनश्चिन्तया ॥ १५७ ॥

Digitized by Microsoft ®

५ परिशिष्टम् ।

सूक्तिमुक्तावलावमरुकनाम्ना समुद्धृताः पूर्वश्लोकातिरिक्ताः श्लोकाः । यथा—

कान्ते कथंचिद्गदितप्रयाणे क्षणं विनम्रा त्विरहार्दिताङ्गी ।
ततस्तमालोक्य कदा गतोऽसीत्यालिङ्ग्य मुग्धा मुदमाससाद ॥ १५८ ॥

यद्गम्यं गुरुगौरवस्य सुहृदो यस्मिंल्लभन्तेऽन्तरं
यद्दाक्षिण्यवशाद्व्रयाच्च सहते मन्दोपचारानपि ।
यल्लज्जा निरुणद्धि यत्र शपथैरुत्पाद्यते प्रत्यय-
स्तत्किं प्रेम स उच्यते परिचयस्तत्रापि मानेन किम् ॥ १५९ ॥

दृष्टे लोचनवन्मनाङ्मुकुलितं पार्श्वस्थिते वक्त्रव-
न्न्यग्भूतं बहिरासितं पुलकवत्स्पर्शे समातन्वति ।
नीवीबन्धवदागतं शिथिलतां संभाषमाणे क्षणा-
न्मानेनापसृतं ह्रियेव सुदृशः पादस्पृशि प्रेयसि ॥ १६० ॥

ललितमुरसा तरन्ती तरलतरङ्गौघचालितनितम्बा ।
विपरितरक्तासक्तेव दृश्यते सरसि सा सख्या ॥ १६१ ॥

६ परिशिष्टम् ।

शार्ङ्गधरपद्धतौ पूर्वश्लोकाधिकः श्लोकः । यथा—

कान्तामुखं सुरतकेलिविमर्दखेद-
संजातघर्मकणविच्छुरितं रतान्ते ।
आपाण्डुरं विलसदर्धनिमीलिताक्षं
संस्मृत्य हे हृदय किं शतधा न यासि ॥ १६२ ॥

७ परिशिष्टम् ।

औचित्यविचारचर्चायां पूर्वश्लोकातिरिक्तः श्लोकः । यथा—

गन्तव्यं यदि नाम निश्चितमहो गन्तासि केयं त्वरा
द्वित्राण्येव पदानि तिष्ठतु भवान्पश्यामि यावन्मुखम् ।
संसारे घटिकाप्रणालविगलद्वारा समे जीविते
को जानाति पुनस्त्वया सह मम स्याद्वा न वा संगमः ॥ १६३ ॥

---

१. औचित्यविचारचर्चायाममरकनाम्नायं श्लोकः समुद्धृतस्तत्रामरुकस्येति भाति.

Digitized by Microsoft®

अमरुशतकश्लोकानुक्रमणी ।

श्लोकारम्भः ।	श्लोकाङ्कः ।	श्लोकारम्भः ।	श्लोकाङ्कः ।
अङ्गं चन्दनपाण्डु ...	... १२४	ऊरुद्वयं मृगदृशः ...	... १३७
अज्ञानामतितानवं ...	... ५०	एँकत्रासनसंस्थितिः...	... १८
अङ्गुल्यग्रनखेन ...	... ५	एकस्मिञ्शयने पराङ्मुख	... २३
अच्छिन्नं नयनाम्बु...	... ११०	एकस्मिञ्शयने विपक्ष	... २२
अज्ञानेन पराङ्मुखीं...	... १७	कठिनहृदये ...	... ५३
अद्यारभ्य यदि ...	... ९३	कथमपि कृते ...	... ७५
अनन्तचिन्ता ...	... ६५	कथमपि सखि ...	... १५
अनालोच्य प्रेम्णः ...	... ८०	कपोले पत्त्राली ...	... ८१
अन्योन्यग्रथिता ...	... १३९	करकिसलयं ...	... ९०
अलसवलितैः ...	... ४	काञ्च्या गाढतरा ...	... २१
असद्वृत्तो नायं ...	... १४०	कान्तामुखं सुरत ...	... १६२
अहं तेनाहूता ...	... ९८	कान्ते कल्पि ...	... १३२
आदृष्टिप्रसरात् ...	... ७६	कान्ते कथंचि ...	... १५८
आयस्ता कलहं ...	... १०६	कान्ते तल्पमुपागते ...	... १०१
आयाते दयिते ...	... ७७	कान्ते सागसि ...	... ४६
आलम्ब्याङ्गण ...	... ७८	किंचिन्मुद्रितपांसवः ...	... ११८
आलोकयति ...	... १४१	किं बाले मुग्धतेयं...	... १४३
आलोलामलका ...	... ३	कृतो दूरादेव ...	... १४
आशङ्क्य प्रणतिं ...	... ४७	कोपस्त्वया यदि ...	... १३३
आश्लिष्टा रभसा ...	... १४२	कोपात्कोमल ...	... ९
आस्तां विश्वसनं ...	... ६३	कोपो यत्र भ्रुकुटि...	... ३८
इति प्रिये ...	... ६६	क्वचित्ताम्बूलाक्तः ...	... १०७
इदं कृष्णं कृष्णं ...	... ९४	क्व प्रस्थितासि ...	... ७१
इयमसौ तरला ...	... १२७	क्षिप्तो हस्तावलग्नः ...	... २
उत्कम्पो हृदये ...	... १५६	गच्छेत्युन्नतया ...	... १४४
उरसि निहितस्तारो...	... ३१	गते प्रेमाबन्धे ...	... ४३

१. शृङ्गारदीपिकायां नास्ति. २. सुभाषितावलौ अद्भुतफुल्लस्य; शार्ङ्गधरपद्धतौ अद्भुतपुण्यस्य. ३. सुभाषितावलौ भीमस्य. ४. शृङ्गारदीपिकायां नास्ति. ५. शृङ्गारदीपिकायां नास्ति. ६. सुभाषितावलौ शार्ङ्गधरपद्धतौ च अर्गटस्य. ७. सुभाषितावलौ पुलिनस्य. ८. सूक्तिमुक्तावलौ शार्ङ्गधरपद्धतौ च वामनस्य. ९. सुभाषितावलौ विज्जिकायाः.

Digitized by Microsoft ®

श्लोकारम्भः ।	श्लोकाङ्कः ।	श्लोकारम्भः ।	श्लोकाङ्कः ।
गन्तव्यं यदि नाम	१६३	दीर्घा वन्दनमालिका ...	४५
गाढालिङ्गनवामनी	४०	दूरादुत्सुकमागते	४९
गाढाश्लेषविशीर्ण	७४	दृष्टः कातरनेत्रया	८५
ग्रामेऽस्मिन्पथिकाय ...	१३१	दृष्टे लोचनवन्मनाङ् ...	१६०
चक्षुःप्रीतिप्रसक्ते	१००	दृष्ट्वैकासनसंस्थिते	१९
चटुलनयने	१४५	देशैरन्तरिता	९९
चपलहृदये	५६	धीरं वारिधरस्य	१३
चरणपतनं सख्यालापा ...	९५	न जाने संमुखा	६४
चरणपतनप्रत्याख्यान ...	२०	नभसि जलदलक्ष्मीं ...	१०३
चलतु तरला	१४६	नान्तः प्रवेश	११४
चिन्तामोह	८७	नापेतोऽनुनयेन	४२
चिरविरहिणो	४४	नार्यो मुग्धशठा	८
जाता नोत्कलिका	८४	निःशेषच्युतचन्दनं... ...	१०५
ज्याकृष्टिबद्ध	१	निःश्वासा हृदयं	९२
तँतश्चाभिज्ञाय	५२	नीलोचैर्विक्षिपन्तः... ...	११९
तयाभूदस्माकं	६९	पटालग्ने पत्यौ	४१
तद्वक्त्राभिमुखं	११	पत्रं न श्रवणेऽस्ति... ...	१४८
तँन्वङ्ग्या गुरुसंनिधौ ...	९६	पराची कोपेन	११२
तन्वी शरत्रिपथगा	१३५	परिम्लाने माने	२५
तँसे महाविरह	८६	पश्यामो मयि	२४
तस्याः सान्द्रविलेपन ...	२६	पादाङ्गुष्ठेन भूमिं	१३६
तैस्तैश्चाटुभि	१४७	पादासक्ते सुचिर	६८
तं मुग्धाक्षि विनैव ...	२७	पीतस्तुषारकिरणो ...	१२०
दंपत्योर्निशि	१६	पीतो यतः प्रभृति	१३०
दत्तोऽस्याः प्रणयः	६		

१. सुभाषितावलौ पुण्ड्रकस्य. २. सूक्तिमुक्तावलावप्यमरुकनाम्नैवोद्धृतः ३. शृङ्गारदीपिकायां नास्ति. ४. शृङ्गारदीपिकायां नास्ति; सुभाषितावलौ दुर्वृहकस्य. ५. शृङ्गारदीपिकायां नास्ति. ६. शृङ्गारदीपिकायां नास्ति; सुभाषितावलौ शार्ङ्गधरपद्धतौ च छमच्छमिकारत्नस्य. ७. सूक्तिमुक्तावलावप्यमरुकनाम्नैवोद्धृतः. ८. सुभाषितावलौ नरसिंहस्य. ९. शृङ्गारदीपिकायां नास्ति. १०. शृङ्गारदीपिकायां नास्ति. ११. सूक्तिमुक्तावलौ सुभाषितावलौ शार्ङ्गधरपद्धतौ च नामरहितः. १२. सूक्तिमुक्तावलावप्यमरुकनाम्नैवोद्धृतः. १३. हरविजयस्थोऽयं (२६।६२) श्लोकः.

Digitized by Microsoft®

श्लोकारम्भः ।	श्लोकाङ्कः ।	श्लोकारम्भः ।	श्लोकाङ्कः ।
पुरस्तन्व्या गोत्र ...	... ५१	यावन्त्येव पदा ...	... ४८
पुष्पोद्भेदमवाप्य ...	... १०८	यास्यामीति समु ...	... ७९
प्रयच्छाहारं ...	... ११७	रात्रौ वारिभरा ...	... ५४
प्रस्थानं वलयैः ...	... ३५	रामाणां रमणीय ...	... १२३
प्रहरविरतौ ...	... १२	रोहन्तौ प्रथमं ...	... १११
प्रातः प्रातरुपागतेन	... ३३	ललनालोल ...	... १२१
प्रासादे सा दिशि ...	... १०२	ललितमुरसा ...	... १६१
प्रियकृतपट ...	... ११५	लम्बा नांशुक ...	... ६२
बाले नाथ विमुञ्च ...	... ५७	लाक्षालक्ष्म ललाट...	... ६०
भवतु विदितं ...	... ३०	लिखन्नास्ते भूमिं ...	... ७
भ्रूभङ्गे रचितेऽपि ...	... २८	लीलातामरसाहतो ...	... ७२
भ्रूभेदो गुणितः ...	... ९७	लोलद्भूलतया ...	... ८३
मन्दं मुद्रितपांसवः...	... १२७	लोलैर्लोचनवारिभिः	... ६१
मलयमरुतां व्राता ...	... ३२	वरमसौ दिवसो ...	... १२५
मानव्याधि ...	... १५७	वान्ति कह्लार ...	... १२२
मुग्धे मुग्धतयैव ...	... ७०	विरहविषमः ...	... ६७
म्लानं पाण्डुकृशं ...	... ८८	शठान्यस्याः काञ्ची...	... १०९
यदि विनिहिता ...	... १४९	शून्यं वासगृहं ...	... ८२
यद्गम्यं गुरु ...	... १५९	श्रुत्वाकस्मान्निशीथे ...	... १२९
यद्रात्रौ रहसि ...	... १५०	श्रुत्वा नामापि ...	... ५९
याताः किं न मिलन्ति	... १०	श्लिष्टः कण्ठे ...	... ५८
याते गोत्रविपर्यये ...	... १५१	संदष्टेऽधरपल्लवे ...	... ३६

१. शृङ्गारदीपिकायां नास्ति. एतद्युग्मं दशरूपावलोकेऽप्यमरुकनाम्नैवोदाहृतम्; सुभाषितावलावेतद्युग्मं दुर्वेहकस्य. २. सूक्तिमुक्तावलौ सुभाषितावलौ च झलज्झलिकावासुदेवस्य; शार्ङ्गधरपद्धतौ गलज्जलवासुदेवस्य. ३. शृङ्गारदीपिकायां नास्ति. ४. सूक्तिमुक्तावलौ शार्ङ्गधरपद्धतौ च कुमारदासस्य; सुभाषितावलौ भट्टकुमारस्य. ५. सुभाषितावलौ भदन्तधर्मकीर्तेः; सूक्तिमुक्तावलौ धर्मकीर्तेः. ६ सूक्तिमुक्तावलौ सुभाषितावलौ च भदन्तारोग्यस्य; शार्ङ्गधरपद्धतौ भदन्तवर्मणः. ७. शृङ्गारदीपिकायां नास्ति. ८. सूक्तिमुक्तावलौ शार्ङ्गधरपद्धतौ च भट्टेन्दुराजस्य. ९. शृङ्गारदीपिकायां नास्ति. १०. सुभाषितावलौ अर्गटस्य ११. शार्ङ्गधरपद्धतावप्यमरुकस्यैव. १२. सुभाषितावलौ दाक्षिणात्यस्य कस्यापि. १३. सुभाषितावलौ शार्ङ्गधरपद्धतौ च शीलाभट्टारिकायाः. १४. अर्जुनवर्मदेवेन द्वाविंशश्लोकव्याख्यायां प्रमाणत्वेनोपन्यस्तः.

Digitized by Microsoft®

श्लोकारम्भः ।	श्लोकाङ्कः ।	श्लोकारम्भः ।	श्लोकाङ्कः ।
सख्यस्तानि	१५५	सुरतविरतौ	१५४
सति प्रदीपे	१५३	सुस्तोऽयं सखि	३७
सन्त्येवात्र गृहे	९१	सैवाहं भ्रमदा	८९
सा पत्युः प्रथमे	२९	स्फुटतु हृदयं	७३
सा बाला वयमप्र	३४	स्मररसनदीपूरेणोढा ...	१०४
सा यौवनमदो	१५२	स्वं दृष्ट्वा करजक्षतं... ...	५५
सालक्तकं शृत	१२८	स्विन्नं केन मुखं	११३
सालक्तकेन	११६	हारो जलार्द्रवसनं	१३४
सुतनु जहिहि	३९	हारोऽयं हरिणा	१३८

---

१. सुभाषितावलौ लीलाचन्द्रस्य. २. शृङ्गारदीपिकायां नास्ति. ३. सूक्तिमुक्तावलौ शार्ङ्गधरपद्धतौ चामरुकनाम्नैवोद्धृतः. ४. शृङ्गारदीपिकायां नास्ति. ५. सुभाषितावलौ बाणकवेः.

Digitized by Microsoft ®

Digitized by Microsoft®

Digitized by Microsoft®

Digitized by Microsoft ®

Digitized by Microsoft®

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY

PK 3771 A43 1916

Amaru
Amarusatakam

Digitized by Microsoft®

Digitized by Microsoft®